BIBLIOTHECA INDICA:

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
New Series, No. 13[illegible]6

॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRAHMANA

OF THE WHITE YAJURVEDA

WITH THE

COMMENTARY OF SAYANACHARYA

EDITED BY

LATE ACHARYA SATYAVRATA SAMASRAMI'S
son and pupil
PROF. HITAVRATA SAMAKANTHA.
Assistant Lecturer, Vedas, The University of Calcutta

VOL. IX, FASC. I.

CALCUTTA:
PRINTED BY S. V. CHATTERJI, SATYA PRESS, 16/1, GHOSE LANE
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET,
1911.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

Asiatic Society of Beng...

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM THE SOCIETY'S AGENTS,—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London, W.*,

AND MR OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY

Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series

*Advaita Brahma Siddhi, Fasc. 2,4 @ /10/ each ..	Rs.	1	4
Advaitachinta Kaustubhe, Fasc. 1-3 @ /10/ each ..		1	14
*Agni Purāṇa, Fasc 3 14 @ /10/ each		7	8
Aitarēya Brahmana, Vol. I, Fasc 1-5 ; Vol II, Fasc. 1 5 ; Vol III, Fasc 1 5, Vol, IV, Fasc. 1 8 @ /10/ ..		14	6
Aitareyalochanam, (the preface of the Ditto) by Acarya S. V Samasrami ..		2	0
*Anu Bhāshya, Fasc 2-5 @ /1 / each ..		2	8
Aphorisms of Sāṇdilya, (English) Fasc 1		.	0
Aṣṭasāhasrika Prajñāparamitā Fasc. 1 6 @ /10/ each ..		3	12
Acvavaidyaka, Fasc. 1-5 @ /10/ each		3	2
*Ātharvana Upanishad, Fasc 3-5 @ /10/ each		1	14
Avadana Kalpalata, (*Sans. and Tibetan*) Vol. I, Fasc 1 6 ; Vol II Fasc. 1 5 @ 1/ each ..		11	[illegible]
A Lower Ladakhi version of Kesarsaga, Fasc. 1 3 @ 1/ each		3	
Bālam Bhaṭṭi, Vol I Fasc 1 2, Vol II Fasc I @ /10/ ..		1	14
Baudhāyana Srauta Sutra, Fasc. 1 3, Vol II Fasc I @ /10/ each ..		2	8
*Bhamati, Fasc 4 8 @ /10/		3	2
Bhāṭṭa Dīpika Vol. I, Fasc. 1-5 @ /10/-		3	2
Brahma Sutra, Fasc. 1, @ /10/		0	10
Bṛhaddévatā, Fasc. 1 4 @ /10/ each		2	8
Bṛhaddharma Purana, Fasc. 1-6 @ /10/ each		3	12
Bodhicāryāvatāra of Çāntidevi, Fasc. 1 5		3	2
Çatadusani, Fasc. 1 2		1	4
Catalogue of Sanskrit Books and MSS., Fasc 1 4 @ 2/ each		8	0
Çatapatha Brahmaṇa Vols. I Fasc 1 7, II Fasc 1 5, III Fasc 1 7, V Fasc 1 4		14	6
Çatasahasrikā prajñapāramita, Part I, Fasc. 1 12 @ /10/ each		7	8
*Caturvarga Chintāmani (Text) Vols. II, 1 25 ; III Part I, Fasc 1-18, Part II, Fasc. 1 10 @ /10/ each ; Vol. IV, Fasc 1 6 ..		36	14
Çlokavārtika, (English) Fasc. 1 6 @ 1/4/ ..		7	8
*Çrauta Sutra of Āpastamba, Fasc. 9-17 @ /10/ each ...		5	10
Ditto Acvālāyan, Fasc 4 11 @ /10/ each		5	0
Ditto Çānkhayan, (Text) Vol I, Fasc 1 7 ; Vol. II, Fasc. 1 4 ; Vol. III, Fasc 1 4, Vol IV Fasc 1 @ /10/ each ..		10	0
Ditto Latyāyan Fasc 1 9 @ /10/ each ..		5	10
Çri Bhāshyam, (Text) Fasc 1 3 @ /10/ each ..		1	14
Dān Kriyā Kaumudi, Fasc 1 2 ..		1	4
Gadādhara Paddhati Kālasara, Vol I, Fasc 1 7 ..		4	6
Ditto Acarasara, Vol II, Fasc. 1 3		1	14
Gobhiliya Gṛhyo Sutrum, Fasc. 4 12 @ /10/		5	10
Kāla Viveka, Fasc. 1 7		4	6
Kātantra, Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc 1-14 @ /1/4/ each		17	8
Kūrma Puraṇa, Fasc. 3 9 @ /10/ each		3	2
Lalita-Vistāra, (English) Fasc. 1-3 @ 1/- each		3	0
Ditto Fasc. 3-6 @ /10/ each		2	8
Madana Pārijāta, Fasc 1-11 @ /10/ each		6	14
Mahā bhāṣya-pradipodyota, Vol. I Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III, Fasc. 1-6 @ /10/ each		16	[illegible]
Manuṭikā Sangraha, (Text) Fasc 1-3 @ /10/ each		1	14
Mārkaṇdeya Purāna (English) Fasc. 1-9 @ 1/- each		9	0
* Ditto (Text) Fasc 5 7 @ /10/		1	14
*Mimāṃsā Darçana (Text) Fasc. 9 19 @ /10/ each		8	12

ॐ

॥ शतपथब्राह्मणम् ॥

॥ अथ ॥

॥ नवमकाण्डम् ॥

॥ अथ प्रथमः प्रपाठकः ॥

॥ प्रथमं ब्राह्मणम् ॥

॥ अपिवा प्रथमाध्याये प्रथमं ब्राह्मणम् ॥

॥ हरिः ॐ ॥

अथातः शतरुद्रियं जुहोति । अत्रैष सर्व्वोऽग्निः संस्कृतः स एषोऽत्र रुद्रो देवता तस्मिन् देवा एतदमृतꣳ रूप मुत्तम मदधुः स एषो ऽत्र दीप्यमानोऽतिष्ठदन्न मिच्छमानस्तस्माद्देवा अबिभयुर्यद्वै नो ऽयं न हिꣳस्यादिति * ॥ १ ॥

* 'हिꣳस्यादिति'—इति अ, च ।

ते ऽब्रुवन् । अन्न मस्मै सम्भराम तेनैनᳫ᳭ शमया मेति तस्मा ऽएतदन्नᳫ᳭ समभरञ्छान्तदेवत्यं तेनैन-मशमयंस्तद्यदेतं देव मेतेनाशमयंस्तस्माच्छान्तदेवत्यᳫ᳭ शान्तदेवत्यᳫ᳭ ह वै तच्छन्तरुद्रिय मित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तथैवास्मिन्नय मेतद-मृतᳫ᳭ रूप मुत्तमं दधाति स एषो ऽत्र दीप्यमान स्तिष्ठत्यन्न मिच्छमानस्तस्मा ऽएतदन्नᳫ᳭ सम्भरति शान्त-देवत्यं तेनैनᳫ᳭ शमयति ॥ २ ॥

जर्तिलैर्जुहोति । जायत ऽएष एतद्यच्चीयते स एष सर्व्वस्मा ऽअन्नाय जायत ऽउभयम्वेतदन्नं यज्ज-र्त्तिला यच्च ग्राम्यं यच्चारण्यं यदह तिलास्तेन ग्राम्यं यदकृष्टे पच्यन्ते तेनारण्य मुभयेनैवैन मेतदन्नेन प्रीणाति ग्राम्येण चारण्येन च ॥ ३ ॥

अर्कपर्णेन जुहोति । अन्न मर्को ऽन्नेनैवैन मेतत् प्रीणाति ॥ ४ ॥

परिश्रित्सु जुहोति । अग्नय एते यत्परिश्रित स्तथो हास्यैता अग्निमत्येवाहुतयो हुता भवन्ति ॥ ५ ॥

यद्देवैतच्छतरुद्रियं जुहोति । प्रजापतेर्विस्र-स्ताद्देवता उदक्रामंस्तमेक एव देवो नाजहान्मन्युरेव सो ऽस्मिन्नन्तर्विततो ऽतिष्ठत् सो ऽरोदीत्तस्य यान्यश्रूणि प्रास्कन्दंस्तान्यस्मिन् मन्यौ प्रत्यतिष्ठंस्स एव शतशीर्षा रुद्रः समभवत् सहस्राक्षः शतेषुधिरथ या अन्या विप्रुषो ऽपतंस्ता असंख्याता सहस्राणीमाँल्लोकाननुप्राविशंस्तद्यदुदितात्समभवंस्तस्माद्रुद्राः सो ऽयꣳ शतशीर्षा रुद्रः सहस्राक्षः शतेषुधिरधिज्यधन्वा प्रतिहितायी भीषयमाणो ऽतिष्ठदन्नमिच्छमानस्तस्माद्देवा अबिभयुः ॥ ६ ॥

ते प्रजापतिमब्रुवन् । अस्माद्वै बिभीमो यद्वै नो ऽयं न हिꣳस्यादिति सो ऽब्रवीदन्नमस्मै सम्भरत तेनैनꣳ शमयतेति तस्मा ऽएतदन्नꣳ समभरञ्छतरुद्रियं तेनैन मशमयंस्तद्यदेतꣳ शतशीर्षाणꣳ रुद्रमेतेनाशमयं स्तस्माच्छतशीर्षरुद्रशमनीयꣳ शतशीर्षरुद्रशमनीयꣳ ह वै तच्छतरुद्रियमित्याचक्षते परो ऽक्षं परो ऽक्षकामा हि देवास्तथैवास्मा ऽअय मेतदन्नꣳ सम्भरति शतरुद्रियं तेनैनꣳ शमयति ॥ ७ ॥

गवेधुकासक्तुभिर्जुहोति। यत्र वै सा देवता विस्रस्ताशयत्ततो गवेधुकाः समभवन्त्स्वेनैवैन मेतद्भागेन स्वेन रसेन प्रीणाति ॥ ८ ॥

अर्कपर्णेन जुहोति। एतस्य वै देवस्याशयादर्काः समभवन्त्स्वेनैवैन मेतद्भागेन स्वेन रसेन प्रीणाति ॥९॥

परिश्रित्सु जुहोति। लोमानि वै परिश्रितो न वै लोमसु विषं न किञ्चन हिनस्त्युत्तरार्द्धेऽग्ने-रुदङ् तिष्ठन् जुहोत्येतस्याᳪं ह दिश्येतस्य देवस्य गृहाः स्वायामेवैन मेतद्दिशि प्रीणाति स्वायां दिश्यव यजते ॥ १० ॥

स वै जानुदघ्ने प्रथमᳪं स्वाहाकरोति। अध-इव वै तद्यज्जानुदघ्न मध-इव तद्यदयं लोकस्तद्य ऽइमं लोकᳪं रुद्राः प्राविशंस्तां स्तत् प्रीणाति ॥ ११ ॥

अथ नाभिदघ्ने*। मध्यमिव वै तद्यन्नाभिदघ्नं मध्यमिवान्तरिक्षलोकस्तद्ये ऽन्तरिक्षलोकᳪं रुद्राः प्राविशंस्तां स्तत् प्रीणाति ॥ १२ ॥

---

* 'नाभिदघ्ने'—इति ग, घ।

अथ मुखदघ्न। ऽउपरीव वै तद्यन्मुखदघ्न मुपरीव तद्यदसौ लोकस्तदेऽस्मं लोकᳫं रुद्राः प्राविशंस्तां स्तत् प्रीणाति स्वाहाकारेणान्नं वै स्वाहाकारो ऽन्नेनैवैना-नेतत् प्रीणाति ॥ १३ ॥

नमस्त रुद्र मन्यव ऽइति। य एवास्मिन्नसो ऽस्मन्मन्युर्व्वितती ऽतिष्ठत्तस्मा ऽएतन्नमस्करोत्युतो त ऽइषवे नमो बाहुभ्या मुत ते नम इतीषुहा च हि बाहुभ्यां च भीषयमाणो ऽतिष्ठत् ॥ १४ ॥

स एष चत्र देवः *। यः स शतशीर्षा समभव-द्विश इम ऽइतरे ये विमुङ्भ्यः समभवंस्तस्मा ऽए-तस्मै चत्रायैता विश एतं पुरस्तादुद्धार मुदहरन्न्य एष प्रथमो ऽनुवाकस्तेनैन मप्रीणांस्तथैवास्मा ऽअय मेतं पुरस्तादुद्धार मुद्धरति तेनैनं प्रीणाति तस्मादेष एकदेवत्यो भवति रौद्र एतᳫं चत्रेतन प्रीणाति ॥ ॥ १५ ॥

चतुर्दशैतानि यजूᳫंषि भवन्ति। त्रयोदश मासाः संव्वत्सरः प्रजापतिश्चतुर्दशः प्रजापतिरग्नि-

---

* 'देवः'—इति ग. घ.।

यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदन्नेन प्रीणाति नमो नम इति यज्ञो वै नमो यज्ञेनैवैन मेतन्नमस्कारेण नमस्यति तस्माद् ह नायज्ञियं ब्रूयान्नमस्त ऽइति यथा हैनं ब्रूयाद्यज्ञस्त ऽइति तादृक्तत् * ॥ १६ ॥

अथ रुद्रेभ्यो जुहोति। नमो ऽमुष्मै चेति तद्यथा वै ब्रूयादसौ† त्वं च न एष च मा हिᳫंसिष्ट मित्येव मेतदाह नतराᳫं हि विदित मामन्त्रितो हिनस्ति ॥ १७ ॥

नमो हिरण्यबाहवे। सेनान्ये दिशां च पतये नम इत्येष एव हिरण्यबाहुः सेनानीरेष दिशां पतिस्तद्यत् किञ्चाग्नैकदेवत्य मेतमेव तेन प्रीणाति क्षत्रमेव तद्विश्यपिभागं करोति तस्माद्यद्विशस्तस्मिन् क्षत्रियो ऽपिभागोऽथ या असंख्याता सहस्राणीमाँल्लोकाननुप्राविशन्नेतास्ता देवता याभ्य एतज्जुहोति‡ ॥ ॥ १८ ॥

---

* 'तादृक्तन्'—इति ग, घ।

† 'ब्रूयादसौ'—इति च दृष्टं डा० वेबरमहोदयेन।

‡ '०जुहोति'—इति ग, घ।

अथ जातेभ्यो जुहोति। एतानि ह जातान्येते रुद्रा अनुप्रविविशुर्यत्र-यत्रैते तद्देवैनानेतत् प्रीणात्यथो ऽएवꣳ हैतानि रुद्राणां जातानि देवानां वं विधामनु मनुष्यास्तस्माद् हेमानि मनुष्याणां जातानि यथाजातमेवैनानेतत् प्रीणाति ॥ १९ ॥

तेषां वा ऽउभयतो नमस्कारा अन्ये *। अन्यतरतोनमस्कारा अन्ये ते ह ते घोरतरा अशान्ततरा य ऽउभयतोनमस्कारा उभयत एवैनानेतद्यज्ञेन नमस्कारेण शमयति ॥ २० ॥

स वा ऽअशीत्यां च स्वाहाकरोति। प्रथमे चानुवाके ऽथाशीत्या मथाशीत्यां च यानि चोर्द्ध्वानि यजूꣳष्यावतानेभ्यो ऽन्न मशीतयो ऽन्नेनैवैनानेतत् प्रीणाति ॥ २१ ॥

अथैतानि यजूꣳषि जपति। नमो वः किरिकेभ्य इत्येतद्वास्य प्रतिज्ञाततमं धाम यथा प्रियो वा पुत्रो हृदयं वा तस्माद्यवैतस्माद्देवाच्छन्दत तदेता-

* 'अन्ये। ऽन्यतरतो'—इति च

भिर्व्याहृतिभिर्जुहुयादुप हैवैतस्य देवस्य प्रियं धाम गच्छति तथो हैनमेष देवो न हिनस्ति ॥ २२ ॥

नमो वः किरिकेभ्य इति। एते हीदꣳ सर्व्वं कुर्व्वन्ति देवानाꣳ हृदयेभ्य इत्यग्निर्व्वायुरादित्य एतानि ह तानि देवानाꣳ हृदयानि नमो विचिन्वत्केभ्य इत्येते हीदꣳ सर्व्वं विचिन्वन्ति नमो विक्षिणत्केभ्य इत्येते वै तं विक्षिणन्ति यं विचिक्षीषन्ति नम आनिर्हतेभ्य इत्येते ह्येभ्यो लोकेभ्यो ऽनिर्हताः ॥ २३ ॥

अथोत्तराणि जपति। द्रापे ऽन्धसस्पत ऽइत्येष वै द्रापिरेष वै तं द्रापयति यं दिद्रापयिषत्यन्धसस्पत ऽइति सोमस्य पत ऽइत्येतद्दरिद्र नीललोहितेति नामानि चास्यैतानि रूपाणि च नामग्राह मेवैन मेतत् प्रीणात्यासां प्रजाना मेषां पशूनां मा भेर्मा रोङ्मो च नः किञ्चनाम मदिति यथैव यजुस्तथा बन्धुः ॥ २४ ॥

स एष चतं देवः*। तस्मा ऽएतस्मै चवायेता

* 'देवः'—इति ग, घ।

त्रिधा ऽमुं पुरस्तादुद्धार मुद्धरन्त्यो ऽसौ प्रथमो ऽनुवाको ऽथास्मा ऽएत मुपरिष्टादुद्धार मुद्धरंस्तेनैन मप्रीणंस्तथैवास्मा ऽअय मेत मुपरिष्टादुद्धार मुद्धरति तेनैनं प्रीणाति तस्माद्ध्येष एकदेवत्यो भवति रौद्र एवैतꣳ ह्येवैतेन प्रीणाति * ॥ २५ ॥

सप्तैतानि यजूꣳषि भवन्ति । सप्तचितिको-ऽग्निः सप्तऽर्त्तवः संवत्सरः संवत्सरो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदन्नेन प्रीणाति तान्युभयान्येकविꣳशतिः सम्पद्यन्ते द्वादश मासाः पञ्चऽर्त्तवस्त्रय इमे लोका असावादित्य एकविꣳश एता मभिसम्पदम् ॥ २६ ॥

अथावतानान् जुहोति । एतद्वा ऽएनान् देवा एतेनान्नेन प्रीत्वाथैषा मेतैरवतानैर्धनूꣳष्यवातन्वंस्तथैवैनानय मेतदेतेनान्नेन प्रीत्वाथैषा मेतैरवतानैर्धनूꣳष्यवतनोति न ह्यवततेन धनुषा कं चन हिनस्ति ॥ ॥ २७ ॥

* 'प्रीणाति'—इति क ।

तद्दै सहस्रयोजन ऽइति। एतद्ध परमं दूरं यत् सहस्रयोजनं तद्यदेव परमं दूरं तदेवैषा मेतद्धनूऽंष्यवतनोति * ॥ २८ ॥

यद्देवाह सहस्रयोजन ऽइति। अयमग्निः सहस्रयोजनं न ह्येतस्मादिति मेत्यन्यत् परमस्ति तद्यदग्नौ जुहोति तदेवैषाऽं सहस्रयोजने धनूऽंष्यवतनोति + ॥ २९ ॥

असंख्याता सहस्राणि। अस्मिन् महत्यर्णव ऽइति यत्र-यत्र ते तदेवैषा मेतद्धनूऽंष्यवतनोति‡ ॥ ॥ ३० ॥

दशैतानवतानान् जुहोति। दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैषा मेतद्धनूऽंष्यवतनोति § ॥ ३१ ॥

अथ प्रत्यवरोहान् जुहोति। एतद्वा ऽएतदिमाँल्लोकानित ऊर्द्ध्वो रोहति स स पराङिव रोह इय

*, †, ‡, § 'धनूंष्यवतनोति'– इति क

मु वै प्रतिष्ठा ते देवा इमां प्रतिष्ठा मभिप्रत्यायंस्तथै-
वैतद्यजमान इमां प्रतिष्ठा मभिप्रत्यैति ॥ ३२ ॥

यद्देव प्रत्यवरोहति । एतद्वाऽ एनानेतत् प्रीण-
न्नन्ववैति तत एवैतदात्मान मपोद्धरते जीवात्वै तथो
हानेनात्मना सर्व्व मायुरेति ॥ ३३ ॥

यद्देव प्रत्यवरोहति । एतद्वा ऽएतदेतान् रुद्रा-
नित ऊर्द्धान् प्रीणाति तान् पुनरमुतो ऽर्व्वाचः ॥३४॥

नमोऽस्तु रुद्रेभ्यो ये दिवीति । तद्ये ऽमुष्मिं-
ल्लोके रुद्रास्तेभ्य एतन्नमस्करोति येषां वर्षमिषव
इति वर्षꣳ ह तेषा मिषवो वर्षेण ह ते हिꣳसन्ति
यं जिहिꣳसिषन्ति ॥ ३५ ॥

नमोऽस्तु रुद्रेभ्यो ये ऽन्तरिक्ष ऽइति । तद्ये ऽन्त-
रिक्षलोके रुद्रास्तेभ्य एतन्नमस्करोति येषां वात
इषव इति वातो ह तेषा मिषवो वातेन ह ते
हिꣳसन्ति यं जिहिꣳसिषन्ति ॥ ३६ ॥

नमोऽस्तु रुद्रेभ्यो ये पृथिव्या मिति । तद्ये
ऽस्मिंल्लोके रुद्रास्तेभ्य एतन्नमस्करोति येषा मन्न-

मिषव इत्यन्नꣳ ह तेषा मिषवो ऽन्नेन ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥ ३७ ॥

तेभ्यो दश प्राचीः । दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा इति दशाक्षरा विराड्विराडग्निर्दश दिशो दिशो ऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति* ॥ ॥ ३८ ॥

यद्वेवाह दश-दशेति । दश वा ऽअञ्जलेरङ्गुलयो दिशि-दिश्येवैभ्य एतदञ्जलिं करोति तस्माद् हैतद्भीतो ऽञ्जलिं करोति तेभ्यो नमो ऽस्त्विति तेभ्य एव नमस्करोति ते नो मृडयन्त्विति त ऽएवास्मै मृडयन्ति ते यं द्विष्मो यश्च नो द्वेष्टि त मेषां जम्भे दध्म इति य मेव द्वेष्टि यश्चैनं द्वेष्टि त मेषां जम्भे दधात्यमु मेषां जम्भे दधामीति ह ब्रूयाद्यं द्विष्यात्ततो ऽह तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो ह्येव स यमेवंविद्द्वेष्टि ॥ ३९ ॥

---

* 'प्रीणाति'—इति क ।

त्रिष्कृत्वः प्रत्यवरोहति । त्रिवृदग्निर्यावानग्नि-र्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति स्वाहा-कारेणान्नं वै स्वाहाकारोऽन्नेनैवैनमेतत् प्रीणाति त्रिरित ऊर्द्धो रोहति तत् षट् तस्योक्तो बन्धुः ॥ ४० ॥

यद्वेव त्रिष्कृत्वः प्रत्यवरोहति । त्रिर्हि कृत्व ऊर्द्धो रोहति तद्यावत् कृत्व ऊर्द्धो रोहति तावत् कृत्वः प्रत्यवरोहति ॥ ४१ ॥

अथ तदर्कपर्णं चात्वाले प्रास्यति । एतद्वा एनेनैतद्रौद्रं कर्म करोति तदेतदशान्तं तदेतत्तिरः करोति नेदिद मशान्तं कश्चिदभितिष्ठात्तन्नेद्धिनस-दिति तस्माच्चात्वाले यद्वेव चात्वालेऽग्निरेष यच्चा-त्वालस्तथो हैनदेषोऽग्निः सन्दहत्यथातः सम्पदेव * ॥ ४२ ॥

तदाहुः । कथ मस्यैतच्छतरुद्रियꣳ संवत्सर मग्नि माप्नोति कथꣳ संवत्सरेणाग्निना सम्पद्यत इति षष्टिश्च ह वै त्रीणि च शतान्येतच्छतरुद्रिय

* 'सम्पदेव'—इति ग॰ ३

मथ त्रिꣳशदथ पञ्चविꣳशत्ततो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत् संवत्सरस्याहान्याप्नोत्यथ यानि त्रिꣳशत्त्रिꣳशन् मासस्य रात्रयस्तन् मासस्य रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चविꣳशत्स त्रयोदशो मासः स आत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव पञ्चविꣳश मेतावान् वै संवत्सर एव सु हास्यैतच्छतरुद्रियꣳ संवत्सर मग्नि माप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यत ऽएतावत्य उ वै शाण्डिले ऽग्नौ मध्यतो यजुष्मत्य इष्टका उपधीयन्ते ऽग्नयो हैते पृथग् यदेता इष्टका एव सु हास्यैते ऽग्नयः पृथक् शतरुद्रियेणाभिहुता भवन्ति * ॥ ४३ ॥

तदाहुः । कथ मस्यैतच्छतरुद्रियं महदुक्थ माप्नोति कथं महतोक्थेन सम्पद्यत ऽइति यान्यमूनि पञ्चविꣳशतिर्यजूꣳष्यभितो ऽशीतीः स पञ्चविꣳश आत्मा यत्र वा ऽआत्मा तदेव शिरस्तत्

* 'भवन्ति'—इति ख ।

पक्वपुष्काण्यथ या अशीतयः सैवाशीतीनामाप्तिर- शीतिभिर्हि महदुक्थमाख्यायतेऽथ यदूर्ध्वमशीतिभ्यो यदेवादो महत उक्थस्योर्ध्वमशीतिभ्य एतदस्य तदेव नु हास्यैतत्कृतं भवतीयं महदुक्थमाप्नोत्येवं महतोक्थेन सम्पद्यते ॥ ४४ ॥ १ ॥

॥ इति प्रथमप्रपाठके प्रथमं ब्राह्मणम् ॥

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

चितीनामुपधानं हि काण्डेऽष्टम उदीरितम् ।
अथाग्निनवमे कर्म सञ्चितस्याभिधास्यते ॥

“तत्रादौ तावच्छतरुद्रियहोमं विधत्ते *—

“अथात इति ‘अथ’ शब्देनाग्नि चित्युपधाय परिसमाप्तानन्तर्यं द्योत्यते: अत इति यतः कारणात् सञ्चितः अग्निरूप

* का० श्रौ० सू० १८.१.१. वा० सं० १६.१. १६।

शमयतीयः पतो हेतोः शतरुद्रिय मिति कर्मनामधेयं यथा अग्निहोत्रं जुहोतीति। 'शतरुद्रियं जुहोति' शतरुद्रायास्य शामं भावयेदित्यर्थः। विहितोऽयं होमो रुद्ररूपतापन्नस्याग्नेरुप शमनार्थ इत्याह। 'अत्रैव' इत्यादिना तेनैन"ञ् शमय- त्यित्यन्तेन अत्राग्निचयनसमये एषः 'अग्निः' साकल्येन संस्कृतो भवति। अतश्चासौ 'रुद्रो देवता:' यतः कारणाद्देवास्तस्मि- न्नेतच्चयनलक्षणेन संस्कारेण निष्पन्न 'ममृतं' अतएवोत्तमं रूपं 'अदधुः' विस्रंसनात् प्राक् यदमृतं रूप मस्ति तस्य विस्रं- सनावसरे शतत्वादेव पुनरत्र चयनसंस्कारेणादधुः। तस्मा दीप्तोऽग्निः 'दीप्यमानोन्न मिच्छमानो' तिष्ठन् इच्छमान इति व्यत्ययेन शानच् × × × तथाभिधानात् रुद्राद्देवा अनेनोपायेन नोऽयं हिंस्यादिति अबिभयु रिति ॥ १ ॥

'ते' देवा 'अस्मै' रुद्राय 'अन्नं' समभरन् तेनैनं शमयामिति परस्य मुक्त्वा तथैवाकार्षुः। 'शान्तदेवत्यं शान्तदेवतार्थं देवताशान्त्यर्थ मित्यर्थः। अतएव शमनार्थत्वात् तदन्नं शान्तदेवत्यं तच देवाः परोक्षकामत्वात् 'शतरुद्रीय' मित्यर्थः। तदन्न साध्यत्वात् कर्मापि तथैव व्यपदिश्यते। तथाच पूर्वं यथैव देवा अकार्षुः तथैवासावपि यजमानः तेन सहंशमितवान् भवति ॥ २ ॥

प्रकृते होमे द्रव्यविशेषं विधाय तस्य चोभयविधानात्मकत्वात् चयनसंस्कारे जात रुद्रदैवतोचित रूपत्वेन प्रशंसति— "जर्तिलै- र्जुहोमात्यादिना * 'जर्तिला' आरण्यतिलाः 'स एष' इति उत्पन्नमानस्य सर्वस्य सम्भोगार्थं मुत्पन्ने स एव अग्निः 'सर्वस्मा

* का० श्रौ० सू० १८. १. १

भक्षाय जायते सर्वाङ्गभोगार्थं जायत इत्यर्थः। साधारण्येन होम-साधनतया जुह्वाः प्राशस्त्यवाद साह ॥ ३ ॥

"अर्कं पर्णेति। अत्र 'अर्कं' इति। अर्कस्य भोग्यं प्रपञ्चाम्नः पातित्वादत्रार्थं जुहोतीतिचोदितत्वेनाश्रवणीये होमे प्रसक्ताबाह परिश्रितिस्त्विति *। परिश्रित इति चिताः परितो निखाताः क्षुद्रपाषाणा. तन्मयं होमः कर्त्तव्यः। तेषां चात्रैः परितः स्थापनादेव तेनैता आहुतयोऽग्नि सन्धेय प्रदेशे हुता भवन्ति। अत्र कात्यायन: -"शतरुद्रियहोम उत्तरपक्षस्या पश्चात्" तस्यां परिश्रित्स्वर्कपर्णेनार्ककोशेन शातयतीति †।" अर्ककोशस्य दण्ड-स्थानि करणायम् ॥ ४, ५ ॥

अथ पुनस्तमेव होमं शतरुद्रियस्य कर्त्तव्यतयास्य रुद्राणां मृत्-पत्तिप्रकारं दर्शयन् तत्कर्मणार्थतत्वेन प्रशंसति -- "यत्रैतमदित्या-दिना। 'प्रजापतेः' सकाशात् विस्रंसनावसरे सर्वासु देवतासु निर्गतास्वपि एक एव मन्युः देवस्तमपरित्यज्य तस्मिन्नेवास्तः। विसृतो तिष्ठन् पश्चात् स प्रजापति विस्रंसनात् अरोदीत्' रोद-नाश्च ततो 'यान्यश्रूणि प्रास्कन्दन्' अपतन् तान्यस्त्रैवर्त्तमानि 'मन्यौ' प्रतिष्ठितान्यभूवन् ततः स 'मन्युः' शतशीर्षत्वादि गुणको रुद्रोऽभूत्। अथ ततो ये अश्रुकणा जाता स्ते अनेके भूत्वा ‡: पृथिव्यादि लोकान् 'प्राविशत्' "ततश्च ते अनेके 'रुद्राः' जाताः,

* 'प्रसक्त्वात्परिश्रितिस्त्विति'—इति म.

† का० श्रौ० सू० १८. १. १

‡ 'रुद्रात्मनाः' इति मु.

रोदनाच्च तेषा मुत्पत्तेः रुद्रत्वम्। 'यः' पुनः 'शतशीर्षा रुद्रः' शतशीर्षो रुद्रोऽभूत् 'प्रतिहितायी' स प्रतिहिताय अभिमुखस्थायै प्रजायै भयायै तस्मात् सिञ्चन्नतिष्ठत् ॥ ६ ॥

तस्माद्देवा अबिभीत्वा * प्रजापतिं दृष्ट्वा ततोऽसम्भरणैः शमयितत्प्रदेशं प्राप्य तथैवान् अतिष्ठत्। एतस्माद शतशीर्षरुद्रशमनार्थस्याच्छतशीर्षरुद्रशमनीयं तत्र परोक्षकामत्वाद्देवाः शतरुद्रिय मिति व्याचक्षन्ते। अतो यथैव देवाः शतशीर्षं शतरुद्रं शमयन्तथैवाय मपि यजमान एनं शतरुद्रियहोमलक्षणेनोपायेन शमितवान् भाति ॥ ७ ॥

तथैव होमद्रव्यान्तरम् विधाय प्रशमति — "गवेधुकासक्तुभिरिति। गवधुका आरण्या गोधुमाः तेषां पिष्टैः शतरुद्रियं जुहुयात्। 'सा' प्रजापतिरूपा 'देवता' 'यत्र' यस्मिन् † प्रदेशे 'विस्रस्तामयत' अशयदिति शेतेर्लुङि व्यत्ययेन परस्मैपदशाब्दिकरणे च रूपं, 'ततः' प्रदेशात् गवेधुका जाताः। अतस्तैर्होमसम्पादने स्वभागे तस्यैयार्थप्रदर्शनम्। "स्वेन रसेनेति। स्वकीयेन रसेन येन भागेनैनं प्रीणितवान् भवति। अत्र जर्तिलैर्जुहोति गवेधुकासक्तुभिर्जुहोतीति पृथगेव विहितत्वाद्द्रव्यविकल्पः। अत एवापस्तम्बेन सूचितम्,— "शतरुद्रियं जुहोति जर्तिलयवाग्वा गवीधुकयवाग्वा जर्तिलैर्गवीधुकसक्तुभिः कुसयसर्पिषाजाक्षीरेण मृगोक्षीरेणेति ‡। यत्पुनरुक्तं कात्यायनेन,— "जर्तिलमिश्रान्

* 'अविनीत्वा' इति ख।

† '-देवाभयस्मिन् प्रदेशे' इति क।

‡ आ० श्रौ० सू० १७ ११. ३

गवेधुकामक्तून्" * —इतीति समुच्चयेनैतच्छाखान्तरानुसारेणोक्त मित्यवगन्तव्यम् ॥ ८ ॥

अर्कपर्णेन जुहोत्ययकर्म इत्यनेनैवार्कपर्णहोमसाधनत्वेन विहितम्। पुनरपि प्रकारान्तरेण स्तौति - "अर्कपर्णेनेति। आशयो हृदयदेशः ॥ ९ ॥

अर्कपर्णवदेव परिश्रितोऽपि प्रकारान्तरेण स्तौति—

"परिश्रित्सु जुहोतीति। 'लोमानि' देहे 'परिश्रितः' अयमित परिश्रितोऽग्निं परितः श्रयन्तीति लोमानि 'लोमसु' विषवत्स्वपि लोमसु विष संस्पृष्टेष्वपि बाधाभावात्। अतश्च लोमात्मकेषु परिश्रित्सु होमाद्रुद्रोऽपि न किञ्चनापि वस्तु हिनस्ति। "एतस्यां ह दिश्येतस्येत्यादिकस्याय मर्थः— एतस्य देवस्य रुद्रस्य गृहादुत्तरस्यां दिशि भवन्ति। तस्या दिश्या न हिंस्यात्मकत्वात्। अत एतदुत्तरार्द्धहोमेन स्वस्या मेव (!) दिशि एनं रुद्रं प्रीणाति स्वस्या मेव तेनैवयजतं पृथक् करोति ॥ १० ॥

स वा अग्नीत्याश्च स्वाहा करोतीत्यादिना तिसृष्वपिशीतिषु स्वाहाकारः क्रियत इत्युपरिष्टाद्वक्ष्यते तत्र कस्मिन् प्रदेशे स्वाहाकार इति तत्राह— "स वै जानुदघ्न इति। 'जानुदघ्ने' जानुप्रमाण प्रदेशे सोऽध्वर्युः प्रथमं स्वाहाकरोति। तथा सति देशस्याधोदेशत्वादधस्यानां पृथिवीं प्रविष्टान् रुद्रानेतेन प्रीणाति ॥ ११ ॥

---

* का० श्रौ० सू० १८० (१)

एवं 'नाभिदघ्ने' 'मुखदघ्ने' च । स्वाहाकारेणान्तरिक्षगतान् द्यु-लोकं गतांश्च रुद्रान् प्रीणितवान् भवति । लोकत्रयेऽपि पतिता अश्रु-कणाः सम्भूता रुद्राः समभवन्निति प्रागुक्तम् । अथ या अन्या * इत्यादिना स्वाहाकारस्य हविर्लक्षणान्नप्रदानसाधनत्वेनावस्थानेन होमविधानेन एतान् रुद्राननेन प्रीणितवान् भवतीत्याह— "स्वाहाकारेणेति ॥ १२, १३ ॥

अथ प्रथमानुवाकस्य प्रथमामृचं व्याचष्टे— "नमस्त इति । अस्मिन् प्रजापतौ स प्रागुक्तोऽयमेव 'मन्युर्विततोऽतिष्ठत्' । 'तस्मा' एवैतेन नमस्करोति । यद्यप्यत्र मन्युरेव शतशीर्षा रुद्राः समभवत् इति मन्युरेव रुद्रः समभवदिति मन्युरेव रुद्रः तथापि 'रुद्र'-शब्देनास्य तदाधारत्वेनाभेदात् प्रजापति कथ्यते । 'इषवे बाहुभ्यां नम' इति । तैरेव 'भीषयमाणोऽतिष्ठत्' इति । तेभ्य एव नमस्कारं करोति । मन्युरेव शतशीर्षो रुद्रो भूत्वा इषुणा बाहुभ्यां सर्वेषां भय मुत्पादयामासेति तन्निबन्धन भयपरिहाराय तेभ्यः सर्वेभ्यो नमस्कारः क्रियते ॥ १४ ॥

"स एष रु॰ मित्यादिकस्यायमर्थः— प्रजापते रोदनावसरे 'स' मन्युरूपो यो देवः † शतशीर्षो रुद्रोऽभूत् स एव देवः अस्य 'विप्रुड्भ्यो' ये जाता स्त इतरे 'त्रिशः' ततश्च एता विशः 'तस्मै स्वार्ये' य एव प्रथमोऽनुवाक एतं पुरस्तादुद्धारं भाग मकुर्वन् ।

* 'ग्राम्या' इति ज ।

† 'मन्युरूपशरीरः'- इति ज

तेन च भागेनैकं रुद्रं प्रीणितवन्तः। यथा लोके प्रजा राजभागं प्रदाय प्रीणयन्ति तद्वत्।

अतो यजमानोऽपि तथैव तस्य प्रथमानुवाकलक्षणं भागं कृत्वा तेनैनं तर्पयति। प्रथमानुवाकस्य पुरस्तात् उद्धारः कृतः अत एकदेवत्यः तदेव प्रदर्शितं रौद्र इति ॥ १५ ॥

प्रथमानुवाके षोडश मन्त्राः तत्र चतुर्दश मन्त्रानवयुत्य स्तौति— "चतुर्दशैतानीति। अधिमासेन सह 'त्रयोदशमासाः संवत्सरः प्रजापतिश्चतुर्दशः' चतुर्दशसङ्ख्यापूर्वकः स पुनः प्रजापतिरनन्यात्मकः। ततोऽस्मिन्नपि चतुर्दशः तथा चाग्निर्यत्परिमाणकः अस्य च तादृशोऽपि तत्परिमाणकः तत् परिमाणेनैवाग्निनान्यात्मकं रुद्रं प्रीणाति। चतुर्दशमन्त्रसाध्यहोमलक्षणेनाग्निनान्यात्मकं रुद्रं कार्त्स्न्येन प्रीणातीत्यर्थः। मन्त्रे पौनःपुन्येन नमः शब्दः प्रयुज्यते स च पूजावचनत्वेन यज्ञात्मकः, ततश्च 'नमो नम इति'। अनेन यज्ञरूपेण नमस्कारेणैनं पूजितवान् भवतीत्याह— "नमो नम इति। नमस्यतीति नमोवरिवश्चित्रङ इत्यत्र नमसः पूजायामिति वचनात् पूजायां क्यच् प्रत्ययः। तस्मादर्हति यस्मान्नमः शब्दो यज्ञः तस्मान्नमस्त इत्येतदयज्ञियं न ब्रूयात्। किन्तु 'यज्ञियं' यज्ञकर्माहमेव ब्रूयात् ततश्च एनं रुद्रं 'यज्ञस्त इति' यथा ब्रूयात् नमस्त इत्यपि तद्वदेवोक्तं भवति ॥ १६ ॥

अथ हन्तृभ्यो होमं विधत्ते "अथेति। "नमो हिरण्यबाहव इत्यादिषु मन्त्रेषु प्रतिपाद्या देवता हन्तारः तत्र द्वयोर्द्वयोर्द्व-

तयोः प्रतिपादनात् 'दिशाञ्च पतये नमः' इत्येतद्धिरण्यबाहवे सेनान्य इत्येतयो विशेषणम्। एव मुत्तरत्रापि एकैकस्य विशेषणात् यत् द्वयोर्दैवतयोः * प्रतिपादनं भवति। असुश्चासुश्चेति 'नमो हिरण्यबाहव' इत्यादि हविष्मा निर्देशः, यथा लोके 'असौ त्व' च एष च उभावपि नो 'मा हिंसिष्ट' मिति जनो ब्रूयात् एव मेवायुष्मा असुष्मा इत्यपि नाभिहितं भवति। लोके 'असौ त्वं च एष च नो मा हिंसिष्ट मित्येव' मभिधानस्य प्रयोजनं दर्शयति। 'विदितो' ज्ञातोऽस्य 'आमन्त्रितः' सन् 'ततरां हिनस्ति'। ततश्च प्रक्रान्तेऽपि तद्दैवताभिधानात् रुद्रो हिनस्तीति भावः। ततो मेव हंहितो दर्शयति— "नमो हिरण्यबाहवे" इति। 'एष एव' रुद्र एव 'हिरण्यबाहुः सेनानीः' दिशाम्पतिश्च। अत उक्तो मन्त्रे 'नमो हिरण्यबाहव' इति प्रथमानुवाकः शतशीर्षरुद्रो दैवत्यः। द्वितीयाद्यनुवाका इतररुद्रदेवत्याः। तत्रापि 'यत्किञ्चा-मेकदैवत्यं' तदपि शतशीर्षरुद्रस्यैवत्याह। "यत्किञ्चेति। अत्रापि द्वितीयाद्यनुवाकेष्वपि यत्किञ्चैकदैवत्य मेकवचनान्तमन्त्रसाध्य-होमलक्षणमत्र मस्ति तेनापि एत मेव रुद्रं प्रीणाति। 'तं' तव 'स एष अतं देवः' † 'विश इमे ये इतर' ‡ इति उक्तत्वात्। प्रजाया मपि तं अन्नभाजनं करोति। तस्माल्लोकेऽपि प्रजाया यदन्न मस्ति, तत्रापि क्षत्रिय सम्बन्धो भागो विद्यते। वृक्षेभ्यो हरिकेशेभ्य इत्यादि बहुवचनान्तमन्त्रप्रतिपादिताभ्यो

---

* "द्वयोरेवदैवतयोः"—इति क॰।

†, ‡ पुरस्तान्निर्दिष्ट १५ कण्डी, पृ॰ ५, प॰ ६, १०।

याभ्यो देवताभ्य एतद्धोमं करोति, ताः पृथिव्यादि लोकान् प्रविष्टा विसृष्टेभ्यो जाता अनेका रुद्र देवताः बहुवचनान्तमन्त्र-साध्यो होमोऽपि विसृष्टानां रुद्राणा मित्यर्थः ॥ १७, १८ ॥

इष्टिहोमानन्तरम् 'जातेभ्यो' जुहुयादित्याह— "अर्धेति नमः सभाभ्यः सभापतिभ्य इत्यादि प्रतिपादितानि इष्टिविशेष-भूतान्येव जातानि एतानि खलु जातान्येतद्रुद्राः प्रविविशुः । तत तथैवैतान् प्रीणाति । किञ्चैवं 'एतानि रुद्राणां जातानि' खलु देवताविधानं प्रकार मनुसृत्य मनुष्या भवन्ति । तस्मा-देतानि मनुष्याणा मपि जातानि । अतो मनुष्यजातेभ्यो एव होमे सति देवजातेभ्योऽपि स्यादिति जाते एव तान् रुद्रान् प्रीणाति ॥ १९ ॥

तेषां मन्त्राणां मध्ये केचन उभयतो नमस्काराः, केचनान्य-तरतो नमस्कारा इति । तद्विषये कारण माह— "तेषां वा इति । अन्यत्र सर्वत्र होमे प्रतिमन्त्रद्रव्यप्रक्षेपे स्वाहाकार इत्यत्रापि तथैव प्राप्तावाह ॥ २० ॥

"स वा इति । स सत्र अध्वर्युः मन्त्राणा 'मशीत्यां' सकृत् 'स्वाहा करोति' । 'प्रथमेऽनुवाके च' सकृत् स्वाहा करोति । अथ पुनरशीत्यां तथैवोत्तरस्यामशीत्याञ्च तत्र प्रथमानुवाके षोडश-मन्त्राः । तेषां सर्वेषा मन्ते सकृत् स्वाहाकारः । अथ 'नमो हिरण्यबाहवे' इत्यारभ्य 'अर्भकेभ्यो नमः'* इत्यन्त मेका अशीतिः सम्पद्यते । एकैकस्यां कण्डिकाया मष्टावष्टौ मन्त्राः । 'दिशां च

* वा० सं० १६. १७—२६

पतये नमः' इत्यादिकं विशेषणतया सम्बन्धनीय मिति प्रागेवोक्तम् *। तथा च दशसु कण्डिकासु मन्त्राणा मशीतिः सम्पद्यते 'नम स्तक्षभ्य' इत्यारभ्य 'सुधन्वने'† चेत्यन्तं एका ऽशीतिः सम्पद्यते। पुन 'र्नमः स्रुत्याय' इत्यारभ्य 'धनुष्कृद्भ्यश्च वो नम'‡ इत्येत मेका ऽशीतिः सम्पद्यते। एतस्या अशीत्या ऊर्ध्वं अवदानमन्त्रेभ्यः पूर्वाणि च यजूंषि सन्ति। एतद्द्वोत्तरत्र विनियोगाय प्रतिनिर्देष्टुं निर्दिष्टं 'अशाशीत्या च स्वाहा करोति', यानि 'चोर्ध्वानि' चेति यदुभय निर्दिष्टं तत्राशीतिः प्रशंसति— "अन्न मशीतय इति अशीति शब्दः अशिधातुः स्मरणादन्नत्वयर्थतमास्तीतिषु स्वाहाकारे अन्नेनैवैतान् रुद्रान् प्रीणाति ॥ २१ ॥

अथ यानि चेति निर्दिष्टानां विनियोग माह— "अथैतानीति। "एतद्धास्येत्यादिकस्याय मर्थः— 'यथा प्रियः पुत्रो वा हृदयं वा' 'प्रतिज्ञातमं' अभिमतं 'धाम' स्थानं तद्वदेतत् मन्त्रचतुष्टय मपि 'प्रियं धाम तस्मात्वैतन्मा द्देयाच्छ्रुत' शक्तितो भवति तवैताभि र्व्याहृतिभि र्जुहुयात्। तथा चैतस्य रुद्रस्य प्रियं धामैव प्राप्नोतीति स देव पश्चादेनं न हिनस्तीति ॥ २२ ॥

मन्त्रान् क्रमेण व्याचष्टे— "नमो वः किरिकेभ्य इति § एते हि रुद्रा इदं सर्व मपि जगत् कुर्व्वन्ति। एतेषां प्रजापत्यमुकाक-

---

* इहैव पुरस्तात् १८ कण्डी, पृ० ६, पं० १०।

† वा० सं० १६. २७—३६।

‡ वा० सं० १६. ३७ – ४६ क।

§ वा० सं० १६. ४६ ख।

नियन्तृत्वेन प्रजापत्यात्मकत्वात्। अत एते 'किरिका:' कर्त्तार: जनस्तादृशेभ्यो वो नमोऽस्त्विति मन्त्रार्थ:। "अग्निर्वायुरिति। 'अग्निर्वायुरादित्य' इत्येतानि 'देवानां हृदयानि' यथा हृदयं प्रधानं तद्वदेतेऽपि प्रधानानीत्यर्थ:। अतस्तदात्मकेभ्यो रुद्रेभ्यो नम इत्यर्थ:। अत्राग्निर्वायुरादित्यप्रकाशकमन्त्रसाहित्येनैतेषां मन्त्राणां व्याहृतिशब्देनाभिधानं; किञ्चाग्निवायुसूर्यादेवानां हृदयानीति तत् प्रकाशकाना मपि मन्त्राणां हृदयत्वं तन्मा-त्रदभिप्रायेण 'एतद्वास्य प्रतिष्ठानतमं धाम वा' यथा प्रियो वा पुत्रो हृदयं इत्युक्तं * विचिन्वन्त एव विचिन्वत्का:; एते हि रुद्रा इदं सर्वं विचिन्वंत्यध्यवसायार्थम्। अतस्तत् परिहाराय तेभ्यो नम इत्याह। विक्षिणवन्त एव विक्षिणत्का: एते रुद्रा यं विनाशं कर्तुं मिच्छन्ति तं विक्षिणवन्ति। अतश्च तेभ्यो नम इत्याहार्त्तिजय इत्यस्य व्यत्ययेन चाप्रत्यये रूपम्। "एतहीति। 'एते' हि रुद्रा एभ्य:' पृथिव्यादिलोकेभ्यो 'निहृता' निगता:। तत्र विनाशेभ्योऽमुक्तेभ्य अत 'आनिहतेभ्यो' रुद्रेभ्यो नम इत्याह॥ २३॥

व्याहृतिजपानन्तर एव सुत्तराणि यजूंषि जपेदित्याह "अथेति। तत्र प्रथमं मन्त्रं व्याचष्टे—"एष वा इति। 'यं' जनं 'दिद्रापयिषति' कुत्सितं कर्तु मिच्छति। तं तथा करोति †। अतएव 'एष' रुद्रो द्रापे 'अन्ध:' शब्देन सोमलक्षण मन्नं विवक्षित मित्याह.

* पुरस्तात् इहैव २२ कण्डौ, पृ० ७, पं० १५।

† 'तं तथैव करोति'—इति भ०।

— "सोमस्येति । 'दरिद्रनीललोहितेति' एताभ्यतस्य रुद्रस्य 'नामानि च रूपाणि' च भवन्तीति । तस्य नाम गृहीत्वैवेनं रुद्रं प्रीणितवान् भवतीत्याह 'दरिद्रेति' । 'आसां प्रजाना मेषां पशूनाम्' मित्येव भागस्तु स्पष्टार्थं इत्याह । "यथैवेति । अथ-ज्ञानरुद्ररूपविशं शतशीर्षरुद्ररूपाय अन्नाय प्रथमानुवाकम् । पुरस्तादुद्धारमुदहरन् 'अथ द्रापे ऽन्धस मस्पत' * इत्येव मनुवाक मुपरिष्टादुद्धार मुद्धृत्य त मप्रीणात् । तथैव यजमानोऽप्यस्मदनुवाक-जपेन कृतवान् भवतीत्याह ॥ २४ ॥

"स एष इत्यादिना । यतोऽस्य रुद्रस्यैकोऽनुवाक उद्धारः कृतः तस्मात् स रुद्रैकदेवत्य इत्याह— "तस्मादिति । एतस्मिन्ननुवाके यजुर्गता सप्तत्वसङ्ख्याकास्त्वेन हविर्हेतु भवतीत्याह ॥ २५ ॥

"सप्तैतानीति । 'सप्तचितिकोऽग्निः' इत्यनेनैकेन प्रकारेणाग्नेः सप्तत्वसङ्ख्या सम्बन्ध उक्तः । 'सप्त ऋतवः संवत्सरः संवत्सरो ऽग्निः' इत्यनेन प्रकारेण सप्तत्वसङ्ख्यायोगित्वं प्रदर्श्यते । अधि-मासापेक्षया संवत्सरे सप्त ऋतवो भवन्ति । प्रथमानुवाके एत-स्मिन्ननुवाके च मिलिताया यजुःसङ्ख्यामित्यपोदाम्नौ प्रशं-सति ;— "तान्युभयानीति । चतुर्दशैतानि यजूंषि भवन्तीति । तत्रोक्तत्वात्तानि चतुर्दश अन्यानि सप्त च मिलित्वा उभया-न्यपि एकविंशतिः सम्पद्यन्ते । सा चैकविंशति सङ्ख्या 'द्वादश मासाः पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविंश' इति ।

* वा० सं० १६. ४७।

र्यथा सञ्ज्ञासम्पत्तिस्ता अभिलक्ष्य भवति, तथाविधा सञ्ज्ञासम्पत्तिरत्र सम्पादिता भवतीत्यर्थः ॥ २६ ॥

अथावतानाख्यान् होमान् कुर्यादित्याह *,— "अथेति। सहस्राणि सहस्रश इत्यादि मन्त्रसाध्या होमा अवतानाः; तेषाश्चवतान्यन्त अवरोहन्ते धनूंष्येभिरित्युपविंश इति तत् सञ्ज्ञा। तेषा मुक्त होमे वार्थं प्रयोजनतया दर्शयति—"एतद्वा धनूंष्यवातन्वन्ति आरोपितानि धनूंष्यवरोपितवन्त इत्यर्थः। न ह्यवततेत्यनेनावरोपणस्य प्रयोजनं दर्शितम् ॥ २७ ॥

मन्त्रेषु सहस्रयोजनशब्दादग्निहोमेन पदप्रयोगात् परमे दूरे † धनुषा मवरोपणं कृतं भवतीत्याह— तद्वा इति। "अथाग्निः सह प्रयोजनत्वादग्नि होमेन ‡ः सहस्रयोजन एव धनुषा मवरोपणं सम्पादितवान् भवतीत्याह ॥ २८ ॥

"यद्दवति। अयमग्निः सहस्रयोजन इत्यनद्देवोपपाद्यते। न ह्येतस्मिन् एतद्दातिरिक्त मन्यत् किञ्चिदपि च पुपरसाधकं नास्ति (?)। तस्याग्नेः प्राधान्यात्मकत्वेन सर्वाधिकत्वात्। अतयाग्ने सहस्रयोजनत्वेन तत्र होमे सहस्रयोजन एव धनुषा मवरोपणं सम्पादितवान् भवति ॥ २९ ॥

अन्य 'धर्मस्याता सहस्राणि। अस्मिन् महत्यर्णव

---

* "अथावतानाख्यान् होमा अवतानाः। तेषाश्चवतन्यन्ते अनु कुर्यादित्याह"—इति भ, ज।

† 'परमे धूर धनुषा मवरोपणं कृतं भवतीत्याह'—इति भ, ज।

‡ 'सहस्राख्यौ होमेन' इति ज

इत्येतत् पदप्रयोगस्याभिप्रायमाह— "असङ्ख्याता इति । 'यत्र यत्र' स्थाने एते भवन्ति तत्र तत्रैव तेषा मेतेन धनुषावरोपयति । 'अर्णव:' शब्देन पृथिव्यादयो लोका विवक्ष्यन्ते । तस्य च महतीत्यनेन कार्त्स्न्यं विवक्ष्यते । एवं च पृथिव्यादिलोकेषु सर्वत्र 'असङ्ख्याता सहस्राणि' अपरिमित सहस्रसङ्ख्याका एते रुद्रा अवतिष्ठन्ते । तेषां सर्वेषा मेत धनुषा अवरोपणं सिध्यतीति ॥ ३० ॥

उक्तानां विकृतानामवतानानां होमानां सङ्ख्याविशेषं विधाय प्रशंसति— "दशैतानवतानान् जुहोतीति । 'विराडग्निरिति षष्टिश्च त्रीणि च शतानि यजुष्मत्य इष्टका उपधीयन्ते । ताश्च षड्विंशद्दशकानि भवन्ति । अतश्चैवं दशसङ्ख्यायोगादग्नि विराड् ऊर्ध्वाधो दिग्भ्यां सह * दिशां दशत्वम् । अग्निस्तु दिगात्मकत्वं सर्वदिग् व्यापकत्वात् मुखे सप्त प्राणा:, अधो पायूपस्थौ द्वौ नाभिर्दशम इति 'दश प्राणा:' । प्राणानाञ्च सूत्रात्मकत्वादग्नि: प्राणात्मक: एवञ्च सत्यवतानां दशत्वसाम्यात्मकानां रुद्राणां यावत्परिमाणं तावतैवैतानि धनूंष्यवरोपयति । साकल्येन सर्वेषां चतुरवरोपणं कृतं भवतीति भाव: ॥ ३१ ॥

अवतानहोमानन्तरं प्रत्यवरोहान् जुहुयात् इत्याह— "अथेति 'नमोऽस्तु रुद्रेभ्य' † इत्यादि मन्त्रसाध्याहोमा: प्रत्य-

* 'ऊर्ध्वाधो दिग्भि: सह' इति भ. स.
† वा० सं० १६. ६४—६

वरोहा:, तान् कुर्यादित्यर्थ:। तेषा मुपयोग माह,— "एतद्वा इति। एतस्मिन् काले खलु एतेन होमेन 'इमान्' पृथिव्यादीन् 'लोकानित' 'जर्ध्वो' भूत्वा 'रोहति' 'स' यजमान: 'एतद्वा इत्यनेन बुद्धिस्थ: काल परामृश्यते * एव, इति च शान्त्यादि-प्रमाणेषु हुतो होम: अतश्च 'स रोह: पराङिव' भवति। तदा-रोहन्नमाना पृथक्तया तयोर्देवैर्मेव भवतीत्यर्थ:। अतश्च 'देवा:' अस्या पृथिव्या: प्रतिष्ठात्मकत्वात् 'इमां प्रतिष्ठा:' प्रत्यागतवन्त:। अथो यथैव देवा: प्रत्यागतवन्त: तथैवायं यजमानोऽप्यनेन प्रत्य-वरोहहोमेनेत्यां प्रतिष्ठात्मिकां पृथिवीं प्रत्येति, प्रकारान्तरेण प्रत्यवरोहान् प्रशंसति॥ ३२ ॥

"यद्वेवेति। एतस्मिन् खलु काले एतेन शान्त्यादिषु प्रमा-णेषु हुतेन होमेन 'एतत्' रुद्रान् 'प्रीणन्' अनुगच्छति यज-मान:। अथचैतेन प्रत्यवरोहणेन त एव रुद्रेभ्य 'आत्मनं' जीवनार्थे पृथक् करोति। तथा सत्यनेनेदानीं क्रियमाणेन 'एवात्मना' शरीरेण 'सर्व मायुरेति'॥ ३३ ॥

अथ पुनरपि केनचित्प्रकारेण तानेव स्तौति— "यद्वेवेति। पूर्वं शान्त्यादिप्रमाणेषु हुतेन होमेन 'इत जर्ध्वान् रुद्रान् प्रीणाति'। पूर्वं पृथिव्यादि लोकत्रयानुप्रविष्टान् रुद्रान् पृथिवी मारभ्य द्युलोकपर्यन्तं प्रीणाति। इदानीं द्युलोक मारभ्य पृथिवीपर्यन्तं प्रीणातीत्यर्थ:। अतएव सूत्र प्रतिलोमं "प्रत्य-

* 'बुद्धिस्थ: काल: परामृश्यते' इति ज।

वरोहान् जुहोति" * इत्युक्तम् । प्रतिलोम्यञ्च प्रथमं मुखप्रमाणे पश्चाज्जानुप्रमाणे † होमः ॥ २४ ॥

अथ प्रत्यवरोहान् प्रदर्शन् व्याचष्टे— "नमोऽस्त्वित्यादिना । 'नमोऽस्तु रुद्रेभ्यो ये दिवीति', ‡ अनेन द्युलोकस्थेभ्यो रुद्रेभ्यो नमस्कारः कृतो भवति । तत्रत्याश्च रुद्रायं हिंसितुं मं 'वर्षेण हिंसन्ति' । अतश्च 'तेषां वो वयं खलु अत उक्तं मन्त्रे,— 'येषां वर्षमिषव इति' । तेभ्यो दश प्राचीरित्यादिकं तु मन्त्रभागत्रयाणा मपि समा इत्युत्तरत्र सकृदेव व्याख्यास्यत इति ॥ २५ ॥

द्वितीयं मन्त्रं व्याचष्टे – "नमोऽस्तु रुद्रेभ्यो ये ऽन्तरिक्ष ऽइति §। स्पष्टार्थ इति ॥ २६ ॥

अन्यत् मन्त्रत्रय साधारणम् ‖ ॥ २७ ॥

"तेभ्यो दशेत्यादिके मन्त्रेऽपि पौनः पुन्येन 'दश'-शब्द प्रयोगस्याभिमाह— "दशदशेति । 'दशाक्षरा विराडि'-त्यस्तु प्रागेव व्याख्यातम् ¶ पूर्वदश प्राचीर्दश दक्षिणेत्यादौ सङ्ख्येयम् दिग्विशेषं च पर्यालोच्य सङ्ख्या मात्र मुपजीव्य प्रशंसति ॥ २८ ॥

---

* का० श्रौ० सू० १८. १. ५ ।

† 'प्रतिलोम्यञ्च प्रथमं मुखमात्रे ततो नाभिमात्रे पुनर्जानुमात्र ऽइति ।' का० श्रौ० सू० १८. १. ६ ।

‡ वा० सं० १६. ६४ । § वा० सं० १६. ६५ ।

‖ वा० सं० १६. ५६ ।

¶ "दशाक्षरा वै विराट् -इति पुरस्तात् १ का० १ अ० १ ब्रा० २२ कण्डौ द्रष्टव्यम्

"इदानीं तत् सर्व मुपजीव्य प्रशंसति— "यद्देवाहेति। पुरोक्तं कारदय मञ्जलिरित्युच्यते। तस्य 'वा ऽञ्जलेरङ्गुलयो दश' भवन्ति। प्रत्येकं हस्तयो: पञ्चाङ्गुलीनां भावात्। तथा च सति प्राचीरित्यादिना मन्त्रभागेन तेभ्यो 'ञ्जलिं' करोति *। होमावसरे तेभ्यो दश प्राचीरित्यादिना मन्त्रभागेन तेभ्यो रुद्रेभ्य: प्राणादि मुख्यादय: दशाङ्गुलय: इत इत्यस्यार्थस्य प्रतिपादनात् प्रतिदिश्यवेभ्यो रुद्रेभ्यो ञ्जलिं करोति। होमावसरे तेभ्यो दशप्राचीरित्यादि मन्त्रभागकथनेनैव तत्र तत्र दिशि वर्त्तमानेभ्यो रुद्रेभ्यो ऽञ्जलिं कृतवान् भवतीत्यर्थ:। "तस्मादु हैतद् इत्यञ्जलिकरणस्य कारणम् प्रदर्श्यते। 'तस्माद्भीत: सर्वतेनाञ्जलिं करोतीति अथवा यस्त व्याख्यानम्। यतोऽसौ यजमानाध्वर्यु: सुखेन रुद्रेभ्यो भीत: सन् कृतवान्। तस्मादेतस्मिन् लोकेऽपि जन: भीतो ऽञ्जलिं करोतीति। "तेभ्यो नमो ऽस्त्वित्याद्यवशिष्टमोचभागप्रयोगस्योपयोग माह,— "तेभ्यो नम इत्यादिना। 'त एवेति'; त एव रुद्रा 'अस्मै' यजमानाय 'मृडयन्ति' सुखयन्ति। असौ यजमानोऽयमेव. पुरुषं 'द्वेष्टि', यो वैनं यजमानं द्वेष्टि 'त मेषां' रुद्राणां 'जम्भे' मुखे निदधातीत्यर्थ:। त मेषां जम्भे दध्म इत्यत्र तमित्यस्य स्थाने अमु मिति प्रयुञ्ज्यादिति कल्पविस्मतं पूर्वपचयितु माह— "अमु मेषा मिति। यं पुरुषं द्विषन्ति तम्। 'अमु मेषां जम्भे दध्म:' इति ब्रूयात्। अमु मिति तन्नामनिर्देश:।

* "पुत्राकर्मत प्रसृत्य प्राञ्चो देवान् पुञ्जयन्ति"—निरु० ७. ७. ४।

ततश्च तस्मिन् ह्रियमाणेषु युगनं किञ्चिदप्यस्ति म्रियतेत्यर्थः।
उत्पन्नमस्तं मतं निराचष्टे ; अपीति तदुक्तं मत नाद्रियेते-
त्यपि कथं तस्य वध्यस्य निर्देश: सेत्स्यतीति तत्राह स्वय मिति
यं पुरुषं एवं यं हिंस इति विद्विष्टि स स्वय मेव निर्दिष्टो
भवति। नामधेयग्रहणं तन्निर्देशमिथ्यर्थं भवति स च निर्देशो यं
द्विष्मो यश्च नो द्वेष्टि त मेषा मित्यभिधानादेव मिद इति तथा
न कुर्यादित्यर्थः॥ ३९॥

अथ प्रत्यवरोहान् जुहोतीति सामान्येन विधानात्
सङ्ख्याविशेषं पर्यवमान मभिधत्ते। "त्रिष्कृत्व इति। सा
चैव सङ्ख्या रुद्राणां साकल्येन हविर्हतु भवतीत्याह,— "त्रिवृ-
दिति। अन्येषु त्रिवृदिति अन्यत्र 'त्रिवृत्' प्रकार:, एककाण्डे
ऽभिहित: *। 'अग्नियावान् अस्य च माता' यावती तावतैवैता
नेतदवनन्त्यात्मकान् रुद्रान् प्रीणितवान् भवति। तस्मात्
स्वाहाकारान्तप्रदानमाधनत्वादवरूपेण प्रशंसति, स्वाहाकारं-
यन्ति। आरोहणां प्रत्यवरोहणाश्च मिलिता सङ्ख्यां प्रशंसति।
त्रिवित इति जाग्वादि मुखान्तेषु त्रिषु प्रमाणेषु होमकरणा-
दित अर्द्धं त्रिःकृत्वो रोहत्विति पुनश्च त्रिःकृत्व: प्रत्यवरोहति
तथा सति षट्सङ्ख्या सम्पद्यते। तस्याश्च ब्राह्मणम् 'षड्वा ऋतव:'
इत्यादिना प्राशंसोक्त † मित्यर्थ:॥ ४०॥

प्रकारान्तरेणापि त्रित्व सङ्ख्या मुपपादयति— "यद्देवेति।

* इहैव ६ का० ३ अ० १ ब्रा० २५ कण्डौ।

† इहैव पुरस्तात् ४ का० ५ अ० ५ ब्रा० १० कण्डौ।

'चिःप्रस्त' उर्ह मारोहणवता तदनुसारेण त्रिःप्रस्ता एव प्रत्य-वरोहणं प्राप्तं भवति। उपपन्नं चैतत्, मोचेभ्यातिरेकपातः, यद्येवं, किं तत इति चेत्, मैमप्ययनस्येवापर्याप्तस्यानतिरेके-णाभिप्रायेण पूर्वं मवस्थानं न सुलभ मिति। आरोह सहशानु-सारेणैव प्रत्यवरोहेत् सुलभ मितिचैव सङ्क्षेपेर्णितार्थः ॥ ४१ ॥

तत्र होमानन्तरं तद्धोमसाधन 'मर्कपर्णं चात्वाले' प्रक्षिप-दित्याह— "चर्पेति। चात्वालप्रक्षेपस्य कारण माह— "एतद्वा इति। एतस्मिन् काले खलु 'एतेनार्कपर्णेनैतद्रौद्रं कर्म करोति'। अतश्च 'एतद्' पर्णं 'सशान्तं' भवति। तदिदं सशान्तं पर्णं कश्चिदपि नाभितिष्ठेत्। तच्च न किमपि हिंसिष्यति। तदेतत् पर्णं ततः करोति व्यवहितं करोति। चात्वालस्य गर्तत्वादित्यर्थः। अथ पुनरपि तत्रैव प्रक्षेप मुप-पादयति। "यद्वेति। चात्वालमाम्याधिचात्वेनाग्नि तत्र प्रक्षिप्तं तदर्कपर्णं 'एव' चात्वालवर्योऽग्निः 'सन्दहति' सम्यग् दहति ॥ ४२ ॥

इत्थं शतरुद्रिय होम मभिधायेदानीं तस्य सम्पत्त्यभिधानं प्रतिजानीते। [अथातः सम्पदेवेन सम्पत् सम्पत्तिः केनचित् प्रका-रेण साहश्य सम्पादनम्] *। यतः कारणात् कर्मानुष्ठानावसरे सम्पत्तिरनुसन्धातव्या। अतः कारणात् तां सम्पदेवाभिधानस्य इत्यर्थः। एवकारेणात्र होमकरणप्रकारस्य कारणैन विधानं सूचितं सम्पदेव प्रदर्श्यते, न पुनर्होमकरण प्रकारः। तस्य

* बन्धनीचित्ययान्तः प्रदर्शिनः पाठो ख-पुस्तकमात्रे चाधिकः।

सर्वस्याभिवितत्वादिति । ता सैव सम्पत्तिः प्रश्नोत्तराभ्यां दर्शयति— "तदाहु इत्यादिना । तत् तत्र शतरुद्रियविषये 'कस्य' यजमानस्य एतच्छतरुद्रियं कथं संवत्सरात्मक मग्निं प्राप्नोति'। 'कथं च तेन 'सम्पश्यते' सदृशो भवतीत्याहु र्याज्ञिकाः। एतस्योत्तरं 'षष्टिश्च ह वा' इत्यादि। एतच्छतरुद्रियं षष्ट्युत्तराणि त्रीणि शतानि यजूंषि। पञ्चत्रिंशत् ततः पञ्चत्रिंशदिति। तत्र यावन्ति यानि षष्ट्युत्तराणि त्रीणि च शतानि संवत्सरस्याहान्यपि तावन्ति सम्भवन्ति। ततस्तैः संवत्सरस्याहानि प्राप्नोति। 'अथ यानि त्रिंशत्' यजूंषि मासरात्रीणा मपि त्रिंशत्वात् रात्रीः प्राप्नोति। एवं सति समस्तस्य सर्वस्य संवत्सरत्वावात् तत्संवत्सरात्मकत्वात् उभयात् संवत्सरस्याम्याहोरात्राण्याप्नोति। अथावशिष्टानि यानि पञ्चविंशद्वियन्ते तानि त्रयोदशो मासः स चाधिको मासः संवत्सरस्यात्मा मध्योभागः द्वे यजूंषी पादौ प्रतिष्ठाशब्देन पादावुच्येते पुनर्द्वे यजुषो प्राणा इन्द्रियाणि यद्यपि ते प्राणा बहव स्तथापि यानि* पञ्चविंशद्विनाधिक † मासस्य संवत्सरान्तःपातित्व मभिदधत् तन्मासात्मकेन पञ्चविंशता संवत्सरः करचरणादि-विशिष्ट पुरुषकारतया प्रदर्श्यते। "एतावानिति। एतत् प्रमा-णकः खलु संवत्सरः। एवं च सति संवत्सरे यावती सङ्ख्यास्ति शतरुद्रियेऽपि तावती सङ्ख्या विद्यत इति सङ्ख्याद्वारा 'शतरुद्रियं संवत्सर मग्नि माप्नोति' तेन च सदृशो भवति। "एतावत्य

* 'यामि' '।--इति क, भ ग।

† 'पञ्चविंशाहिनविंशतिनाधिक०'--इति ग

उभया इत्यादिकस्यायमर्थः — 'शाण्डिले' शाण्डिल्यदृष्टेऽस्मिन् 'अग्नौ' (चित्ये) 'मध्यतो' मध्यप्रदेशे एतावत्यः षष्ठ्युत्तरशतत्रय-संख्याका इष्टका मन्त्रवत्य उपधीयन्ते। इयं च परिगणनो-त्तरस्मिन् काण्डे विधास्यते। इष्टकानामन्यावयवत्वात् पृथगेवा-ऽन्वयः। एवञ्च सति संख्यासामान्यात् शतरुद्रियेष्टकारूपा-ऽन्वयः पृथगेवाहुता भवन्तीति ॥ ४१ ॥

अथ प्रकारान्तरेणापि शतरुद्रियस्य सम्पत्तिः प्रशंसनाभ्या-माह — "तदाहु इत्यादिना। 'महदुक्थमिति' प्रयुक्तावत्तमाह-व्यपदेशं (१) * शस्त्रान्तेनानुशंसनीयं स्तोत्रं पक्ष्याकारं भवति। तच्च पञ्चविंशस्तोम आत्माभागः अतस्त्वत्रापि अशीतीना मभितोऽविद्य सामानि यानि (१ तानि) पञ्चविंशति यजूंषि तान्येव महदुक्थं पञ्चविंश स्तोमात्मक आत्मभागः। यद्यप्यत्र पक्ष्याकारता स्तो-त्रस्यैवेति आत्मभाग इत्यपि तथैव तथापि तदनुशंसनात्मकं शस्त्रं मदेनोच्यते। यथात्मा भवति तथैव शिरः पक्षपुच्छा-न्युक्तानि भवन्ति। आत्मभागादेव तेषां सर्वेषामुत्पत्तेः आत्मभागे तानि सर्वाण्यन्तर्भूतानि। आत्मभागसम्पादना † देव शिरः प्रभृतीन्यपि संगृहीतानि भवन्तीत्यर्थः। अथातः शतरुद्रिये या अशीतयो भवन्ति ताभि र्महदुक्थस्याशीतिभि-राख्याता, तत् सम्बन्धिनीना मशीतीना माप्ति र्भवति।

अथ शतरुद्रिये अशीतिभ्यो यदेवोर्ध्वं मन्त्र जातमस्ति

---

* "महदुक्थं बृहस्पति महत्त्व व्यपदेशं" इति ज।

† 'आत्मभागोऽयं यत्नः' इति भ, ग।

महदुक्थस्याग्नीनिभ्य अर्हं यथो यदेव महत आप्तं तदेव भवति । तेन तस्य इत्यर्थः,— एद इति महदुक्थात् परं महत आप्तं पुरिस्तं परामृश्यते । एव मुक्त प्रकारेण शतरुद्रिये विद्यमा- नेन तेन तेन भागेन महति उक्थे विद्यमानस्य तस्य तस्य भागस्याप्तिः शतरुद्रियं महदुक्थ प्राप्नोति तथा महतोक्थेन सम्पद्यते ॥ ४४ ॥ १ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे प्रथमेऽध्याये प्रथमं ब्राह्मणम् ॥

॥ अथ द्वितीयं ब्राह्मणम् ॥

अथैनमतः परिषिञ्चति । एतद्वा ऽएनं देवाः शतरुद्रियेण शमयित्वाथैनमेतद्भूय एवाशमयंस्तथैवैनमयमेतच्छतरुद्रियेण शमयित्वाथैनमेतद्भूय एव शमयति ॥ १ ॥

अद्भिः परिषिञ्चति । शान्तिर्वा ऽआपः शमयत्येवैनमेतत् सर्व्वतः परिषिञ्चति सर्व्वत एवैनमेतच्छमयति त्रिष्कृत्वः परिषिञ्चति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्छमयति ॥ २ ॥

यद्वेवैनं परिषिञ्चति । इमे वै लोका एषो ऽग्निरिमांस्तल्लोकानद्भिः परितनोति समुद्रेण हैनांस्तत् परितनोति सर्व्वतस्तस्मादिमांल्लोकान्सर्व्वतः समुद्रः पर्य्येति दक्षिणावृत्तस्मादिमांल्लोकान् दक्षिणावृत् समुद्रः पर्य्येति ॥ ३ ॥

अग्नीत्परिषिञ्चति । अग्निरेष यदाग्नीध्रो नो वा ऽआत्मात्मानꣳ हिनस्त्यहिꣳसाया ऽअप्रमत्तो ऽध्य-

स्मनो ह्यापः प्रभवन्ति निकक्षान्निकक्षाद्ध्यापः प्र-भवन्ति दक्षिणान्निकक्षाद्दक्षिणाद्धि निकक्षादापः प्रभवन्ति * ॥ ४ ॥

अश्मन्नूर्जं पर्व्वते शिश्रियाणा मिति + । अश्मनि वा ऽएषोर्क् पर्व्वतेषु श्रिता यदापोऽद्भ्य ओषधीभ्यो व्वनस्पतिभ्यो ऽध्यधि सम्भृतं पय इत्येतस्माद्वा ऽएतत् सर्व्वस्मादधि सम्भृतं पयस्तां न इषमूर्जं धत्त मरुतः संरराणा इति मरुतो वै व्वर्षस्येशते ऽस्मंस्त ऊदिति निदधाति तदश्मनि ऊर्जं दधाति तस्मादश्मनादो ऽथो स्थिरो वा ऽअश्मा स्थिरा ऊर्क् स्थिर ऽएव तत् स्थिरं दधाति मयि त ऽऊर्गित्यपादत्त तदात्मन्नूर्जं धत्त तथा द्वितीयं तथा तृतीयम् ॥ ५ ॥

निधायोदहरणं त्रिर्व्विपल्ययते । एतद्वा ऽएन मेतन्नघ्यतीव यदेनत् समन्तं पर्य्येति तस्मा ऽएवै-तन्निह्नुते ऽहिंसायै ॥ ६ ॥

यद्वेव व्विपल्ययते । एतद्वा ऽएन मेतदन्ववेति

* 'प्रभवन्ति' इति ख
+ 'मिति'- इति ख

तत एवैतदात्मानमपोद्धरति जीवायै तथो हानेना-त्मना सर्वमायुरेति ॥ ७ ॥

त्रिर्व्विपल्ययते । त्रिर्हि कृत्वः पर्य्येति तद्यावत्कृत्वः पर्य्येति तावत्कृत्वो व्विपल्ययते * ॥ ८ ॥

अथ तमश्मानमुद्धरणा ऽऽधाय । एतां दिशꣳ हरन्त्येषा वै नैर्ऋती दिङ्नैर्ऋत्यामेव तद्दिशि शुचं दधाति ॥ ९ ॥

एतद्वा ऽएनं देवाः । शतरुद्रियेण चाग्निश्च शमयित्वाथाथ्यैतेन शुचं पाप्मानमपाघ्नंस्तथैवैनमयमेतच्छतरुद्रियेण चाग्निश्च शमयित्वाथास्यैतेन शुचं पाप्मानमपहन्ति ॥ १० ॥

बाह्येनाग्निꣳ हरति । इमे वै लोका ऽएषो ऽग्निरेभ्यस्तल्लोकेभ्यो बहिर्धा शुचं दधाति बहिर्व्वेदीयं वै वेदिरस्यै तद्बहिर्धा शुचं दधाति † ॥ ११ ॥

स व्वै दक्षिणायाꣳ श्रोणौ । प्राङ् तिष्ठन्

* 'व्विपल्ययते' इति क, ख ।

† 'दधाति' इति क ।

दक्षिणा निरस्यति यं द्विष्यात्तं ते शुगृच्छत्विति यमेव द्वेष्टि तमस्य शुगृच्छत्यमुं ते शुगृच्छत्विति वा ब्रूयाद्यं द्विष्यात्ततो वा तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो ह्येव स यमेवंविद्द्वेष्टि यदि न भिद्येत भेत्तवै ब्रूयाद्यदा ह्येव स भिद्यतेऽथ तꣳ शुगृच्छति यं ह्यप्रतीक्ष मायन्त्यप्रतीक्ष मेव तच्छुचं पाप्मानं जहति * ॥ १२ ॥

प्रत्येत्येष्टका धेनूः कुरुते । एतद्वा ऽएनं देवाः शतरुद्रियेण चाग्निꣳ शमयित्वा शुच मस्य पाप्मान मपहत्य प्रत्येत्येष्टका धेनूरकुर्वत तथैवैन मय मेत-च्छतरुद्रियेण चाग्निꣳ शमयित्वा शुच मस्य पाप्मान मपहत्य प्रत्येत्येष्टका धेनूः कुरुते ॥ १३ ॥

आसीनः कुर्वीतेत्यु हैक ऽआहुः । आसीनो वै धेनुं दोग्धीति तिष्ठꣳस्त्वेव कुर्वीतेमे वै लोका एषो ऽग्निस्तिष्ठन्तीव वा ऽइमे लोका अथो तिष्ठन्वै वीर्य्यवत्तरः ॥ १४ ॥

* 'जुहोति' (?) - इति क ।

उदङ् प्राङ् तिष्ठन्। पुरस्ताद्वा ऽएषा प्रतीची यजमानं धेनुरुपतिष्ठते दक्षिणतो वै प्रतीचीं धेनुं तिष्ठन्तीमुपसीदन्ति ॥ १५ ॥

स यत्राभ्याप्नोति। तदभिमृश्यैतद्यजुर्जपतीमा मे ऽग्न ऽइष्टका धेनवः सन्त्वित्यग्निर्वैतासां धेनुकरणस्येष्टे तस्मादेतावतीनां देवतानामग्निमेवामन्त्रयत ऽएका च दश चान्तश्च परार्धश्चेत्येष वाव-यावर्धो भूमा यदेका च दश चाथ हैष परार्धो भूमा यदन्तश्च परार्धश्चावरार्धतश्चैवैना एतत् परार्धतश्च परिगृह्य देवा धेनूरकुर्वत तथैवैना अयमेतदवरार्धतश्चैव परार्धतश्च परिगृह्य धेनूः कुरुते तस्मादपि नाद्रियेत बह्वीः कर्तुं मनुष्या ऽएष एता ब्रह्मणा यजुषा बह्वीः कुरुते ऽथ यत् सन्तनोति कामानेव तत् सन्तनोति ॥ १६ ॥

यदेवेष्टका धेनूः कुरुते*। व्याम्ना ऽस्य सम्मि-व्यांषा हि चितः स यदाहैका च दश चान्तश्च

* 'कुर्वते' इति ग. म।

परार्द्धश्चेति व्याम्या ऽएका व्यामदश व्यागन्तो वाक्-परार्द्धो व्याम मेव तद्देवा धेनु मकुर्व्वत तथैवैतद्यजमानो व्याम मेव धेनुं कुरुते ऽथ यत् सन्तनोति व्याम मेव तत् सन्तनोत्येता मे ऽग्न ऽइष्टका धेनवः सन्त्व मुत्रा मुष्मिँल्लोक ऽइत्येतद्वा ऽएना ऽअस्मिँल्लोके धेनूः कुरुते ऽथैना ऽएतद मुष्मिँल्लोके धेनूः कुरुते तथो हैन मेता उभयोर्ल्लोकयोर्भुञ्जन्त्यस्मिंश्चा मुष्मिंश्च ॥ १७ ॥

ऋतव स्थेति । ऋतवो ह्येता ऽऋतावृध ऽइति सत्यावृध ऽइत्येतदृतुष्ठा स्थ ऽऋतावृध ऽइत्यहोरात्राणि वा ऽइष्टका ऽऋतुषु वा ऽअहोरात्राणि तिष्ठन्ति घृतश्चुतो मधुश्चुत ऽइति तदेना घृतश्चुतश्च मधुश्चुतश्च कुरुते ॥ १८ ॥

विराजो नामेति । एतद्वै देवा ऽएता ऽइष्टका नामभिरुपाह्वयन्त यथा यथैना ऽएतदाचष्टे ता ऽएनानभ्युपावर्त्तन्ताय लोकम्पृणा ऽएव पराच्यस्त्वपुर्-श्चितनाम्न्यो निमे मिश्रत्यस्ता विराजो नामाकुर्व्वत

ता एनमभ्युपावर्त्तन्त तस्मादु हेष्टका ऽउपधाय सोऽनम्पृणयाभिमन्त्रयते तद्देना विराजः कुरुते दशाक्षरा हि विराट् कामदुघा ऽप्रक्षीयमाणा ऽइति तद्देनाः कामदुघा अप्रक्षीयमाणाः कुरुते * ॥ १९ ॥

अथैनं विकर्षति । मण्डूकेनावकया वेतस-शाखयैतद्वा ऽएनं देवाः शतरुद्रियेण चाग्निं शम-यित्वा अथ मस्य पाप्मान मपहत्याथैन† मेतद्भूय एव शमयति ‡ सर्व्वतो विकर्षति सर्व्वत एवैन मेतच्छ-मयति ॥ २० ॥

यद्वेवैनं विकर्षति । एतद्वै यत्रैतं प्राणा ऋष-योऽग्निं समस्कुर्व्वंस्त मग्निरवोषंस्तं तापः सम-स्कन्दत्ते मण्डूका अभवन् ॥ २१ ॥

ताः प्रजापति मब्रुवन् । यद्वै नः कमभूदवाक्ता-

* 'कुरुते' इति ख ।

† 'मपहत्याथैन' इति ग, घ ।

‡ "शमयन्नथैवैन मथ मेतच्छतरुद्रियेण चाग्निं शमयित्वा अथ मस्य पाप्मान मपहत्याथैन मेतद्भूय ऽएव शमयति" इत्यधिको पाठः क, ख, छ पुस्तकेषु ।

दृगादिति सोऽब्रवीदिदं व ऽएतस्य वनस्पतिष्वस्त्विति वेत्तु संवेत्तु सो ऽह वै तं वेतस ऽइत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा ऽअथ यदब्रुवन्नवाङ्नः क्रम-गादिति ता ऽअवाका ऽअभवन्नवाका ह वै ता अवका ऽइत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्ता हैता-स्तस्य ऽआपो यन् माण्डूको ऽवका वेतसशाखैताभि-रेवैनमेतत् सर्वाभिरद्भिः शमयति ॥ २२ ॥

यद्वेवैनं विकर्षति । जायत ऽएष ऽएतद्यच्चीयते स ऽएष सर्वस्मा ऽअन्नाय जायते सर्व्वमेतदन्नं यन् माण्डूको ऽवका वेतसशाखा पशवश्च ह्येता आपश्च वनस्पतयश्च सर्व्वेणैवैनमेतदन्नेन प्रीणाति ॥ २३ ॥

मण्डूकेन पशूनाम् * । तस्मान् मण्डूकः पशूना-मनुपजीवनीयतमो यातयामा हि सोऽवकाभिरपां तस्मादवका अपां मनुपजीवनीयतमा यातयाम्न्यो हि ता वेतसेन वनस्पतीनां तस्माद्वेतसो वनस्पती-नामनुपजीवनीयतमो यातयामा हि सः ॥ २४ ॥

---

* 'पमूनाम्' इति ग, घ ।

तानि स्वयमृण्णां प्रबध्य । दक्षिणार्द्धमग्नेरन्तरेण परिश्रितः प्रागग्रं विकर्षति समुद्रस्य त्वावकयाग्ने परिव्ययामसि पावको ऽअस्मभ्यꣳ शिवो भवेति समुद्रियाभिस्त्वाद्भिः शमयाम इत्येतत् * ॥ २५ ॥

अथ जघनार्द्धेनोदक् । हिमस्य त्वा जरायुणाग्ने परिव्ययामसि पावको ऽअस्मभ्यꣳ शिवो भवेति यद्वै शीतस्य प्रशीतं तद्धिमस्य जरायु शीतस्य त्वा प्रशीतेन शमयाम इत्येतत् † ॥ २६ ॥

अथोत्तरार्द्धेन प्राक् ‡ । उप ज्मन्नुप वेतसे ऽवतर नदीष्वा § अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधीति यथैव यजुस्तथा बन्धुः ॥ २७ ॥

अथ पूर्वार्द्धेन दक्षिणा ‖ । अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् अन्यांस्ते ऽअस्मत्तपन्तु हेतयः

---

*, † 'इत्येतत'- इति ग, घ ।

‡ 'प्राक्'--इति ग, घ ।

§ 'नदीष्वा'—इति ग, 'नदीष्वा'—इति घ

‖ 'दक्षिणा'—इति ग, दक्षिणा' इति घ

पावको ऽस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुरित्यग्रे व्विकर्षन्त्यथेति यथेत्ययेति तद्द्विधा- वृत्तावि देवता * ॥ २८ ॥

आत्मानमग्रे व्विकर्षति । आत्मा ह्येवाग्रे सम्भवतः सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्द्विधावृत्तावि देवता † ॥ २९ ॥

अभ्यात्मं पक्षपुच्छानि व्विकर्षति । अभ्यात्म मेव तच्छान्तिं धत्ते परस्तादर्व्वाक्परस्तादेव तदर्व्वाचीꣳ शान्तिं धत्तेऽग्ने पावक रोचिषेति दक्षिणं पक्षꣳ स नः पावक दीदिव इति पुच्छं पावकया यश्चितयन्त्या कृपेत्युत्तरं पावकं पावकमिति यद्वै शिवꣳ शान्तं तत् पावकꣳ शमयत्येवैन मेतत् ॥ ॥ ३० ॥

सप्तभिर्व्विकर्षति । सप्तचितिकोऽग्निः सप्त- र्त्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य

* 'देवता'—इति ग, घ ।
† 'देवता' इति ग, 'देवता'—इति घ ।

माया तावतैवैन मेतद्विकर्षति तं व्यृष्य मुत्करे-
न्यस्य * ॥ ३१ ॥

अर्द्धेनꣳ सामभिः परिगायति †। अत्रैष सर्व्वो-
ऽग्निः संस्कृतस्तस्मिन् देवा एतदमृतꣳ रूप मुत्तम
मदधुस्तथैवास्मिन्नय मेतदमृतꣳ रूप मुत्तमं दधाति
सामानि भवन्ति प्राणा वै सामान्य मृतमु वै
प्राणा अमृत मेवास्मिन्नेतद्रूप मुत्तमं दधाति सर्व्वतः
परिगायति सर्व्वत ऽएवास्मिन्नेतदमृतꣳ रूप मुत्तमं
दधाति ॥ ३२ ॥

यद्वेवैनꣳ सामभिः परिगायति। एतद्वै देवा
अकामयन्तानस्थिक मिम ममृत मात्मानं कुर्व्वीमही-
ति त ऽब्रुवन्नुप तज्जानीत यथेम मात्मान मनस्थि-
क ममृतं करवामहा ऽइति ते ऽब्रुवंश्चेतयध्व मिति
चिति मिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेम-
मात्मान मनस्थिक ममृतं करवामहा ऽइति ॥ ३३ ॥

* 'व्यस्य'—इति क, 'न्यस्य'–इति ख, व्यस्य'–इति ग, घ।

† 'परिगायति'–इति क।

ते चेतयमानाः। एतानि सामान्यपश्यंस्तैरेनं पर्यगायंस्तैरेत मात्मान मनस्थिक ममृत मकुर्व्वंस्तथैवैतद्यजमानो यदेनꣳ सामभिः परिगायत्येत मेवैतदात्मान मनस्थिक ममृतं कुरुते सर्व्वतः परिगायति सर्व्वत ऽएवैनदेत मात्मान मनस्थिक ममृतं कुरुते तिष्ठन् गायति तिष्ठन्तीव वा ऽइमे लोका ऽअथो तिष्ठन्वै वीर्य्यवत्तरो हिङ्कृत्य गायति तत्र हि सर्व्वं कृत्स्नꣳ साम भवति ॥ ३४ ॥

गायत्रं पुरस्ताद्गायति। अग्निर्व्वै गायत्र मग्नि मेवास्यैतच्छिरः करोत्यथो शिर एवास्यैतदनस्थिक ममृतं करोति ॥ ३५ ॥

रथन्तरं दक्षिणे पक्षे। इयं वै रथन्तर मिय मु वा ऽएषां लोकानाꣳ रसतमो ऽस्याꣳ ही मे सर्व्वे रसा रसन्तमꣳ ह वै तद्रथन्तर मित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा इमा मेवास्यैतद्दक्षिणं पक्षं करोत्यथो दक्षिण मेवास्यैतत्पक्ष मनस्थिक ममृतं करोति ॥ ३६ ॥

बृहदुत्तरे पक्षे *। द्यौर्व्वै बृहद् द्यौर्हि बर्हिष्ठा दिव मेवाऽस्यैतदुत्तरं पक्षं करोत्यथो ऽउत्तर मेवाऽस्यैतत् पक्ष मनस्थिक ममृतं करोति ॥ ३७ ॥

वामदेव्य मात्मन् । प्राणो वै वामदेव्यं वायुर्ह्य प्राणः सर्व्वेषा मु ह्येष देवाना मात्मा मद्दायुर्व्वायुमेवाऽस्यैतदात्मानं करोत्यथो ऽआत्मान मेवाऽस्यैतदनस्थिक ममृतं करोति ॥ ३८ ॥

यज्ञायज्ञियं पुच्छम् । चन्द्रमा वै यज्ञायज्ञियं यो हि कश्च यज्ञः सन्तिष्ठत ऽएत मेव तस्याहुतीनाꣳ रसोऽप्येति तद्यदेतं यज्ञो-यज्ञो ऽप्येति तस्माच्चन्द्रमा यज्ञायज्ञियं चन्द्रमस मेवाऽस्यैतत् पुच्छं करोत्यथो पुच्छमेवाऽस्यैतदनस्थिक ममृतं करोति † ॥ ३९ ॥

अथ प्रजापतेर्हृदयं गायति । असौ वा ऽआदित्यो हृदयꣳ श्लक्ष्ण एष श्लक्ष्णꣳ हृदयं परिमण्डल एष परिमण्डलꣳ हृदय मात्मन् गायत्या-

---

* 'पक्षे'—इति म, 'पक्षे'—इति च।

† 'करोति'—इति च।

स्मात् हि हृदयं निकृत्तं निकृत्तं हि हृदयं दक्षिणा निकृत्तऽएता हि हृदयं तृतीय आदित्य मेवास्यैत-द्धृदयं करोत्यथो हृदय मेवास्यैतदन्तस्मिन्क ममृतं करोति ॥ ४० ॥

प्रजासु च प्रजापतौ च गायति। तद्यत् प्रजासु गायति तत् प्रजासु हृदयं दधात्यथ यत् प्रजा-पतौ गायति तदग्नौ हृदयं दधाति ॥ ४१ ॥

अग्नौ प्रजासु च प्रजापतौ च गायति। अयं वा अग्निः प्रजाश्च प्रजापतिश्च तदग्नौ गायति तदेव प्रजासु च प्रजापतौ च हृदयं दधाति ॥ ४२ ॥

ता एता अमृतेष्टकाः*। ता उत्तमा उपदधात्य-मृतं तदस्य सर्वस्योत्तमं दधाति तस्मादस्य सर्वस्या-मृत मुत्तमं नान्यो ऽध्वर्योर्गायेदिष्टका वा ऽएता श्चि-चिता ह स्यादादन्यो ऽध्वर्योर्गायेत् ॥ ४३ ॥ २ ॥

॥ इति प्रथमप्रपाठके द्वितीयं ब्राह्मणम् ॥

* 'अमृतेष्टकाः' -इति ग. च.

पूर्वस्मिन् ब्राह्मणे शतरुद्रीयहोमो विहितः अथाग्निमग्नौ परिषेकानुकरणात्रिरूपणादिकं कर्माभिधास्यते। कात्यायनः, — "त्रिरेनं परिषिञ्चत्यन्ततोऽश्मनि निक्षिप्तेऽद्भिः कृत्वाश्मन्नूर्ज-मित्यद्भिरभि" * इति आग्नीध्रो दक्षिणकक्षप्रदेशे पाषाणं निधाय "अश्मन्नूर्ज" † मिति मन्त्रेण पाषाणस्योपरिस्थ आरभ्याग्निं परिषिञ्चदिति सूत्रार्थः तमेतं परिषेकं विधत्ते "अथेति। यतः कारणात् सञ्चितोऽग्निः रुद्ररूपत्वादशान्तः अत एनं शान्त्यर्थं परिषिञ्चेत् तत् चात्र सञ्चितस्याग्नेः रुद्ररूपत्वेना शान्तस्य शमनार्थमेव शतरुद्रीयहोमः। अत एवोक्तं "तस्मा ऽएत दन्नं समभरञ्छान्तदेवत्यम्" ‡ इति अतः किमर्थं पुनः शम-नाय परिषेकस्य विधानं? न हि शान्तः पुनरपि शान्तः स्यात्। न हि भुक्तवान् भोजनमपेक्षते इत्यत आह "एतद्" इति। एतद्वै देवानां कर्मानुष्ठानानन्तरपरामर्शः। एतस्मिन्न-वसरे ते देवा अशान्त मेनमग्निं शतरुद्रियेण शमयित्वाऽपि तेन परिषेकेण भूय एवाधिकमेवाशामयन्त अतो यथै-व देवा अकुर्वन् तथैवाद्य अपि यजमानः शतरुद्रियेण शान्त मपि पुनरधिकशमनार्थं परिषिञ्चति। अतः शमनाधिक्यार्थ-त्वात् परिषेकोऽवश्यं विधेय इति भावः। "अथैनमतः परि-षिञ्चति" इति सामान्यविधानात्पय आदिनाऽपि परिषेकः

* का० श्रौ० सू० १८. ३. १

† वा० सं० १३. १

‡ इतः पुरस्तात् १ अ०, २ क०, पृ० ३, पं० ३।

स्यादित्यत आह,— "अग्निरिति। परिषेकस्य शमनार्थत्वादय-
श्चाग्न्यादिकृतसन्तापशमनक्षमत्वेन शान्तित्वादद्भिः सम्पादितेन
परिषेकेणैनं शमयति ॥ १ ॥

"अद्भि" रपि क्वचिदेवपरिषेकेसाकल्येन शमनं न सेत्स्यतीत्याह, — "सकृत" इति। सकृत् कृते शास्त्रार्थ इति न्यायेन
सकृदपि परिषेके कृते परिषेकविधिश्च इत्यर्थः। स्यादित्य-
भिप्रेत्य तदावृत्ति सङ्ख्यां दर्शयति। 'त्रिः कृत्व' इति। त्रित्व-
सङ्ख्यस्य कार्त्स्न्येनेन शमनहेतु इत्याह,— "त्रिवृदग्नि" रिति
अथ त मेव परिषेकं प्रकारान्तरेण प्रशंसति ॥ २ ॥

"यद्वेवेन मिति। एष सञ्चितोऽग्निः प्राजापत्यात्मकत्वेन
प्रजापतेश्च सर्वलोकहेतुत्वेन तदात्मकत्वात् 'इमे' पृथिव्यादयो-
लोकाः खलु अतश्च तादृशस्याग्नेः परिषेकेण इमानेव 'लोका-
नद्भिः परितनोति' परिवेष्टयति। समुद्रस्यावात्मकत्वादद्भिः
परिषेके समुद्रेणैवेनान् लोकान् परिवेष्टयति। स च परिषेकः
'सर्वतः' सम्पादित इति समुद्रोपीमान् लोकान् सर्वतः (पर्येति
पृथिव्याः समुद्रेण वलवत्त्वात् अन्तरिक्षद्युलोकयोः पृथिव्या
मुपरिवर्त्तमानत्वात् पृथिव्यादीन् सर्वान् लोकान् सर्वः समुद्रः
पर्यतीत्युच्यते सर्वतः) * परिषेकः सव्यावृदपि कर्त्तुं शक्यत
इत्यत आह — "दक्षिणावृदिति। अतः प्रादक्षिण्येक्रमेण परि-
षेकः सम्पादितः अतः समुद्रोऽपि तथैव पर्येति ॥ ३ ॥

* वन्धनीचिह्नान्तः प्रदर्शितः पाठो ज-पुस्तकमात्रे अधिकः।

समाख्याविनियोगादध्वर्योः परिषेक प्राप्तापवाद माह ,— “अग्नीदिति । अथ कस्मादध्वर्युपरियागेनाग्नीध्रः परिगृह्णात इत्यत्राह * अग्निरेष इति परिषेक्तव्यस्याग्नेरगमनेन जय-स्वादध्वर्यो परिषेक्तरितो † हिंसा सम्भाविता स्यात् अग्नीध्रस्य पुनरग्न्य न्तकस्थेन आत्मनैवात्मनो हिंसाया असम्भवादहिंसार्थं तस्य परिग्रह इत्यर्थः । परिषेकाऽनन्तरे दक्षिणे निकटे कश्चन् पाषाणं निधाय तत आरभ्यत इत्याह । “अश्मनोधीत्यादिना निकटः कश्च प्रदेशः तत् सन्निस्थानं लोकेऽपि पर्वत दक्षिणात्पाषाणसन्निस्थानाद् सर्वत स्तत्स्थाने (?) पाषाणं निधाय तत आरभ्य परिषिञ्चेत् इत्यर्थः । ४ ॥

इत्थं प्रकारं परिषेकं विधाय अथ तत्र मन्त्रं प्रदर्श्य व्याचष्टे— “अश्मन्नूर्ज मिति ‡ । आप इति यत् ‘एषा पर्वतस्य अश्मनि ‘श्रिता’ ऊर्जरस पर्वतेषु पाषाणसन्निध्यो य मन्त्र पतत्पाषाणमूर्ज मित्येषभागो य एत्राभिप्रेते । ‘गिरिश्रयन्ता मिति श्रयन्तः प्रानवि इत्यङ्ग देश च रूपम् उत्तरत्र ‘वराणा इत्येतदपि निगमं पदम् । मन्त्र भोजनीय इत्यतत् मन्त्र भागपरिपाठ्योर्थः प्रसिद्ध इत्याह ,— “एतद्भाग्नीति ‘पयः’ क्षीरं तच्च धनादिभ्यः सम्पद्यन्ते इत्येतत् प्रसिद्ध मेव अथ त्युक्त वतीभ्यो गोभ्यः स्यादुत्पत्तरिति । ‘तां न इषं’ इत्यनेन भागो न

* ‘इत्यत आह’—इति ज, भ । इत्यत्राह’—इति क, ज ।

† ‘जयदध्वर्यो (?) परिषेक्तरि तो (?)’—observed by Dr. Webber.

‡ वा० सं० १७. १ ०

महनात् , तत् प्रहारत्वस्य प्रतिपादनात् तेषां तत् प्रेरकत्वेन तदुपपादयति । "महतो वा इति मन्त्रस्यायमर्थः,—'पर्वते' अश्मनि 'गिरिश्रयाणां' श्रिता ऊर्जं रसं भव इत्यर्थः । ता ऊर्जं मद्राः श्चोषधीभ्यो वनस्पतिभ्यश्च सम्पादितं यया व्याहरन्ति तस्मात् । हेतु मतः संस्ताणाः रादाने, सम्यग्दाता यूयं ता मिष मध्यमाणः ऊर्जं रसं नोऽस्मभ्यं भव सम्पादय ति परिषिक्तानन्तरं अश्मन्त ऽ इत्यनेन मन्त्रेण पाषाणे कुम्भं निदध्यात् इत्याह । "अश्मंस्ते क्षुदिति निदधातीति । अश्मनि कुम्भस्य निधाने परिषेकेण शान्तस्य रुद्रस्य क्षुधं पाषाणे निहितवान् भवति इत्याह । तस्मादश्मनि क्षुधं दधाति तस्मादिति । यतोऽश्मनि क्षुन्निहित तस्मादश्मा न भक्षण यः न ग्रा स धारये न ग्रस्मरत्वात् तत्वेन सर्वभिन्या क्षुधो निधानं पाषाणगति र स्थानेऽपि कर्त्तव्यं स्य त् । अतस्तदुल्लङ्घनवाचेव कि मिति निहितेति तत्राह, "अश्मा इति 'अश्मा' कठिनत्वात् 'स्थिरः' क्षुदपि तत्र स्थिरादिदानी मुपशान्तादि कालान्तरेऽनुवर्त्तनात् । अतोऽश्मनि क्षुधो निधानो स्थित एव स्थिरं दधाति । अश्म नहितस्य कुम्भस्य पुन मन्त्रेण स्वीकारं विधत्ते— "मयि त इति । तत् तेन स्वीकारेण पुरामन्यूर्जं अत्रामिकास्यते । पूर्वं क्षुधापगमनार्थं अश्मनि कुम्भे निहितः । तदात्मन्यूर्जोधारणं न सिध्येदिति तदर्थं पुन "स्तथा द्वितीयं तथा तृतीयं इति । तृतीय वा एव स्थाने किं कर्त्तव्य मिति ॥ ५ ॥

तत्राह,—"निधायेति । उदकं क्रियतेऽनेनेति उदहरणं कुम्भः

"उदकस्योदः सञ्ज्ञायाम्" * इत्युदादेशः । तन्निधाय त्रिवं विपल्ययते प्रतिपर्य्येति । मन्त्रानुस्यर्थमेति त्रिपल्ययत इति । "उपसर्गस्यायतावित्ति लत्वं" † किमर्थं विपर्य्यय मित्याह "एतद्वा इति । एतस्मिन्नवसरे खलु एन मग्निं समन्तात्पर्य्येतीति । यत एतेनैनं लघयति लघुमिवाचरति अतस्तथा करोत्यग्नि त्रिस्य-दिति । अग्निमाग्रं तस्मा एवाग्नये निह्नुते ऽपह्नुतं तदिदं पय मपराध मपमार्ष्टीत्यर्थः । लघ्यतीति उपमानादाचारे इति क्यच् प्रत्ययः ‡ । "तस्मा इति । "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" "सम्प्रदाने सञ्ज्ञायां चतुर्थी" § इत्यर्थः प्रकारान्तरेणापि विपर्य्ययणं प्रशंसति ॥ ६ ॥

"यद्वेति । प्रदक्षिणप्रकारावसरे तेनाग्नि मनुगतो भवतीति विपर्य्ययणात् । तत एव जीवनायात्मानं पृथक् करोति । तथा सत्ये-नेदानीं म्रियमाणेन शरीरेणैव 'सर्व मायुः' प्राप्नोति ॥ ७ ॥

विपर्य्ययस्य त्रिवारं करणं प्रशंसति,—

त्रिर्विपल्ययत इति ॥ ८ ॥

त्रिवारं पर्य्येत्य पश्चात् सात्मानं कुम्भं नैरृतीं दिशं प्रक्षिपेदित्याह,—

"अथेति । 'एतां दिशम्' नैरृतीं दिशं हस्तेनाभिनीय दर्श-यति । "एषा नैरृती' दिगिति विवरणात् ॥ ८ ॥

* पा० सू० ६. ३. ५७ ।

† पा० सू० ८. २. १९ ।

‡ पा० सू० ३. १. १० ।

§ पा० सू० १. ४. ३४ ।

"एतद्वा इति। पूर्वं देवा एत मग्निं शतकृद्विषेत्र चाहिप शमयित्वाथ अस्मेरेतोलप्रदेशे प्रक्षेपेण शोक रूपं पापं हृतवन्त। अतो यजमानोऽपि तत्र प्रक्षेपेण तथैव कृतवान् भवति ॥ १० ॥

प्रक्षेप ऽ हरणावसर अग्नेर्बाह्यभागेन हरेदित्याह।— "बाह्येनाग्नि मिति। तथा हरणेन शोचः पृथिव्यादि लोकेभ्यो बहिर्हीक्तो भवतीत्याह,— "इमे वा इति अग्नेः पृथिव्यादि लोकत्रय मकत्वं प्राजापत्यात्मकत्वात् तथव वेदेरपि बहि हरण मभिनय प्रशंसति। "बहिर्वेदीति ॥ ११ ॥

उक्तप्रकारेण साश्म न कुम्भकृत्वा 'वेदेर्दक्षिणस्यां श्रोणौ' ‥सुख द्व ष यं द्विष्म' इत्यनेन मन्त्रेण दक्षिणतो निरस्येदित्याह। स वा इत्यादिना। उ मन्त्रेण निरसने मन्त्रार्थ स्तथव फलतामाह — य मादति। अमुं त गच्छत्वित्यादिकन्तु प्रागेव व्याख्यातम्। निरस्तस्य तस्याश्मनो भेदने कुर्यादित तत्राह। "यदोति। भेतवे भेत्तुं गच्छत्वर्थेत्यादि सूत्रेण तु अर्थे तवै प्रत्ययः। निरसनेनाभिन्नस्य तस्य बालोद्भेदनेन कि लभ्यत इति तत्राह। यदा भाति अत्र 'यदि न भिद्येत भेतवै ब्रूयाद्' इति सामान्येन च तद्भेदनं अश्मविषयं उदकुम्भविषयं इति निर्णयो दृश्यते। अतोऽत्र विचार्यते, कि मेतद् भेदनं कुम्भविषय मश्मविषयं एवेति। किं तावत् प्राप्तं सामर्थ्यात् कुम्भविषय मेतद्भेदनं नाश्मविषयं, कुत एतत् एव मेतद्भेदनं समर्थं भवति। यदि न भिद्येत भेत्त वै ब्रूयादिति।

मद्रोत्व समर्थ मेव न हि तस्य कठिनत्वात् भेदन मापद्यते इति पाशेऽभिधीयते *। अश्मविषय मेतद्भेदनं प्रतिपत्तव्यम् †। न कुम्भ विषयम्। कुत एतत् अर्थवादात् यदा ह्येव स भिद्यतेऽथताए् ह्युगच्छति। यं द्विष्मीति ॥ १२ ॥

सा च शुगश्मनि निहिता तदश्मनि शुचं ‡ दधातीति। किञ्च आश्मनिवाश्मभेदनं कुम्भे भेदनए् सामर्थ्यादग्निवीर्यवादाद्वाच्य-त्वाच्चेति धेनुकरणं नाम वक्ष्यमाण मन्त्रजपपूर्वकं धेनुरूपेणानु-सन्धानम् शतरुद्रियादि कुंभनिरसनान्तं कर्मकृत्वा प्रत्येत्य देवैर्धेनुकरणाद्यजमानोऽपि एतेन तथैव कृतवान् भवतीत्याह,— 'एतद्वा' इति ॥ १३ ॥

विहितं धेनुकरणं आसीनेन सम्पाद्य मिति केषाञ्चिच्छाखिनां सोपपत्तिकं मतं पूर्वपक्षायितुं दर्शयति। 'आसीन' इति स्वमत माह— "तिष्ठंस्त्वेविति। तिष्ठन्नेव कुर्वीत, न पुनरासीन इत्येवकारेण पूर्व मुपन्यस्तस्य मतस्य निरासः। स्वमते उपपत्ति माह— "इमे वा इति। एवं सर्वोऽग्नि रिति पृथिव्यादयोलोकाः कुतः प्रजापति स्तावत् पृथिव्यादि-लोकहेतुत्वेन तदात्मक एषोऽग्निः प्राजापत्यात्मकः। स यः स प्रजापतिर्व्यस्रंसत् मेव स योऽय मग्निश्चीयत इत्युक्तत्वात्। इत्थं प्राजापत्यात्मना अग्नि रिमे लोकाः, लोकाश्चैते तिष्ठ-

---

* का० श्रौ० सू० १८. २. ७।

† वा० सं० १७. १ स्र।

‡ 'शुचं'–इति का० श्रौ० सू० १८. २. ८।

स्तीव ऊर्ध्वा अवतिष्ठन्त इव। अतश्च पृथिव्यादिलोकत्रयात्मकस्याग्नेरवयवीभूतानामिष्टकानां धेनुकरणं स्थित्वा सम्पाद्यमित्यर्थः। अपि च लोके तिष्ठन् पुरुषो वीर्यवत्तरो भवति। नत्वासीनः ततश्च वीर्यवानेव भूत्वा धेनु करोति। यथा धेनवोऽभिमतं पयो * दुहन्ति तद्वदेवैता अपिष्टकाः स्वाभिलाषितं दुहन्ति बुध्वा धेनुरूपेणानुसन्धानं क्रियते धेनवश्च वीर्यवत्तरेण जनेन दुह्यमाना भूयः पयो दुहन्ति न पुनर्दुर्बलेन। अतोऽत्रापि स्वाभिलषितदोहनार्थं धेनुकरणं वीर्यवता सम्पाद्यन्तश्च वीर्यवत्त † तिष्ठतः सम्भवतीति तिष्ठन्नेव धेनुः कुर्यादिति भावः तिष्ठन्नपि कथं तिष्ठन् कुर्यादिति ॥ १४ ॥

तत्राह,— "उदङ् प्राङिति" ऐशानीदिगुच्यते। तदभिमुखस्तिष्ठन्नित्यर्थः ‡। लोके हि यजमानस्य पूर्वभागे धेनोः प्रत्यङ्मुखतयावस्थानो दोग्धृणाञ्च प्रत्यङ्मुखा यास्तेन दक्षिणभाग उपसदनात् स्वाभिलषितदोहनार्थं इष्टकानां धेनुकरणे तथावस्थानमुचित मित्याह— "पुरस्ताद्वा इति ॥ १५ ॥

प्रक्रान्ते धेनुकरणे स्थानविशेषस्पर्शपूर्वकं मन्त्रं विधत्ते— "स यत्रेति। अग्नेरात्मभागस्योपरि यत्र स्पृष्टुमाप्नोति 'तत्' स्थानमभिमृश्य इम ने प्रग्न इति मन्त्रं जपेदित्यर्थः। अतएव

---

* 'या'—इति भ।

† 'वीर्यबले'—इति ज।

‡ का० श्रौ० सू० १८ २. १०.

कात्यायनः— "आत्मन उपरि प्राणभृदन्ते अयतोमाम इति *। अत्रात्मन इति मध्यभागस्येत्यर्थः। अग्न्यादिव्यतिरिक्तासु बह्वीषु देवतासु सतीष्वपि मन्त्रे अग्नि मेव प्राधान्येन किमिति सम्बोधयतीत्यत आह,— "अग्निर्हैतासा" मिति । अयव व्यापारे अवयविनः सामर्थ्योपलम्भादिष्टकाना मग्न्यवयवत्वेनाग्नि-त्वासां करणे असमर्थ इति भावः मन्त्रे आदावेकाच दशचेति। अवसाने अन्तशःपरार्द्धेति सङ्ख्याविशेष प्रयोगस्याभिप्राय माह— "एका च दशचेति। य एष परार्द्धो भूमा अपकृष्टं बहुत्वं अवरसङ्ख्यापर मसौमाशतापेक्षया दशत्वसङ्ख्या अवरा ततोऽप्यवरा एकच सङ्ख्या ततश्चावरेणाया सङ्ख्याया अभा-वादिति। अतोऽन्तश्च परार्द्धेति यत् एष परार्द्धो भूमा उत्कृष्टं बहुत्वं अधिकसङ्ख्याक शतदशशतसहस्रादिसङ्ख्यापेक्षया अन्तस्याधिकत्व ततोऽपि परार्द्धस्याधिकत्वं तत उत्तरस्या अधिकसङ्ख्याया अभावादित्यर्थः। एवं च देवान् पून सङ्ख्या भूमा अधिक सङ्ख्या भूमा च मध्यतः शतादि सङ्ख्याकाः। एताः इष्टकाः परितो गृहीत्वा धेनुरकुर्वत। यत एव तस्मा-दिदानीं यजमानोऽपि एकाचेत्यादिमं मन्त्रपाठेन तद्देव परिगृह्य धेनुः कुरुत इति। तन्वेवं सति मन्त्रे यत् सङ्ख्याकानां मिष्टकानां धेनुरूपता सम्पाद्यते तत् सङ्ख्याका इष्टकासां धेनवः क्रियन्ते। तथाप्युक्तसङ्ख्यातिक्रमेण तत्सङ्ख्यानुसारात् बह्वीः कर्तृत्वाद्द्रियेतेत्यर्थः। कथं तर्हीष्टकास्तत्सङ्ख्याका धेनवः सम्पाद्यन्त

* का० श्रौ० सू० ८, ९, ८

इत्यत आह,— "अमुत्र वा इति। एष यजमानो ऽमुष्मिन् लोके उपलक्षण मेतत् इहलोकेऽपि* अमुया इष्टका वीर्यवता † तेन यजुर्मन्त्रेणैता इष्टका बह्वीः एकादिपरार्धान्त सङ्ख्याकाः कुरुते, मन्त्र सामर्थ्यादस्येष्ट बहुवचनम् ‡ ॥ १६ ॥

तैत्तिरीयके श्रूयते §,—"धान्यमसि धिनुहि देवान्"-इत्याह। एतस्य यजुषो वीर्येण यावदेका कामयते यावदेका तावदाहुतिः प्रथते न हि तदस्ति यावदेव स्यात् यावज्जुहोतीति मन्त्रे एका च दशेत्यादिनोत्तरोत्तराधिकसङ्ख्यासन्तानस्य फल माह— "अथेति। अथ तदेवेष्टका धेनुकरणं वाग्धेनुकरणात्मना प्रशंसति— "यद्वेति। मन्त्ररूपया वाचितत्वात्। अग्नि-र्वागात्मकः एकत्वादिका अपि सङ्ख्याः वाचा प्रकाश्य-मानत्वात् वागात्मिकाः एव भवति। अन्यथवयवो भूताना मिष्टकाना एकादश चेत्यादि सङ्ख्या प्रकाशनेन मन्त्रेण देवा वाचा मेव धेनु मकुर्वन्। अत इदानीन्तनोऽपि यजमानस्तद्-देव करोति। एकत्वादि सङ्ख्यानां वागात्मकत्वात् उत्तरो-त्तराधिकसङ्ख्यासन्तानेन वाच मेव भूयसो मविच्छिन्नां सम्पा-दितत्वाद्भवतीत्याह— "अथेति। ननु च "इमा मे ‖ अग्न

* 'इहातोकेऽपि'—इति भ।

† 'वीर्यवतेत्यर्थः'—इति ज, भ अ।

‡ 'बहुभवनम्'—इति ज भ, अ।

§ तै० सं० १. १. ६।

‖ वा० सं० १७. २।

इष्टका धेनवः सन्त्वित्यनेनैव * धेनुरूपत्वं सम्पादनात्। पुन रपि तद्देवता मे अग्न इत्यादिना सम्पाद्यत इति। पौन-रुक्त्या शङ्का निवारयति। एतद्वा इति इमा मे अग्न इत्येतेनैवा इष्टका अस्मिंल्लोके धेनू करोति। अथैता मे अग्न इत्यनेन अमुष्मिंल्लोके स्वर्गे धेनू करोति अतश्च पृथग-र्थत्वात्र पुनरुक्ति रितिभावः। इष्टकानां लोकद्वयेऽपि धेनु रूपता सम्पादनस्य फल माह— "अथो इति। तथासति एता इष्टकारूपा धेनवः अस्मिंश्चामुष्मिंश्चेत्युभयोर्लोकयो रप्येनं यज-मानं भुञ्जन्ति पालयन्तीत्यर्थः। भुञ्जन्तीति भुजो नवन इत्यात्मने पदं विधानो अवन निषेधात् परस्मैपदम्। हे अग्ने इमा इष्टका इहलोके एकत्वादि परार्धान्त सङ्ख्याविशिष्टा धेनव केवलं हि मिहलोक एव किन्तु हे अग्ने अमुत्रेत्येतत् पदं मन्त्र एव विवृणोति। अमुष्मिंल्लोक इति तत्रापि एता इष्टका मे धेनवः सन्त्विति मन्त्रस्यार्थः॥ १७॥

अथ तत्रैव मन्त्रान्तरम् प्रदर्शयन् व्याचष्टे— "ऋतव स्थेति †। ऋतवो होति एता इष्टका ऋतव खलु संवत्सरा-त्मकस्याग्ने अवयवत्वादित्यर्थः। अहोरात्राणि वा इष्टका इत्यत्राप्ययमेवाभिप्रायः। ऋतावृध इति छान्दसो दीर्घः; ऋता-वृध इति पुनर्वचन मादरार्थः। स्पष्ट मन्यत्॥ १८॥

---

* 'सन्ति यानेवैव'—इति भ।

† वा० सं० १७. ३।

"विराजो नामेत्यादिकण्डिकाया अर्थः — एतस्मिन् काले खलु 'देवाः' यथा 'यथा एता इष्टका याचयन्ते' येनां मभिरेना इष्टका याचयते जना ते रेव ना मभिरेना इष्टका याचयते जनाः ते रेव नामभिः स्वय मथाह्वयन्ताम्। ततश्चैता इष्टका एतान् देवान् 'अभ्युपावर्त्तन्' तत् समीप मगमत्। 'अथ लोकम्पृणा एव' अविच्छिननाम्नाः धेनुरूपतया अस्वयं मूर्त विसृजन्त्यः ; पराङ्मुखा एव तस्थुः अन्यासा मिष्टकानां स्वयमातृण्णा रेतः सिग्वियज्ज्योतिरपस्याप्राणभृदित्यादिकानि विद्यन्ते लोकम्पृणानान्तु तथा प्रातिस्विकनामधेयाभावादि-त्युक्तावत् स्वनामानाह्वानेन विमुखा भूत्वा अवस्थिताः * इत्यर्थः। पश्चाद्देवास्ता इष्टका विराजनाम्नो रकुर्वत †। अतः स्वय मपि तत् समीप मगमत्। अतएव तस्मादुपधानावसरे-ऽपि लोकम्पृणा दग्रदग्रोपधाय मन्त्रेणाभिमन्त्रयन्ते एवं च सति विराजो दग्याचरत्वात् देवा विराजः क्षतवान् भवतीति। तस्मात् मन्त्रे लोकम्पृणा उद्दिश्य विराजो नामेति प्रयुक्त मिति ॥ १८ ॥

विग्रद मन्यत् ऋतवस्वेत्यादि मन्त्रस्य योजनं यथा-श्रुत मेव इष्टकानां धेनुरूपता सम्पादनानन्तरम् "मण्डूकीनाव-कया वेतसशाखाभिरग्निस्खलस्य विकर्षणं विधत्ते— "अपेति।

* 'वनस्थिरः'—इति ज ; 'वनस्थिन'—इति भ।

† 'रन्क्रुर्वत'—इति छ।

एतद्वा इत्यादिकस्य सम्बन्धस्तु प्रागेवाभिहितः। विहितं तद्विकर्षणं 'सर्वतः' कर्त्तव्य मित्याह ॥ २० ॥

सर्वत इति सर्वथापि विकर्षण... प्रमस्तां दर्शयति—"यद्वेन मिति। 'एन' मग्नि मण्डूकादिभि 'र्विकर्षति' इति 'यत्' यत्र एतत् कारणं खल्विति कारणाभिधानं प्रतिज्ञाय 'यत्रैत' मित्यादिना तत् प्रदर्श्यते,— 'अग्रे' पूर्वं यत्र यस्मिन् प्रस्तावे ऋषिशब्दाभिधेयाः 'प्राणा' एत मग्निं समस्कुर्वन् संस्कारप्रकारस्तु षष्ठकाण्डस्यादावुक्तः; तदाति * प्राणास्त मग्नि 'मग्नि'रेवोचितवतः ता आपः संस्कृता 'मण्डूका' अभवत् ॥ २१ ॥

ततः प्रजापतिः प्रतिमाऽस्माकं रसो वाग्नादित्यब्रवीत् स प्रजापतिर्व एतस्य 'रसस्य एव' वनस्पति वेतु इति अब्रवीत्। तस्येति कर्मार्थे षष्ठी एव इति प्रत्ययेन निर्दिष्टम्। 'तं' वनस्पति वेतस इति परोक्षेणाप्याह। यत एव सुतं तेन वेतसोऽभूत् खलु 'तं' देवाः परोऽक्षकामत्वा द्वेतस इत्याचक्षते। अथापो यदब्रुवन् अवाञ्चगादिति तस्मात् स रस 'अवाका अभवन्'। ताश्च देवताः परोक्षकामत्वादवका इत्याचक्षते। "ता हैता इति। उक्त प्रकारेण 'मण्डूकाः' साक्षादेवापः वेतसोऽपि तद्रसवेदानाम् अवकास्तु द्रसात्मकत्वादिति सर्वेप्येते मण्डूकादयः अवकात्मका इति। ता एता स्त्रिविधा आपः खलु तस्मात्ते रवकर्षणैरेता स्त्रिविधाभिरप्यद्भिरेम मग्निं शमयितवान् भवति ॥ २२ ॥

---

* 'तद्वैते इति ज।'

इत्थं मण्डूकादीना मवात्मकत्वेन शमयनार्थत्वं प्रदर्शयितानेव कृत्स्नात्मरूपेण प्रशंसति,— "यद्वेवेति। पूर्वं शाखेष्विति अनेन विस्रंसनेन परासुः प्रजापति इदानीं चयनलक्षणेन संस्कारेण प्राणादीनां निधानात् पुन रुत्पद्यत इति चायमानाग्निलक्षणः प्रजापति र्जायत एव। जायमानस्य च सर्वान्नभोज्यार्थ मेवोत्पत्तेः; एषोऽपि सर्वस्मा अन्नाय जायते। मण्डूकादयश्च कृत्स्नं मन्नम। तदेव प्रदर्श्यते,— "पशवश्च वैता इति। 'एता मण्डूकावकावेतस शाखाः' * क्रमेण पशव आदौ वनस्पतयश्च भवन्तीति। मण्डूकादय स्थावरजङ्गमात्मकं कृत्स्नं मन्नं भव प्रदर्श्यते। मण्डूकादयः सर्वे अपि च अवात्मकाः। तथापि अवकानाञ्जलेका यत्र मत्वादप्राप्ति वनस्पतिरूपत्वाच्च ता आप इत्युक्तम्। एवञ्च सति मण्डूकादिभिर्विकर्षणेण एन मग्निं सर्वान्नेन प्रीणातीति ॥ २३ ॥

विकर्षणेन वीतरसान् मण्डूकादयोऽनुपजीवनीयः अभविष्यन्,— "मण्डूकेनेति पशूनाम्। पशूनां मध्ये मण्डूकेन विकृष्टवानिति यत् यस्मात् पशूनां मध्ये मण्डूका गतदारत्वात् पश्वन्तरवदुपकारको न भवतीति। सो अध्वर्यु रुच्यते एव मेवावका अपि मत्स्याः पेयावान् भवतीति वेतसोऽपि वनस्पत्यन्तरवत् पुष्पफलादि नोपकारको न भवतीति। एते सर्वे अनुजीवनीयाः अभूवन्नित्यर्थः ॥ २४ ॥

---

* का० श्रौ० सू० १८. २. १०। वा० सं० १७. ६।

मण्डूकादिभिः कथं सम्भवतीति तदुपाय माह— स तानीति सोऽध्वर्युः 'तानि' मण्डूकादीनि 'वंशे प्रबध्य' विकर्षणेनेति शेषः। पूर्वं मग्निस्थलस्य सामान्येन विकर्षण मुक्तम्। अथैनं विकर्षति। सर्वतो विकर्षतीति। तत्रे-दानीं कस्मिन् कस्मिन् प्रदेशे केन केन प्रकारेणेति विशेष जिज्ञासाया माह ;— "दक्षिणार्धेनेति। परिश्रिता मन्तरेणाग्नेरात्मना भागस्य दक्षिणभागे प्रथमं 'प्राग्' अपवर्गं कर्षति। "समुद्रस्यत्वेवेति * मन्त्रेणेत्यर्थः। दक्षिणार्धेनेति व्यत्ययेन तृतीया। समुद्रस्य त्वावकयाग्ने परिव्ययामसीत्यस्य तात्पर्य माह — "समुद्रियाभिस्त्वेति। समुद्रशब्देनात्र जलाशय उच्यते। समुद्र सम्बन्धिनीभिरद्भिः 'त्वां शमयाम' इत्येतदुक्तं भवति। अवकाया अबात्मकत्वात् तया सञ्चरणेन शमनस्य निष्पादनादित्यर्थः। "समुद्रियाभिरिति समुद्रा अाच † इति प्रत्ययः। तस्य चायनेयी इत्यादि सूत्रेणापि यादेशः। हे 'अग्ने' 'त्वां' समुद्रसम्बन्धिन्या 'अवकया' यदि 'परिव्ययामसि' परितः शब्द गुणः इदन्तो मसि रित्युत्तमपुरुष बहुवचन सकारस्यान्ते इकारागमः। तेन सञ्चरणेन शान्त स्त्वं 'अस्मभ्यं' अस्मदर्थं पावयति शोधयतीति 'पावकः' पावयिता 'शिवः' शान्तः आनुकूल्यवान् भवेति मन्त्रस्यार्थः॥ २५॥

* वा० सं० १३. ४।

† पा० सू० ४. ४. ११८।

अत्र प्रकारेण दक्षिणभागे विन्यस्य पश्चिमभागे उदगप-वर्गं "हिमस्य त्वेत्यनेन मन्त्रेण * विकर्षेदित्याह,— "अथ अवरार्द्धेनेति। 'यद्वै शीतस्य' इत्यादिकस्यायमर्थः— 'यत्' खलु 'शीतस्यापि प्रशीतं' प्रकृष्टं शीतं 'तद्धिमस्य जरायु जरायुशब्दो गर्भवेष्टनवचनः यतश्च जरायुर्यथा गर्भं माच्छा-दयति तद्वदिदं शीतमभिभवेमाच्छादयतीति। हिमस्य जरायुत्वेति शीतादप्यधिकशीतत्वं सूच्यते इति। अत्र यथा-त्मका मण्डूकादय एव हिमस्य जरायुत्वेनेन विवक्ष्यते। तेन च शब्देन तेषा मभिधानं प्रकृष्टगमनत्वमर्थंत्वात् सुवचार्थं मिति प्रतिपत्तव्यम् ॥ २६ ॥

अथोत्तरभागे प्रागपवर्गं "उपज्मनुपेति † मन्त्रेण विकर्षे-देति विधत्ते— "अथोत्तरार्द्धेनेति मन्त्रस्तु स्पष्टार्थ इत्याह स्पष्टेति ॥ २७ ॥

अथ पूर्वभागे "अपा मिदं मित्यादि ‡ मन्त्रेण दक्षिणापवर्गं विकर्षेत्याह अथ पूर्वार्द्धेनेति। अथ मपि मन्त्रस्पष्टार्थं इत्याह— "मन्त्रेति हे अग्ने यदेतत् मण्डूकावकावेतस: माच्छादयत् खलु इदं अपामयनं निततं स्थानं अपा मस्त्वीयस्येति तदयं मस्त्वं सम्भवतीति। तत्राह समुद्रस्येति नम्रस्त्रीयसी मपामयन मेतत्। अपि तु 'समुद्रस्य' जलनिधिरेव 'निवेशनं' निवे-

* मा० मं० १७. ५।
† मा० मं० १७. ६।
‡ मा० मं० १७. ७।

प्रतेऽस्त्विन्निति निर्वेशनं अधिकरणे लुट् स्यादि नित्यर्थः। एतच्च तथाविधेन मधूकादिना विज्ञायते यतः अतस्त्वां प्रयोमि ते इतयो व्याख्याः अस्मादस्यां 'स्वपन्तु अमर्त्य' तु त्वं याचकं 'मिच' भवति मन्त्रार्थः। तथाविदिति विकर्षणप्रकार पक्षाभिनयेन दर्शयन् दक्षिणभागादिक्रमेण विकर्षणात् त्रिधं प्रादक्षिण्यक्रमं प्रशंसति। इत्यथो विकर्षतीति,— "देवेति। देव मनुष्येभ्यो * सूत्रेण देवार्थे त्रा प्रत्ययः। देवं देवं देवोचितं भवतीत्यर्थः ॥ २८ ॥

आत्मभागविकर्षणस्य प्राथमिकत्व मुपपादयति,— "आ-त्मान मिति दक्षिणार्धे मेत्यादिना विहितं विकर्षण मन्ते-ऽात्मभागे एव क्रियते। अतश्चाग्ने आत्मानं विकर्षतीत्येतदुप-पन्नं कुतः सम्भवति। जायमानस्य करचरणाद्यवयवजातस्य मध्ये पूर्वमात्मभाग एव सम्भवति तत् प्रकाशात् करचरणादीनां मुत्पत्तेरिति। अथ दक्षिणपक्षादीनां विकर्षणं विधाय तत्क्रमसिद्धं प्रादक्षिण्यं पूर्ववत् प्रशंसति ॥ २९ ॥

पश्चेति पक्षादीनां विकर्षण मात्मभाग मभिलक्ष्य कुर्या-दित्याह। अध्यात्ममिति आत्मन्यात्मना अभि अध्यात्मं लक्षणे-नाभिप्रती आभि मुख्य इत्यव्ययी भावसमासः। अनयेति समासान्तटच् † विकर्षणानुसारेण 'प्राञ्चि' निखितवान् भवतो-

---

* 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्'— पा० सू० ५. ४. ५६ ।

† पा० सू० ५. ४. १०८ ।

स्त्वाह । अभ्यात्म मेवेति कथ मभ्यात्मं विकर्षं भवतीति; तत्राह परस्तादिति । अथ दक्षिणपश्चादीनां विकर्षणेषु मन्त्रान् विधत्ते,— अग्ने पावक रोचिषेत्यादिना मन्त्रेषु * पावक-शब्दप्रयोगस्याभिप्राय माह— ‘पावकं’ पावक मिति ‘यत्’ खलु वस्तु ‘शिवं’ तस्यैवार्थ प्रदर्शनं ‘शान्त’ मिव तत् ‘पावकं’ भवति । अशान्तस्य शुचि सम्पादकत्वात् अतश्चाग्नेः शान्तता सिद्धये तेन शब्देन सम्बोधन मिति ॥ २० ॥

भाव: विकर्षणे विनियुक्तानां मन्त्राणां समत्वसङ्ख्या प्रशंसति,— “सप्तभि रिति । ‘सप्तचितिकोऽग्नि’ रित्यनेन ‘सप्तर्त्तवः सम्वत्सरः सम्वत्सरोऽग्नि’ रित्यनेन च पृथगेवाग्नेः सप्तसङ्ख्यायागः प्रदर्श्यते । पञ्च चितयो नित्याः इतरे द्वे चितो नैमित्तिके इति सप्तचितयः अधिमासापेक्षया सप्तर्त्तवः । यस्मिन् वंशे मण्डूकादीनि बद्धा विकृष्टन्तं वंश मुत्करे प्रक्षिपेदित्याह तं वंश मिति ॥ २१ ॥

अथैन मग्निं परितः सामभि र्गायेदित्याह—“अथेति । विचिते सामगान ममृतरूपतया प्रशंसति । अत्रैव इति । कथ मेतत् साम्ना ममृतरूपत्व मिति, तत्राह— “सामानीति । प्राणात्मके शरीरेषु स्थानाधिकारादि पञ्चभेदविशिष्टत्वात् वा साम्ना प्राणत्वं प्राणश्चामृतं खलु प्राणसम्बन्धे मरणाभावात् । अतश्च प्राण रूपेण साम्नामप्यमृतरूपत्वात् सामगानेना मृत मुत्तमं रूपं मस्मिन्नग्नौ निदधातीत्यर्थंतच्च सामगानं सर्वतः कर्त्तव्य

* वा० सं० १७. ८ ।

मित्याह। "सर्वत इति। यत: पुनस्तदेव सामगानं प्रजापति सम्बन्धिन आत्मन: यनस्थिकामृतरूपत्वसाधनतया प्रवर्त्तति ॥ १२ ॥

"यद्देवेन मिति। एतस्मिन् काले खलु 'देवा' 'इमं प्रजापतिसम्बन्धिन 'आत्मानं' शरीरं 'अनस्थिकमत' एव 'कुर्वीमहीति' अकामयन्त अस्थ्नाविनश्वरत्वेन तद्विशिष्टस्यापि शरीरस्य विनश्वरत्वात् तद्रहितं प्राप्यशरीरं कर्मलभ्यप्यमित्यर्थ:। तत एते' येन प्रकारेण 'असमात्मान मनस्थिकं करवामह' एतत् प्रकार मुपजानीमेत्युक्त्वा पश्चात् कथं तत् प्रा॰ोपाय इत्यपेक्षायां "चेतयध्व मित्यब्रुवन्। तद्वाक्यस्य श्रुति स्वय मेव विवृणोति,—"चिति मित्यादिना। 'चितिं' विमर्शमिच्छतेति खलु 'ते अब्रुवन्' एव मपि किमर्थ मब्रुवन् मित्याशङ्क्याह "तदिच्छतेति। तदिति लिङ्गव्यत्यय: येन प्रकारेण 'असमात्मान मनस्थिकं' कुर्वी महि तत् प्रकार परिज्ञाय चिति मिच्छतेति ब्रुवन्नित्यर्थ: ॥ १३ ॥

पश्चात्ते तथा विचारयमाणा स्तदुपायत्वेन एतानि वक्ष्यमाणानि गायत्र्यादीनि सामानि ददृशुस्ते इमं परि-गीयैत मात्मानं यथोद्दिष्ट मकुर्वन् अतस्तद्देवं यजमानोऽपि कुरुते सर्वत इति। पूर्वादिभागेषु सर्वतो गानेन शरीरं सर्वत: कार्त्स्न्येन मनस्थिक ममृतं करोति। विहितं गान माम्नोनेन निहता वाकार्थं मिति। तत्र स्वेच्छयान्यतर प्रकारेण तत् प्रसक्तौ नियम माह – "तिष्ठन्निति। तत्र चौत्कृष्टार्थ

विवरणं ज्ञात्व मिति। तत्र हिङ्कारे खलु ज्ञातं साम भवति। सामान्यरूपेण हिङ्कारे ज्ञात्व मपि सामवर्त्तत इति अनेनैवाभिप्रायेण श्रुत्यन्तरेषूक्तं हिंकरोति। सामै वा करोति। अथैनं सामभिः परिगायतीति सामान्येन विधानात् देशविशेषे सामविशेषमान मभिधत्ते ॥ १४ ॥

"गायत्र मित्यादिना। 'तत् सवितुर्वरेण्य' * मित्यस्यामृचि गायत्र्या मुत्पन्नं साम गायत्रम्। तत् पूर्वभागे गायेत्। एवञ्च गायत्र्या अग्निना सहोत्पन्ने तत्रोत्पन्नस्यापि सामोऽग्नित्वादस्य अग्निताविशिष्टस्य प्रजापते रग्नि मेव शिरः प्रदेशत्वात् शिरसा शिर एवैतेन सामगानेन 'अमस्विक ममृतं' करोति ॥ १५ ॥

'अभित्वा शूरनोनुम' † इत्येतस्या मृच्युत्पन्नं साम रथन्तरं तद्दक्षिणपक्षे गायेत्। एवमस्य पृथिवी मेव दक्षिणं पक्षं कृतवान् भवतीभि आह— "रथन्तर मित्यादिना। अस्याः

---

* गायत्रसाम ;—

तत्सवितुर्वरेण्यम् भर्गोदेवस्य धीमहि।

धियो यो नः प्रचोदयात् ॥

—इति उ० ६ प्र० ३ अ० १० सू० १ ऋचि।

† रथन्तरम् :—

अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः।

ईशान मस्य जगतः स्वर्दृश मीशान मिन्द्र तस्थुषः ॥

—इति छ० ३ प्र० १ अ० ५ द० १ ऋचि, आ० १प्र० १अ० २१ साम

णीति। "रसे इति। रसातिशयेन दर्शयति। यत इमे सर्वे रसा अस्मा अवतिष्ठन्ते। अतोऽतिशयरसाधारत्वेन सर्वं रसवतः रसतम एव रसंतमः * तच्च परोक्षकामत्वाद्देवा रथन्तरमभिदध इत्यर्थः ॥ १६ ॥

'त्वामिद्धि हवाम' † इत्येतस्यामृच्युत्पन्नं साम बृहत्। तदुत्तरे पक्षे गायेत्। तथावदिन्न मेवास्योत्तरं पक्षं ज्ञातवान् भवतीत्याह — "बृहदुत्तरे पक्ष इति। 'बर्हिष्ठा' अतिशयेन बृहती बृहच्छब्दादतिशयार्थे इष्टनिटिलोपे च रूपम् ॥ १७ ॥

'कयानश्चित्र आभुवद्' ‡ इत्यस्यामृच्युत्पन्नं साम वामदेव्यम्। तदात्मभागे गायेदित्याह। "वामदेव्य मिति। आत्म-

---

* 'रसतमः रसतम एव रसंतमः'—इति क।

† बृहत्साम;—

त्वा मिद्धि हवामहे सातौ वाजस्य कारवः।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥

—इति छ० ३प्र० १अ० ५द० २ऋचि, आ० १प्र० १अ० २७ साम।

‡ महावामदेव्यसाम;—

कया नश्चित्र आ भुवदूती सदावृधः सखा।
कया शचिष्ठया वृता॥१॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः।
दृढा चिदारुजे वसु॥२॥
अभी षु नः सखीना मविता जरितृणाम्।
शतम्भवास्यूतये॥३॥

—इति छ० १प्र० १अ० १२द० १—३ऋचि, उ० १प्र० १अ० ५ साम।

भागे वामदेवस्य गानेन वायु मेवात्मानं करोतीत्याह। "प्राणो वा इति "सर्वेषां नु हैव देवानां मात्मा यद्वायुरिति। तद्भा: तेषां वाय्वात्मा वादित्यर्थ: ॥ १८ ॥

अथ पुनः 'यज्ञायज्ञीयं' * साम गायेदित्याह,— 'यज्ञा यज्ञिय मिति। 'यज्ञा यज्ञा वो ऽग्नये' इत्येतस्या मृच्युत्पन्नं साम यज्ञायज्ञीयम्। यज्ञ यज्ञ शब्दोऽस्मिन्नस्तीति विग्रह मतोर्लुक्: सूक्तसाम्नोरिति साम्नि छ: । तस्य इयादेश:, यज्ञ यज्ञायज्ञीय मिति। छान्दसम्। यज्ञायज्ञीयञ्च चन्द्रात्मतां प्रतिजानीते। 'चन्द्रमा वै यज्ञायज्ञीय' मिति। तदेवोपपादयति "यो हि कश्चेति। 'यज्ञ: संतिष्ठते' सम्पूर्णतामेति। तस्याहुतीनां रसा" एनं चन्द्रमस मेतेति। अतएव देवा एत मुपजीवन्ति। यतो यज्ञाहुति रसश्च चन्द्रं प्रति प्राप्तिद्वारा यज्ञायज्ञ: कृत्स्न एव यज्ञ: एत मप्येति। तस्मात् 'यज्ञो यज्ञ' एत मेतीति, चन्द्रमा यज्ञायज्ञीय मित्यर्थ: ॥ १९ ॥

अस्तु यज्ञायज्ञीयस्य चन्द्रात्मकत्वम्। तत: किं प्रकृते समायात मिति तु आह— चन्द्रमस मेतेति "प्रजापतेर्हृदय मिति। किञ्चित् साम तदप्यत्र गायेदित्याह— "अथेति। तत् साम आदित्यात्मना स्तौति। "असौ वा इति। आदित्यस्य हृदय

* यज्ञायज्ञीय साम:—

यज्ञायज्ञा वो अग्नये गिरा गिरा च दक्षसे।
प्र प्र वयममृतं जातवेदसं प्रियम्मित्रम्न शंसिषम् ॥
—इति ऋ० १प्र० १अ० ४द० १ ऋचि, गे० १प्र० ७अ० २५ साम।

साहस्त्र प्रदर्शनेनोक्तं प्रजापतेर्हृदयसाहस्त्र प्रजापतेर्नोक्तं प्रजापतेर्हृदयत्वं उपपादयति । 'स्तस्य' लक्षण एत इति । गायत्र्यादीनां गानस्य स्थान विशेष उक्तः । अथैतद्गानं कस्मिन् स्थाने कर्त्तव्य मिति तदाह,— 'आत्मन्' इति आत्मभागीति । यत्र क्वचित्क्रियतेति तदाह — "निकच्च इति । निकच्चावप्यभौ विशेते इति तत्रान्यतरस्मिन् क्रियतेत्यत आह — "दक्षिणे निकच्च इति । अतोऽस्माधिकत्वा हृदयं 'मे दीय उत्पन्न' सन्निहितं तदोय इत्यस्यान्तिकार्थत्वात्तद्योगे 'दूरान्तिकार्थैः षष्ठ्यन्यतरस्या' * मिति पचे प्रकरणात् पञ्चम्याविधानादत इति पञ्चमो इत्थं प्रजापते हृदयस्यादित्यात्मकत्वात्तस्य मानेनादित्य मेवास्य रात्मभागं करोतीत्याह,— "आदित्य मेवेति ॥ ४ ॥

प्रजापते हृदय गायत्र्यादिसामवत् च कस्यांश्चिदपि न गीयते । अपि तु केवलं प्रजाशब्दे प्रजापतिशब्दे च गीयते अतएव आपस्तम्बेन सूचितं,— "प्रजापतेः सामानृचं गायतीति † अतस्तस्य साम स्तुयोः शब्दयोगानं प्रशंसति,— "प्रजासु चेति । न च ता प्रजासु प्रजापता वित्यभिधेय निर्देशः क्रियते नहि तत्र गानं सम्भवति अमूर्त्तत्वात् तथाय शब्दनिर्देशः । प्रजास्विति बहुवचनवैयर्थ्यात् । अन्यः कथ मस्य वचनस्योपपत्तिरिति नैतदस्ति वाच्यवाचकयोर्भेद विवक्षया वाचकशब्दे क्रियमाणं गानं

* पा० सू० २. ३. ३४ ।
† आप० श्रौ० सू० २ १२. ७ ।

वाच्ये क्रियत इत्युपचर्यते। तद्यत् 'प्रजासु हृदयं दधाति' अथ यत् प्रजापतौ गायति तदग्नौ हृदयं दधातीति'। अभिधेयैकत्वमत्र शब्दभेदेनाप्यनुरोधेनाभिधेय एव गायतीति। उपचारोक्तेरभिप्रायः पूर्वं प्रजा प्रजापतिशब्दयो र्गानेन प्रजासु अग्नौ च हृदयं निधीयत इत्युक्तम् ॥ ४१ ॥

अथाग्नेस्तदुभयात्मकत्वात् तत्रैव गाने तत्रोभयत्रापि हृदयं निधीयत इत्याह,— "यद्वेवेति। प्रजाशब्देन प्रजापतिशब्देन च तस्य गानमग्नौ क्रियते। अतश्च पूर्वत्तच्छब्दयाभिधेयप्राधान्ये-नाग्नेरुपसर्जनत्वं मुक्तम्। अत्र तु अग्निप्राधान्येन तच्छब्दद्वया-भिधेयस्योपसर्जनत्व मुच्यत इति विभागः। "अयं वा अग्निः प्रजाश्च प्रजापतिश्चेति। स यः प्रजापतिर्व्यस्रंसतायामेव स योऽयमग्निश्चीयत इति श्रुतेः अग्निस्तावत् प्रजाः प्रजापतेश्च सर्वप्रजा निर्मातृत्वेन तदात्मकत्वात्तद्वाराग्निरपि प्रजात्मक इत्यर्थः ॥ ४२ ॥

अथैतानि गायत्र्यादीनि सामानीष्टकारूपेण स्तौति— "ता हैता इति। सामानि भवन्ति प्राणा वै सामान्यमृत मु वै प्राणा अमृत मेवास्मिन्नेतद्रूप मुत्तमं दधातीति सामाम्नाता-वद मृतत्वं मुक्त मेव इष्टकानां प्रतिदिश मुपधीयमानत्वा-दुपधानवादेः तेषां प्रतिदिशं गानादिष्टकात्वोपचारः। एवञ्च तान्येतानि सामान्यमृतेष्टका भवन्ति। "ता हैता इति स्वयमातृण्णाविशेषेयेष्टका पञ्चे ताश्चेष्टका उत्तमाः सर्वाभ्य इष्टकाभ्यः उपरिष्ट उपरिष्टा उपदधाति। तेनास्य दृश्यमानस्य

सर्वस्याप्यमृत मुत्तमं दधाति। तस्मादस्य सर्वस्य प्रपञ्चस्या मृत मुत्तमं भवति। विहितं सामगानं समाख्यानादुद्गातुः प्राप्नोतीति। तदपवाद माह—"नाध्वर्योरि"ति। इतरस्य गातृत्वे दोष माह—'इष्टका वा एता इति। एतेषां साम्ना मिष्टकात्वादिष्टकानां चाध्वर्युणोपधेयत्वादितरस्य * गातृत्वे तदु पधानसेधुर्येणाध्वर्यु र्जितः पराभूतो भवेदित्यर्थः ॥ ४३ ॥ २ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे प्रथमेऽध्याये द्वितीयं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम् ,
सप्ताब्धीन् पञ्चसीरीस्त्रिदशतरुलताधेनुसौवर्णभूमीः ।
रत्नोस्रां हस्तवाजिद्विपमहितरथौ सायणः सिङ्गणार्यो ,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥

* 'चाध्वर्योरिति इतरस्य'—इति क, ग

धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडजमथ जडो राजतं राजपूज्यः ।
आज्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरिमथ जन मुदा पापमालिन्यपायः * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे प्रथमोऽध्यायः समाप्तः ॥ १ ॥

---

* अत्रत्याष्टौ पद्याः पञ्चमकाण्डीयद्वितीयाध्यायान्ते द्रष्टव्याः ।

॥ अथ द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥

उपवसथीयेऽहन्प्रातरुदित ऽआदित्ये *। व्वाचं व्विसृजते व्वाचं व्विसृज्य पञ्चगृहीत माज्यं गृह्णीते तत्र पञ्च हिरण्यशकलान् प्रास्यत्यथैतत् अयꣳ समासिक्तं भवति दधि मधु घृतं पात्र्यां वा स्थाल्यां व्वोरुबिल्या तदुपरिष्टाद्दर्भमुष्टिं निदधाति† ॥ १ ॥

अथाग्नि मारोहति। नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्च्चिष ऽइत्यवैष सर्व्वोऽग्निः संस्कृतः स एषोऽत्र तस्मा ऽअलं यद्धिꣳस्याद्यं जिहिꣳसिषेद्य मु वा ऽएष हिनस्ति हरसा वैनꣳ शोचिषा व्वार्च्चिषा वा हिनस्ति तथो हैन मेष एतैर्न्न हिनस्त्यन्यांस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुः ॥ २ ॥

आरुह्याग्निꣳ स्वयमातृण्णां व्याघारयति। आज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ३ ॥

---

* 'व्वादित्ये'—इति ग, घ।

† 'निदधाति'- इति ग, घ।

स्वयमातृण्णां व्याघारयति । प्राणः स्वयमातृण्णा प्राणे तदन्नं दधाति * ॥ ४ ॥

यद्वेव स्वयमातृण्णां व्याघारयति । उत्तरवेदिर्ह्येषाग्नेरथ या ममूं पूर्वां व्याघारयत्यध्वरस्य सा यथैषाग्नेस्तामेतद् व्याघारयति ॥ ५ ॥

पश्यन्नेव हिरण्यं व्याघारयति । प्रत्यक्षं वै तद्यत् पश्यति प्रत्यक्षꣳ सोत्तरवेदिः प्राणा एवेह भवन्ति परोऽक्षं वै तद्यत् प्राणाः परोऽक्ष मिय मुत्तरवेदिः ॥ ६ ॥

स्वाहाकारेण तां व्याघारयति । प्रत्यक्षं वै तद्यत् स्वाहाकारः प्रत्यक्षꣳ सोत्तरवेदिर्वषट्कारेणेमां परोऽक्षं वै तद्यद्वषट्कारः परोऽक्ष मिय मुत्तरवेदिराज्येनाज्येन ह्युत्तरवेदिं व्याघारयन्ति पञ्चगृहीतेन पञ्चगृहीतेन ह्युत्तरवेदिं व्याघारयन्ति व्यतिहारं व्यतिहारꣳ ह्युत्तरवेदिं व्याघारयन्ति† ॥ ७ ॥

* 'दधाति'--इति ख ।

† 'व्याघारयन्ति'--इति ख ।

नृषदे वेडिति। प्राणो वै नृषन् मनुष्या नरस्तद्यो ऽयं मनुष्येषु प्राणो ऽग्निस्त मेतत् प्रीणात्यप्सुषदे वेडिति यो ऽप्स्वग्निस्त मेतत् प्रीणाति बर्हिषदे वेडिति य ओषधिष्वग्निस्त मेतत् प्रीणाति वनसदे वेडिति यो वनस्पतिष्वग्निस्त मेतत् प्रीणाति स्वर्विदे वेडित्यय मग्निः स्वर्विदिम मेवैतदग्निं प्रीणाति ॥ ८ ॥

यद्वेवाह। नृषदे वेडप्सुषदे वेडित्यग्ने वैतान्यग्नेर्नामानि तान्येतत् प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते ऽथो ऽएतानेवैतदग्नीनस्मिन्नग्नौ नामग्राहं दधाति ॥ ९ ॥

पञ्चैता आहुतीर्जुहोति। पञ्चचितिको ऽग्निः पञ्च ऽर्त्तवः संवत्सरः संवत्सरो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदन्नेन प्रीणाति* ॥ १० ॥

अथैनꣳ समुक्षति। दध्ना मधुना घृतेन

* 'प्रीणाति' —इति ख।

जायत ऽएष एतदाश्नीयते स एष सर्व्वस्मा ऽअन्नाय
आयते सर्व्वम्वेतदन्नं यद्दधि मधु घृतꣳ सर्व्वेणै-
वैन मेतदन्नेन प्रीणाति सर्व्वतः समुक्षति सर्व्वत
एवैन मेतत् सर्व्वेणान्नेन प्रीणाति ॥ ११ ॥

यद्वेवैनꣳ समुक्षति*। यत्रैव सर्व्वो ऽग्निः
संस्कृतस्तस्मिन् देवा एतद्रूप मुत्तम मदधुस्तथैवा-
स्मिन्नय मेतद्रूप मुत्तमं दधात्यन्नं वै रूप मेतदु
परम मन्नं यद्दधि मधु घृतं तद्यदेव परमꣳ रूपं
तदस्मिन्नेतदुत्तम दधाति सर्व्वतः समुक्षत्यपि
बाह्येन परिश्रितः सर्व्वत एवास्मिन्नेतद्रूप मुत्तमं
दधाति दर्भैस्ते हि शुद्धा मेध्या अग्रैरग्रꣳ हि
देवानाम् ॥ १२ ॥

यद्वेवैनꣳ समुक्षति। एतद्वै यत्रैतं प्राणा
ऋषयोऽग्रे ऽग्निꣳ समस्कुर्व्वं स्तदस्मिन्नदोऽमुं पुर-
स्ताद् भाग मकुर्व्वताद्ः सजूरब्दोय मथास्मिन्नेतꣳ
सञ्चित ऽउपरिष्टाद् भाग मकुर्व्वत तद्यत् समुक्षति

* 'समुक्षति' – इति ख। 'संमुक्षति'- इति ग।

य ऽएवास्मिंस्ते प्राणा ऋषयः सञ्चित ऽउपरिष्टाद्भाग मकुर्व्वत तानेवैतत् प्रीणाति दध्ना मधुना घृतेन तस्योक्तो बन्धुः ॥ १३ ॥

ये देवा देवानाम्। यज्ञिया यज्ञियाना मिति देवा ह्येते देवानां यज्ञिया उ यज्ञियानाᳬ संव्वत्सरीण मुप भाग मासत ऽइति संव्वत्सरीणᳬ ह्येत ऽएतं भाग मुपासत ऽहुतादो हविषो यज्ञे ऽअस्मिन्नित्यहुतादो हि प्राणाः स्वयं पिबन्तु मधुनो घृतस्येति स्वय मस्य पिबन्तु मधुनश्च घृतस्य चेत्येतत् * ॥ १४ ॥

ये देवा देवेषु†। अधि देवत्व मायन्निति देवा ह्येते देवेष्वधि देवत्व मायन्ये ब्रह्मणः पुर ऽएतारो ऽअस्येत्यय मग्निर्ब्रह्म तस्यैते पुर ऽएतारो येभ्यो न ऽऋते पवते धाम किञ्चनेति न हि प्राणेभ्य ऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्या

* 'चेत्येतत्'—इति ग।

† 'देवेषु' इति ख, 'देवेषु'—इति ग।

ऽअधि स्नुष्विति नैव तं दिवि न पृथिव्यां यदेव प्राणभृत्तस्मिंस्त ऽइत्यतत् * ॥ १५ ॥

द्वाभ्याᳫं समुच्छति । द्विपाद्यजमानो यजमानो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समुच्छति + ॥ १६ ॥

अथ प्रत्यवरोहति । प्राणदा ऽअपानदा ऽइति सर्व्वं ह्येते प्राणा यो ऽय मग्निस्थितः स यदेता मत्रा-त्मनः परिदां न वदेताव हैवास्यैष प्राणान् वृञ्जी-ताथ यदेता मत्रात्मनः परिदां वदते तथो हास्यैष प्राणान्न वृङ्क्ते प्राणदा ऽअपानदा व्यानदा वर्च्चो-दा वरिवोदा ऽइत्येतद्दा मे ऽसीत्येवैतदाहान्यांस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यᳫं शिवो भवेति यथैव यजुस्तथा बन्धुः ‡ ॥ १७ ॥

प्रत्येत्य प्रवर्ग्योपसद्भ्यां प्रचरति । प्रवर्ग्योप-

* 'इत्येतत्'—इति ग, घ ।

† 'समुच्छति'—इति [illegible] ।

‡ 'बन्धुः'—इति ङ ।

सम्राजं प्रचर्याथास्मै व्रतं वार्हव्रतं वा प्रयच्छत्यथ प्रवर्ग्योपसद्भ्या मथ प्रवर्ग्य मुत्सादयत्याप्त्वा तं कामं यस्मै कामायैनं प्रवृणक्ति ॥ १८ ॥

तं वै परिष्यन्द ऽउत्सादयेत् । तप्तो वा ऽएष शुशुचानो भवति तं यदस्या मुत्सादयेदिमा मस्य शुगृच्छेद्यदप्सूत्सादयेदपोऽस्य शुगृच्छेदथ यत् परिष्यन्द ऽउत्सादयति तथो ह नैवापो हिनस्ति नेमां यद्वाप्सु न प्राप्नुवति तेनापो न हिनस्त्यथ यत् समन्त मापः परियन्ति शान्तिर्वा ऽआपस्तेनो ऽइमां न हिनस्ति तस्मात् परिष्यन्द ऽउत्सादयेत् ॥ ॥ १९ ॥

अग्नौ त्वेवोत्सादयेत् । इमे वै लोका एषो ऽग्निरापः परिश्रितस्तं यदग्ना ऽउत्सादयति तदेवैनं परिष्यन्द ऽउत्सादयति * ॥ २० ॥

यद्वेवाग्ना ऽउत्सादयति । इमे वै लोका एषो ऽग्निरग्निर्वायुरादित्यस्तदेते प्रवर्ग्याः स यदन्यत्रा-

* 'ऽउत्सादयति' इति ख ।

न्नेतत्स्मादयं देतांस्तद्देवान् बहिर्द्धाभ्यो लोकेभ्यो दध्या-दथ यदग्ना ऽउत्सादयत्येतानेवैतद्देवानेषु लोकेषु दधाति * ॥ २१ ॥

यद्वेवाग्ना ऽउत्सादयति । शिर ऽएतद्यज्ञस्य यत् प्रवर्ग्य ऽआत्माय मग्निश्चितः स यदन्यत्राग्ने-रुत्सादयेद्बहिर्द्धाऽस्माच्छिरो दध्यादथ यदग्ना ऽउत्-सादयत्यात्मान मेवास्यैतत् संस्कृत्य शिरः प्रति-दधाति ॥ २२ ॥

स्वयमातृण्णया सᳪस्पृष्टं प्रथमं प्रवर्ग्य मुत्साद-यति । प्राणः स्वयमातृण्णा शिरः प्रवर्ग्य आत्माय मग्निश्चितः शिरश्च तदात्मानं च प्राणेन सन्तनोति सन्दधात्युत्साद्य प्रवर्ग्यं यथा तस्योत्सादनम् ॥ ॥ २३ ॥ ३ ॥

॥ इति प्रथमप्रपाठके तृतीयं ब्राह्मणम् [२. १.]

* 'दधाति'- इति ख

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे , तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

औपवसथ्यदिवसात् प्राचीने दिवसे कर्त्तव्यं प्रयोग मभिधाय तथा तस्मिन् दिवसे कर्त्तव्य मभिधत्ते । "उपवसथीयेऽहन् इत्यादिना । 'प्रातरुदित आदित्ये वाचं विसृजते' च यजमानः वाचं विसृज्येत् । अत्र पूर्वकाल मात्रे क्त्वा प्रत्ययः न हि तत्र पूर्वोत्तरप्रक्रियायाः समानकर्त्तृत्व मस्ति । यजमानस्य वाग्विसर्जनादध्वर्योराज्यग्रहणादिति पात्रो गगावाकारा स्थाली तु पिठरा कारा* उदखिल्या महामुखां व्यत्ययेन ङी-प्रत्ययः । "तदुपविष्टादिति । अत्र प्राच्यां स्थाल्यां वा दध्यादिद्रव्यं समासिक्तं तदुपविष्टादित्यर्थः ॥ १ ॥

अथाग्नि मारोहतीति "दर्भमुष्टिं निधायानन्तरम् तदाज्यं दध्यादिद्रव्यं समासिक्तं तदुपविष्टादादाय "नमस्ते † इति मन्त्रेणाग्नि मारोहेत् । अतएव कात्यायनः,— "उभय मादायाग्न्यारोहणं नमस्त इति‡ इति । आरोहणे नमस्त इत्यस्य मन्त्रस्य पूर्वार्द्धस्य पाठे प्रयोजन माह— "अथैष सर्वोऽग्नि रिति ।

* 'पिठराकाम् (कथि)त्या (?)'—इति ख ।
'पिठरांकां खल्यां'—इति भ ।
'पिठरूपकां उल्यां'—इति भ ।

† वा० सं० १७. ११ ।

‡ का० श्रौ० सू० १८. ३. ५ ।

अत्राग्निचयनप्रसङ्गे एषोऽग्निः सर्वः संस्कृतः शाकल्येन कृतसंस्कारः अतोऽत्र स एषोऽग्निः यं हस्तु हिंस्यात् यं जिहिंसिषेत् तस्मै अलं समर्थं हननेच्छयाहननस्य चेत्युभयस्यापि समर्थं स च यं हिनस्ति एनं 'हरसा शोचिषा वा हिनस्ति'। अतश्चास्य मन्त्रभागस्य पाठेन एनम् अध्वर्युं एते हरःप्रभृतिभि र्न हिनस्ति। हरः इति हरणसमर्थं तेजः शोच इति शोचनसमर्थं अर्चिरिति दहने प्रशस्तं तेजः। मन्त्रस्य द्वितीयार्धं स्पष्टार्थ मित्याह। अन्यांस्ते अस्मदिति हे अग्ने हरसे नमोऽस्तु शोचिषे नमोऽस्तु तथा ते अर्चिषे नमोऽस्तु। अन्यांस्ते अन्यान् अस्मच्छत्रून् ते हेतयः हरः प्रभृतय स्तपन्तु। अस्मभ्यन्तु त्वं पावकः शिवश्च भव ॥ २ ॥

अग्नि मारुह्य किं कुर्यादित आह— "आरुह्याग्नि मिति। प्रथम मध्यमोत्तमासु चितिषु तिस्रः स्वयमातृण्णा उपधीयन्ते। तत्र तृतीयायां स्वयमातृण्णायां व्याघारणक्रियाया इष्टितमत्वात् मध्यमो स्वयमातृण्णा मिति द्वितीया व्याघारणं नाम एकस्मात्कोणात्कोणान्तरं प्रत्याज्यधाराघारणम्। तच्च व्याघारणं पञ्च गृहीतमाज्येन क्रियेतेति * तस्योभयस्य ब्राह्मणं प्रागुक्त मित्याह— "आज्येनेति ॥ ३ ॥

अथ व्याघारणस्य स्वयमातृण्णा धारकत्वं प्रशंसति। स्वयमातृण्णायाः प्राणत्वं सप्तमकाण्डे † ऽभिहितम्। प्राणो वै स्वय-

* का० श्रौ० सू० १८. ३. ६।

† पुरस्तात् ७का० ४अ० २ब्रा० १ कण्डी (पृ० २६३ प० १६)।

मात्हसा प्राणोह्येवैतत् स्वयमात्मन आहन्ते इति। एतच्चाग्नि-सम्बन्धिनि प्राणे तदाज्यस्वरूपमन्त्रविहितवान् भवति। प्रका-रान्तरेणापि स्वयमातृणायां व्याघारण मुपपादयति ॥ ४ ॥

यद्वेवेति। एषा स्वयमातृणा अग्ने रुत्तरवेदिः (वसु। अथ या ममुम् बुद्धी परामर्श पूर्वा मुत्तरवेदिं व्याघारयति। सा पुनः सोमयागस्य अतोऽस्यां स्वयमातृणायां व्याघारणाय उत्तरवेदिः) * तर्हि तद्व्याघारणे पूर्वोत्तरवेदिवत् ॥ ५ ॥

हिरण्यदर्शमादि † पूर्वकालेन भवितव्य मित्यत आह— "पञ्चं स्वत्वेति। प्रत्यक्षं सोत्तरवेदिसंयुक्तमन्त्रादि निर्मितत्वा-भावेनोपचारिकोत्तरावदित्यादित्यर्थः ॥ ६ ॥

स्वाहाकारस्य सर्वत्र हविःप्रदानसाधनत्वेन प्रत्यक्ष वैट्-कारस्य ‡ तु तयाभावेन परोक्षत्वं आज्येन पञ्चगृहीतेन व्यतिहार मुत्तरं वेदेर्व्याघारणात् तथैवास्या अपि उत्तर-वेदित्वेन व्याघारण मुपपन्न मित्याह। "आज्येनेत्यादिना। व्यतिहार मित्यनेन पूर्वं दक्षिणांसे व्याघारणं तत उत्तरश्रोणौ पश्चाद्दक्षिणश्रोणौ तत उत्तरांसे तत मध्ये इत्ययं क्रमो विवक्षितः ॥ ७ ॥

अथ क्रमेण मन्त्रान् प्रदर्श्य व्याचष्टे। "नृषदे वेडिति नृषु सीदतीति। नृषत् इति प्राणव्यतिरिक्त मपि वक्तं

---

* 'वस्वग्नीषित्वात्तः प्रदर्शितः पाठो ब-पुस्तकमात्रे नास्ति

† का० श्रौ० सू० १८. ३, ७।

‡ वा० सं० १७. १२।

गच्छत इति विवक्षितोऽर्थो दर्शितः— "प्राणो वै नृषदिति। नृषदित्यत्र नृ-शब्दस्य प्रसिद्ध एवार्थो विवक्षितो नेतर इत्युक्तं मनुष्या नर इति एतत् मन्त्रसाध्यव्याघारणस्य फल मुक्तम्। "तद्योऽय मिति। वेडिति सम्प्रदानार्थीयो निपातः। नृषदे मनुष्येषु वर्त्तमानाय प्राणरूपायाग्नये वेट् इद माज्य-रूपं हविर्दत्त मित्यर्थः। "अय मग्निः स्वर्विदिति। 'अयं' सञ्चितोऽग्निः 'स्वर्वित्' स्वर्गं लभयतीति स्वर्वित् अष्टाव मन्यत् ॥ ८ ॥

प्रकारान्तरेण मन्त्राणा मभिधानं प्रशंसति— "यद्देवाह अप्सुषदे वेडिति * इत्यत्रेति शब्दः प्रकारवाचीनेन बर्हिषदे वेडित्यादीन्यपि संगृहीतानि भवन्ति। एतानि नृषदित्या-दीनि अस्यैव सञ्चितानेर्नामानि अस्य सर्वात्मकत्वेन मनुष्यादि-स्थिताग्न्यात्मकत्वात्। अत एनेन नान्येवनामानि प्रीणित-वान् भवति। न केवलं तेषां प्रीणनं अपि तदेव नाम-सम्पत्तिरपीत्याह,— "तानीति। 'यस्यै खलु देवतायै हविर्गृह्यते सा देवता न' भवति। अतोऽत्र नृषदादि नामानि चतुर्थ्यं तान्युच्चार्यहोमविधानात्तदर्थं हविर्ग्रहण मिति हविषा तानि नामानि देवतां कृतवान् भवति। किञ्च नृषदादि शब्दाभि-धेयानाग्निनामशाह मस्मिन् सञ्चितेऽसौ निदधाति ॥ ९ ॥

आहुतीनां पञ्चत्वसङ्ख्याग्नेः कात्स्न्येन प्रीति र्भवतीत्याह,—

* का० श्रौ० सू० १८. ३. ६। वा० सं० १७. १२।

"पञ्चैता इति। पञ्चगृहीत माज्यं दध्यादिकञ्चेत्युभय मप्यस्मे-श्वपयानीतं तत्राज्यस्य विनियोगोऽभिहित: ॥ १० ॥

अथावशिष्टस्य विनियोग माह— "अयेन मिति। तदु-पयोग माह. "जायत एष इति ॥ ११ ॥

दध्यादीनां बहुत्वात् सर्वाङ्गत्वं विहितं तत् समुच्चयं परिश्रितो बहिरपि कर्त्तव्य मित्याह,— "सर्वत इति *।उपरिष्टाद्दर्भमुष्टिं निदधातीत्युक्तान् दर्भान् समुच्चये विनियुज्य प्रशंसति— "दर्भै रिति। 'अपं हि देवाना मिति' हि शब्द: शाखान्तरप्रसिद्धिं द्योतयति। अतएव तैत्तिरीयके श्रूयते,— "यत् पवित्रं तद्देवाना मिति" †। अथ ते दध्यादिभि: समुच्चये तस्मिन् संस्कृतेऽग्नौ उत्तमरूपनिधानं भवतीति प्रशंसति। यद्देवेति 'अन्नं वै रूप' मित्यादिना परमरूपत्व मुपपाद्यते। अन्नस्तावद्रू-पकारणत्वाद् रूपं परमत्वं तु दध्यादीनां रसातिशयवत्त्वादिति दध्यादीनि परमं रूप मित्यर्थ: ॥ १२ ॥

अथ पुनस्तान्येव दध्यादीन्यग्नेरुपरिष्टाद्गमनरूपेण प्रशं-सति— "यद्देवैन मिति। अग्ने पूर्वं 'यत्र' यस्मिन्नवसरे ऋषिशब्दाभिधेया: 'प्राणा' विस्रस्तं प्रजापतिं 'समस्कुर्वन्' तदद: काले 'अद:' शब्दस्तस्य कालस्य विप्रकर्ष मभिधत्ते। 'अमुं भाग' मकुर्वत 'अमु' मित्यपि विप्रकृष्टो भाग उच्यते।

---

* "सर्वत: समुच्चयपि बाह्येन परिश्रित इति"—इति का० श्रौ० सू० १८. ३. ८।

† तै० ब्रा० १. ६. ८. ६।

'अमुं भाग' मिति यदुक्तं तदेवाह अत: (!) 'सजूरब्दीय' मिति सजूरब्दो ऽयवोभिरित्येतेन मन्त्रेण प्रतिपादितं होमरूप मत्र' अथास्मिन् सञ्चितेऽग्नौ एवं तं दध्यादिलक्षण मुपरिष्टाद्भाग मकुर्वतानेव प्रीणाति। सञ्चितस्याग्ने: प्राणविशिष्टत्वेन प्राण-रूतोऽग्नेर्भाग: प्राणाना मपि भवतीति तस्याग्नेरनेनोपरिष्टाद् भागेन 'तानेव' प्राणान् प्रीणितवान् भवतीत्यर्थ:। दध्यादि-विषयं ब्राह्मणम् प्रागुक्त मित्याह,— दध्नेति। तत्र सप्तम-काण्डे कूर्मोपधानकथनावसरेऽभिहितम् * ॥ १३ ॥

अथ समुच्चये प्रथमं मन्त्र दर्शयन् व्याचष्टे— "ये देवा देवाना मिति † देवा 'यज्ञियानां' यज्ञार्हाणा मपि यज्ञिय' तत् पूर्व कथ मेव सर्वेषां यज्ञार्हत्वादित्यर्थ: द्वितीय तृतीय मादौ प्रसिद्धार्थी वित्याह 'संवत्सरीणा' मिति। एतस्य समुच्चयस्य संवत्सराद् क्रियमाणत्वादेतत् 'संवत्सरीणो भाग' यत: प्राणादध्यादीनाहुता-न्येषादग्नि अतोऽहुतादौ 'हविष' इत्युक्तम्। चतुर्थपादे मधुनो घृतस्येत्यनेन प्रकृत मेव मध्वादि उच्यत इत्याह— ("संवत्स-रीणा मिति। एतस्य समुच्चयस्य संवत्सराद् क्रियमाणत्वा-देतत् 'संवत्सरीणो भाग' यत:) ‡ स्वधमस्येति ॥ १४ ॥

अथ द्वितीय मन्त्र' व्याचष्टे—"ये देवा देवेष्विति §। 'देवाश्चेते'

* पुरस्तात् ७ का० ४ प्र० १ ब्रा० १ कण्डी।

† वा० सं० १७. १३।

‡ बन्धनीचिह्नान्त: प्रदर्शित: पाठो ज-पुस्तकमात्रे अधिक:।

§ वा० सं० १७. १४।

इति। एते देवाः प्राणादेवेषु 'अधि देवत्वं' अधिका देवास्तेषां भाव स्तत्व 'मायन्' प्राप्नुवन् ताम्प्रति स्तेषा मुपजीव्यत्वात्। अत उक्तं 'ये देवा देवेष्विति' द्वितीयपादे सर्वात्मकत्वम्। ननु हव्यत्वाद्ब्रह्मशब्देनाग्नि रुच्यत इत्याह,— "अयमग्निरिति। तृतीयपादः प्रसिद्धार्थ इत्याह—"न हि प्राणेभ्य इति। तुरीयपादे ऽभिप्रेतं विशेषमाह्वानेवति इति। 'ते' प्राणादित्यपि 'न' सन्ति पृथिव्या मपि न सन्ति 'किं' तु यदेव प्राणभृद्वस्तु तस्मिन् सन्तीत्ये-तदुक्तं भवति। देवाना मपि देवा यज्ञियाना मपि यज्ञिया ये प्राणाः संवत्सर सम्बन्धिनं भाग मुपासते। अस्मिन् पक्षे हविषा हुतांशस्यात्पर स्ते स्वयमस्य मधुनो घृतस्य पिबन्तु मधुनो घृतस्येति व्यत्ययेन कर्मणो षष्ठी, मधु घृतं उपलक्षण मेतत्। दध्यपि पिबंत्विति प्रथमस्यार्थः। ये देवाः देवेष्वपि अधिक-देवत्वं प्राप्नुवन् किञ्च ये अस्या अग्नेः पुरो गन्तारो भवन्ति येभ्यो विना किञ्चिदपि शरीरं न प्रवर्त्तते प्राणा दिवः सानुषु पृथिव्या अपि सानुषु न सन्ति। किन्तु यदेव प्राण-भृत् तत्रैव सन्तीति द्वितीयस्यार्थः। 'सानु' शब्दस्य (यदा-दिषु मास्तत् स्नुना मुपसङ्ख्या मितिसु .पादेशम्। समुच्चय-मन्त्रयो र्द्वित्वसङ्ख्यां अग्नेः समुच्चयसाकल्ये हेतुत्वेन प्रशंसति ॥१५॥

"द्वाभ्या मिति। यजमानस्याग्निचयनेनाग्नित्वप्राप्ते यजमाना-ऽग्निः समुच्चयानन्तरम् प्रत्यवरोहेदित्याह यथेति) * ॥ १६ ॥

---

* बन्धनीयविश्रान्तः प्रश्निनः पाठो नास्ति ग-पुस्तकादन्यत्र।

अवरोहणमनुमजपस्थानयनव्यतिरेकयो गुणादोषावाह 'सर्वं वैत' इत्यादिना 'योऽय मग्नि' वचनेन संस्कृतः एष सर्वे प्राणाः प्राजापत्यात्मकत्वात् सर्वेषां प्राणा इत्यर्थः। अतः सोऽध्वर्यु रवावसरे यदि 'भागम' एनां "प्राणदा * इत्येतान् मन्त्ररूपां प्राणरक्षणं न वदेत तर्हि एषोऽग्निरस्याध्वर्योः 'प्राणान् वृञ्जीत' वर्जयेदपगमयेदित्यर्थः। प्राणादेत्यादिमन्त्ररूप परिदाभिधाने तु तथा न कुर्यात्।

इत्थं मन्त्ररूपस्योपयोग मभिधायाय मन्त्रं व्याचष्टे— "प्राणदा इति † । "एतद्वा मेऽसीत्येतदिति। 'मे' मदर्थं एनां प्राणादीनां मासीत्येतदेवोक्तं भवति न पुनरन्यार्थ मित्यर्थः। हे अग्ने त्वम् मे प्राणापानाव्यानानां वर्चसो धनस्य च दातासि। अतो ब्रवीमि ते हेतयो ऽस्मादन्यां 'तपन्तु' 'अस्मभ्यं' तु 'पावकः शिवश्च भव' ॥ १७ ॥

अग्नेरवरुह्य पश्चात् कर्तव्यं प्रयोग माह— "प्रत्येत्येति। अथास्मा इति 'अस्मै' यजमानाय 'व्रतं' पयः कृत्स्नं 'वा अर्ध-व्रतं प्रयच्छति' 'अथ' तदा मेवोपराह्निकाभ्यां 'प्रवर्ग्योपसद्भ्यां प्रचर्य' अथ प्रवर्ग्यं मुत्सादयति 'यस्मैकामायैनं प्रवृणक्ति' तस्य कामस्याप्तेः स्यात् इत्यर्थः ॥ १८ ॥

'प्रवर्ग्य मुत्सादयति' सामान्येन विधानात्तत्र क्वचित् प्रसक्ता-वाह,— "तं वा इति। परितः स्कन्दो जलस्रवणं यस्य

* "प्राणदा इत्यवरोहति"—इति का० श्रौ० सू० १८. ३. ८।
† वा० सं० १७. १५।

परिष्यन्दो द्वीपः * ननु पृथिव्या मप्सु वा कस्मान्नोत्साद्यत इत्याह,— "तप्तो वा इति एष प्रवर्ग्यः समन्ताच्छोक-विशिष्टो भवति। अतस्तं यदि पृथिव्यां मुत्सादयेत् तदा तस्य शोकः पृथिवीं प्राप्नोति। अथ यद्यप्सु उत्सादयेत् तस्याप्स शोकापः प्राप्नोति। तस्मात् तत्र नोत्सादनीयः किन्तु परिष्यन्दे तथा च पृथिवी मपश्च न हिनस्ति ननु परिष्यन्द उत्सादनेऽपि तच्च तदुभय सम्भवात् कथं तासां हिंसाभावः इति। तत्राह,— "यदद्भ्यामिति। अपां मध्ये-मुत्सादयो हिनस्ति यद्द्वीपे पृथिव्यो मिवोत्सादयति। तथा परिमितः शान्तिहेतु भूताभिरद्भिर्वेष्टितत्वात् पृथिव्या अपि हिंसानास्तो इत्यर्थः ॥ १९ ॥

प्रवर्ग्योद्वासनस्य स्थानान्तरं विधत्ते— "अग्नौ त्वेवेति। पूर्वोक्त परिष्यन्दे अग्नौ वा प्रवर्ग्य उत्साद्यते इति विकल्प-विधान मेतत्। अतएव कात्यायनः— "अग्नौ परिष्यन्दे वा इति †। तत्तस्य प्रवर्ग्यस्य परिष्यन्द एवोद्वासने कस्यचिदपि बाधाभावादस्याप्यग्नेः परिष्यन्दत्व माह— "इमे वै लोका इति। पृथिव्यादिलोकात्मकस्याग्नेः समुद्रवद्वेष्टनात् परिश्रिता-मिवात्मकत्वम् ॥ २० ॥

---

* "अग्नौ इष्टकाचितः स्थलरूपे ० परिष्यन्दे यस्य परितः आपः स्यन्दन्ते परिगच्छन्ति परिष्यन्दो द्वीपः जलमध्यस्थो जलानाच्छादित उच्चप्रदेशः"—इति का० श्रौ० सू० १८. ३. ११।

† "उपवसन्ते प्रवर्ग्योत्सादनं यथोक्त मग्नौ परिष्यन्दे वा"—इति का० श्रौ० सू० १८. ३. १०।

अथाग्नावेवोद्वासनं प्रशंसति,— "यद्वेवेति। अग्न्यादयो देवादीप्यमानत्वेन 'प्रवर्ग्याः' अतश्च लोकत्रयात्मकादग्नेरन्यत्र प्रवर्ग्योत्सादने अग्न्यादीनेवैतेभ्यो लोकेभ्यो बहिर्धा कुर्यात्। अग्नौ तदुद्वासने तु एष्वेव लोकेषु अग्न्यादीन्निहितवान् भवति। अग्नावुत्सादयतीति लोपः शाकल्यस्येति * यकारस्य लोपः॥ २१॥

अथ पुनस्तत्रैवोद्वासनं यज्ञस्य शिरः शरीरसन्धानरूपेण प्रशंसति;— "यद्वेवाग्ना उत्सादयतीति॥ २२॥

यदा त्वग्न्यावुत्सादनं तदोद्वासने विशेष माह— "स्वयमातृण्ण-येति। 'प्रथमं प्रवर्ग्यं' स्वयमातृण्णाया 'संसृष्ट' मुद्वासयेत्। एवञ्च स्वयमातृण्णायाः † प्राणरूपत्वात् प्रवर्ग्यात्मकस्य यज्ञस्य शिरसः सञ्चिताग्न्यात्मकस्य यज्ञशरीरस्य प्राणेन सन्धानं करोति। "सन्द-धातीति। अत्रैव विवरणं 'उत्साद्य प्रवर्ग्य मिति'। तस्य प्रव-र्ग्यस्य यथा येन प्रकारेण प्रवर्ग्यकाण्डोक्तप्रकारेण उत्सादन मुक्तं तेन प्रकारेण प्रवर्ग्य मुत्सादयेत् प्रत्येत्याग्निं प्रहरिष्यन्नित्या-द्युक्तकालक्रियःप्रवर्ग्योत्साद्येति ल्यबन्तस्य प्रयोगः॥ २३॥ १॥ २॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे द्वितीयाध्याये प्रथमं ब्राह्मणम्॥

* पा० सू० ८. ३. १९।

† का० श्रौ० सू० १८. ३. १२।

॥ अथ द्वितीयं ब्राह्मणम् ॥

प्रत्येत्याग्निं प्रहरिष्यन्* । आहुतीश्च जुहोति समिधश्चादधात्येतद्वा ऽएनं देवा एष्यन्तं पुरस्ताद-न्नेनाप्रीणन्नाहुतिभिश्च समिद्भिश्च तथैवैन मय मेत-देष्यन्तं पुरस्तादन्नेन प्रीणात्याहुतिभिश्च समिद्भिश्च स वै पञ्चगृहीतं गृह्णीते तस्योक्तो बन्धुः† ॥ १ ॥

अथ षोडशगृहीतं गृह्णीते । षोडशकलः प्रजापतिः प्रजापतिरग्निरात्मसम्मितेनैवैन मेतदन्नेन प्रीणाति यदु वा ऽआत्मसम्मित मन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत् कनीयो न तदवति समान्याᳬ स्रुचि गृह्णीते समानो हि स य मेतत् प्रीणाति विश्वकर्मणाभ्यां जुहोति विश्व-कर्माय मग्निस्त मेवैतत् प्रीणाति तिस्र ऽआहुती-

---

* 'प्रहरिष्यन्'—इति ग, घ ।

† 'बन्धुः'—इति ङ ।

जुहोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतै-
वैन मेतदन्नेन प्रीणाति * ॥ २ ॥

अथ समिध ऽआदधाति । यथा तर्प्पयित्वा
परिवेविष्यात्ताद्दृक्तदौदुम्बर्यो भवन्त्यूर्ग्वै रस उदुम्बर
ऽऊर्ज्जैवैन मेतद्रसेन प्रीणात्यार्द्रा भवन्त्येतद्वै वन-
स्पतीना मनार्त्तं जीवं यदार्द्रं तद्यदेव वनस्पती-
ना मनार्त्तं जीवं तेनैन मेतत् प्रीणाति घृते न्युत्ता
भवन्त्याग्नेयं वै घृतꣳ स्वेनैवैन मेतद् भागेन स्वेन
रसेन प्रीणाति सर्व्वाꣳ रात्रिं वसन्ति तथ हि
ता रसेन सम्पद्यन्ते तिस्रः समिध आदधाति
त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेत-
दन्नेन प्रीणाति ॥ ३ ॥

यद्वेवैता आहुतीर्जुहोति । एतद्वा ऽएनं
देवा ऽएष्यन्तं पुरस्तादन्नेन समस्कुर्व्वन्नेताभिरा-
हुतिभिस्तथैवैन मय मेतदेष्यन्तं पुरस्तादन्नेन संस्करो-
त्येताभिराहुतिभिः ॥ ४ ॥

† * 'प्रीणाति'—इति ख ।

स वै पञ्चगृहीतं गृह्णीते । पञ्चधाविहितो वा ऽअयꣳ शीर्षन् प्राणो मनो वाक् प्राणश्चक्षुः श्रोत्र मेत मेवास्मिन्नेतत् पञ्चधाविहितꣳ शीर्षन् प्राणं दधात्यग्निस्तिग्मेन शोचिषेति तिग्मवत्या शिर ऽएवास्यैतया सꣳश्यति तिग्मतायै ॥ ५ ॥

अथ षोडशगृहीतं गृह्णीते । अष्टौ प्राणा अष्टावङ्गान्येता मभि सम्पदꣳ समान्याꣳ स्रुचि गृह्णीते समाने ह्येवात्मन्नङ्गानि च प्राणाश्च भवन्ति नाना जुहोत्यङ्गेभ्यश्च तत्प्राणेभ्यश्च विधृतिं करोति वैश्वकर्म्मणाभ्यां जुहोति विश्वकर्म्मायमग्निस्त मेवैतत् संस्करोति विश्व ऽआहुतिर्जुहोति विश्वदग्नि-र्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदन्नेन संस्करोति सप्तदशभिर्ऋग्भिः सप्तदशः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् संस्करोत्येकविꣳशतिगृहीतेन द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअसावादित्य ऽएकविꣳश ऽएता मभिसम्पदम् ॥ ६ ॥

यद्देवैताः समिध ऽआदधाति । एतद्वा ऽएनं देवाः सर्व्वं कृत्स्नꣳ संस्कृत्याथैन मेतेनान्नेनाप्रीणन्नेताभिः समिद्भिस्तथैवैन मय मेतत् सर्व्वं कृत्स्नꣳ संस्कृत्याथैन मेतेनान्नेन प्रीणात्येताभिः समिद्भिरौदुम्बर्यो भवन्त्यार्द्रा घृते न्युत्ता सर्व्वाꣳ रात्रिं व्यसन्ति तस्योक्तो बन्धु रुदेन मुत्तरां नयेन्द्रेमं प्रतरां नय यस्य कुर्म्मो गृहे हविरिति यथैव* यजुस्तथा बन्धुस्तिस्रः समिध ऽआदधाति त्रिवृदग्नि-र्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदन्नेन प्रीणाति तिस्र ऽआहुतीर्जुहोति तत् षट् तस्योक्तो बन्धुः ॥ ७ ॥ १ ॥

॥ इति प्रथमप्रपाठके चतुर्थं ब्राह्मणम् [२. २.]

प्रवर्ग्योद्वासनानन्तरं सञ्चिते इष्टकासमूहे स्थापनायाग्निं प्रवेतुं तावद्गार्हपत्ये आज्यहोमं समिद्धोमं च विधत्ते— "प्रत्येताग्नि मिति । प्रहरिष्यन् प्रवेष्यन्नित्यर्थः । विहित-

---

* 'यथा यजुस्तथा'—इति ग, घ ।

होम आहवनीयप्रदेशं समिद्धस्याग्नेः * प्रथमाय पुरस्ताद्धेन † सम्पाद्यत इत्याह एतद्वा एन मित्यादिना आहुतिभिः समिद्धिरित्येतदनेनेत्यस्य विशेषणं आहुति समिद्रूपेणेत्यर्थः। आहुतिभि र्जुहोतो सामान्येन विधानात् कथं होमप्रकार इत्यपेक्षया माह – "स वै पञ्च गृहीत मिति। आज्यं पञ्चगृहीतं यथा भवति तथा गृह्णीतेत्यर्थः। तस्य तु "पञ्च वा ऋतव" ‡ इत्यादिकं ब्राह्मणं प्रागुक्तम्। अनेन पञ्चगृहीतमाज्येनैकाहुतिः सम्पाद्यते ॥ १ ॥

अथ षोडशगृहीत माज्य गृह्णीते, अष्टौ प्राणा अष्टावङ्गानीत्येते: § षोडशावयवः प्रजापतिः अयं च ह्रयमाणोऽग्निः प्रजापत्यात्मकः अतस्तस्य षोडशगृहीत माज्यमदृश ममं न भवतीति तदुचितेनैवान्नेनैनं प्रीणाति। लोके हि यदेवान्न मात्मसंमितं तदेव रक्षति न च हिनस्ति भूयो हिंसकत्वादल्पस्य त्वपर्याप्तत्वेनारक्षकत्वादिति। अत्र षोडश गृहीतं समं विभज्य द्वे आहुती क्रियेते। अतश्चाहुतिभेदेन पृथगेव मन्त्रप्रक्षेपावाह,— "समान्या मिति। समान्या मेकस्या मेव स्रुचि गृह्णीत-

---

* 'समिध्यातामेः'—इति ङ, 'गमिध्यमाये:'—इति ञ, 'समिध्यातामेः'—इति भ ञ।

† 'पुरस्ताद्धर्मेन'—इति ङ भ, ञ।

‡ इहैव पुरस्तात् ८. ५. १।

§ 'अष्टावङ्गानीतीमे'—इति ङ, 'अष्टावङ्गातीति'—इति ञ।

षोडशगृहीत माज्यं सदैव गृह्णीयादित्यर्थः। आहुतिभेदेऽपि कथ मेकं गृह्णीत इत्यत आह— "समानो होति। एतेन षोडशगृहीतेनाज्येन यं प्रीणाति तस्याग्नेरेकत्वादित्यर्थः। प्रकृतेन षोडशगृहीतेनाज्येन साध्यौ द्वौ होमाविति दर्शयन् मन्त्रे वर्णिता देवता सम्बन्धस्याग्नये प्रकृतहोमे समवेतार्थ माह— "वैश्वकर्मणाभ्या मिति। वैश्वकर्मणशब्द उद्भिदादि शब्दवत्कर्मनामधेयं अग्नेः प्राजापत्यात्मकत्वेन विश्व विषय-कर्मवत्वाद्विश्वकर्मत्वम्। पञ्चगृहीतेनाज्येनैकाहुतिः षोडश गृहीतेन द्वे आहुती इति। तिस्र आहुतयः सम्पद्यन्ते सा च त्रिवत्सप्रासकलस्य अग्नेस्तृप्ति हेतु र्न भवतीत्याह,— "तिस्र आहुती र्जुहोति त्रिवृदग्नि रिति। आहुतीश्च जुहोति समिधश्च दधातीति होमद्वय मपि सामान्येन विहितम्। तत्राज्याहुतीनां होमप्रकारोऽभिहितः॥ २॥

अथ समिधां होमे विशेष मभिधातु माह— "अथ समिध इति। यथा तर्पयस्वेति लोके जनः किञ्चित् पुरुष मन्येन तर्पयित्वा पश्चादन्नविशेषाणां परिवेषणं करोति तद्वदेवाय मपि समिद्धोमो भवति। आज्याहुतिलक्षणस्याग्नस्य प्रथमं सम्पादितत्वादित्यर्थः। परिवेविष्यादित्यत्रिषे यङ्लुगन्तस्य लिङ्गि रूपं ताश्च समिध औदुम्बर्यो भवेयु रित्याह— "औदुम्बर्य इति। उदम्बरस्य ऊर्गूपरसात्मकत्वात्तेनैवैनं प्रीणातीत्याह— "ऊर्ग्वा इति। एतद्वै वनस्पतीना मित्यादिकस्याय मर्थः। आर्द्राः आर्द्रत्वं गुण इति यत् एतद्वनस्पतीना मार्द्र मनुप्रहृतं जीवं

आर्द्रतराणा मुपजीवत्वात् ; अत आर्द्राभि: समिद्भि र्होमे तेन जीवेनैनं प्रीणाति। अग्नौ ह्रूयमानस्य घृतस्य समिदादिवद् भस्मो भावात्। केवलं ज्वालारूपेण परिणामादाग्ने यद्येधं मतएव श्रूयते। एतद्वा अग्ने: प्रियं धाम यदाज्य मिति (ता: समिध: पूर्वद्युरार्द्रा सर्वस्या मेव घृते वसन्ति। सर्वा रात्रिर्तीत्य-न्यस्यां योगे द्वितीया तत्तथा निवासे हि) * ता: रसेन सम्पन्ना भवन्तीति। अत स्तथाविधाभि समिद्भि र्होमे स्वकीयेन रसरूपेण तापनेन मग्निं प्रीणितवान् भवतीति। "समिध आदधातीति। सामान्येन बहुत्वविधाना त्तद्विशेषे पर्यवसान माह— "तिस्र इति। ताश्च त्रित्वसङ्ख्यां सकलाग्निप्रीतिर्हेतुत्वेन प्रशंसति ॥ ३ ॥

"यद्दैवैता इति। समस्कुर्वन्निति आह्वनीयरूपतानुगुण-संस्कार विशिष्ट मकुर्वन्नित्यर्थ: ॥ ४ ॥

तत्र प्रथमाहुत्यर्थं पञ्चवार ग्रहणं अपे: शीर्षस्य प्राण-पञ्चको नमरूपेण प्रशंसति— "स वै पञ्च गृह्णीत मिति। वा-गिति वागिति मुखं प्राण इति प्राणं चक्षुर्द्वयं च द्वौ प्राणौ एतै मन:सहितावागादय: शिरसि पञ्चधिहित: प्राणा: अतस्य पञ्चवार-ग्रहणेनास्मिन्नग्ने: शिरसि मन:प्रभृति प्राणपञ्चकं निदधाति। होममन्त्रस्य तिग्मपदसम्बन्धं प्रशंसति— अग्नेर्स्तिग्मेनेतिग्म-शब्दस्य तैक्ष्ण्यवाचकत्वात् तद्दत्या ऋचा होमेन तैक्ष्ण्यासिद्ध-येऽग्ने: शिरस्तीक्ष्णं करोति पश्यन्तीति शो तनूकरणे अस्मा-ल्लटि श्यतिर्नुत: श्यतीत्योकारलोप: । अथ तदाहुति द्वयार्थं

---

* बन्धनोचिह्नान्त: प्रदर्शित: पाठो ज-पुस्तकमात्रे नास्ति।

षोडशवारग्रहणं प्रशंसति, (प्रसिद्धान्यष्टावङ्गानि । एतासां सम्पदमभिलक्ष्य षोडशगृहीतस्य ग्रहणं अग्निचितौ प्राणाङ्गा-ष्टकं सम्पादनार्थं षोडशवारं गृह्णीत इत्यर्थः। एकस्मिन्नेव शरीरे अङ्गानां प्राणानाञ्चावस्थानात् षोडशगृहीत मेवस्तु विगृह्णीति *) होमन्तु पृथगेव करोति। एवं च अङ्गानां प्राणानाञ्च विधृतिं विभेदेन धारण मसङ्कीर्णतां करोति। तयो र्होमयो र्वैश्वकर्मणत्वाद्विश्वकर्मशब्दाभिधेय मग्निं संस्क-रोति। आहुतीनाञ्च चित्याचितिहोमैः सकलस्यापि संस्कारं सम्पादयति। अथाग्निस्तिग्मेनेत्यनया ऋचा पञ्चगृहीतं हूयते य इमा विश्वेत्यादिभिरष्टाभिर्ऋग्भिः षोडश गृहीतार्धं हूयते अवशिष्टं चक्षुषः पितेत्यादिभिरष्टाभि † र्हूयते। अतएव कात्या-यनः ; — "पञ्च गृहीतं जुहोत्यग्निस्तिग्मेनेत्यृचा षोडशगृही-तार्धं मनुवाकशेषेण" "चक्षुषः पितेत्य परमनु वाकेन"—इति ‡। एवं सर्वाः सम्भूय सप्तदश भवन्ति ता एतान् सङ्ख्या कृत्वाग्निसंस्कारहेतुत्वेन प्रशंसति, — "सप्तदशभि ऋग्भिरिति। प्रजापतेः सप्तदशत्वं तैत्तिरीयके श्रुतम्,—"आश्रावयेति चतुरक्षर मस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिः"—इति §।

---

* बन्धनीचिह्नान्तः प्रदर्शितः पाठो नास्ति ज-पुस्तकादन्यत्र।

† "पितेत्यादिभिर्हूयते"—इति ज।

‡ का० श्रौ० सू० १८. ३. १२-१४।

§ तै० आ १. ६. ११

अथवा अष्टौ प्राणा अष्टावङ्गानि स्वय मेक इति सप्तदशात्मकः मिलितां षड्पसङ्ख्यां प्रशंसति,— "एकविंशति ग्रहीतेने ति । "द्वादश मासाः पञ्चर्त्तव स्त्रय इमे लोका असावादित्य एकविंश" एता मभिलक्ष्य एकविंशति गृहीतेन क्रूयते । एतस्याग्नेर्यथोक्तैकविंशात्मकत्व सम्पादनापेकविंशति गृहीतेन होम इत्यर्थः ॥ ६ ॥

अथ समिधां होम प्रकारान्तरेण प्रशंसति,— "यद्वेवैता इति । अर्थं यथा तर्पयित्वा परिवेष्यादिति आज्याहुतिलक्षणेनाज्येन तर्पितस्याग्नेः समिद्धोमः परिवेषणवद्भवतीति प्रशंसितः । इदानीन्तु एकविंशति गृहीत होमेन एकविंशत्यात्मकत्व सम्पादनात् कार्त्स्न्येन संस्कृतस्याग्नेरन्नरूपेण प्रशस्यत इति न पौनरुक्त्यम् । सञ्समित्स्वस्यैवार्थं कथनं कत्स्न मिति "औदुम्बर्यो भवन्त्यार्द्रा घृते न्युप्ता सर्वां रात्रिं वसन्ति"–इति यदस्ति तस्य ऊर्ग्वा उदुम्बर इत्यादिरूपं ब्राह्मण मनन्तर मेवोक्तं तदेवानुसन्धेयेत्यर्थः । प्रकृतानां समिदाहुतीनां मन्त्रा निगदव्याख्याता इत्याह—"उदेन मुत्तरान्नयेति *। "उदेन मुत्तरान्नयेत्यादिकः प्रथमो मन्त्रः, "इन्द्रेमं प्रतरान्नयेत्यादिको द्वितीयः † "यस्य कुर्मो गृहे हविरित्यादिक स्तृतीयः ‡, एतेषां यथा मन्त्रस्य तथैव ब्राह्मणं स्पष्टार्थां इत्यर्थः । "तिस्रः समिध" इत्येत-

---

* वा० सं० १७. ५० ।

† वा० सं० १७. ५१ ।

‡ वा० सं० १७. ५२ ।

दुक्तार्थं भाज्यमभिदाहुति मन्त्रां भूयः स्तौति— "तिस्र आहुति रिति। प्रकृतत्वात्तिस्रः समिध आदधातीति सम्बन्ध्यते, एवं षट् मन्त्रां सम्पद्यन्ते तद्ब्राह्मणं-"षड् वा ऋतव" इत्यादि-रूपं प्रागुक्त मित्यर्थः * ॥ ७ ॥ ३ [२. २.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥

॥ इति नवमकाण्डे प्रथमः प्रपाठकः समाप्तः ॥

---

* पुरस्तात् ८. ५. १।

अथ

द्वितीयप्रपाठके प्रथमं ब्राह्मणम् ,

अपि वा

द्वितीयाध्याये तृतीयं ब्राह्मणम् ।

॥ हरिः ॐ ॥

अथातः सम्प्रैष्यति । उद्यच्छेध्ममुपयच्छोपयमनीरग्नये प्रक्रियमाणायानुब्रूह्यग्नीदेकस्फ्ययानूद्धि* ब्रह्मन्नप्रतिरथं जपेति ॥ १ ॥

एतद्वै देवानुपप्रैष्यतः । एतं यज्ञं तᳪस्यमानान् दक्षिणतोऽसुरा रक्षाᳪसि नाष्ट्रा अभिजघाᳪसन्न यक्ष्यध्वे न यज्ञं तᳪस्यध्व इति ॥ २ ॥

ते देवा इन्द्र मब्रुवन् । त्वं वै नः श्रेष्ठो बलिष्ठो वीर्यवत्तमोऽसि त्व मिमानि रक्षाᳪसि प्रतियतस्वेति तस्य वै मे ब्रह्म द्वितीय मस्त्विति

---

* 'एकस्फ्ययानुद्देहि'—इति क, ख, ग ।

तथेति तस्मै वै बृहस्पतिं द्वितीय मकुर्व्वन् ब्रह्म वै बृहस्पतिस्त ऽइन्द्रेण चैव बृहस्पतिना च दक्षिणतो ऽसुरान् रक्षाꣳसि नाष्ट्रा अपहत्याभये ऽनाष्ट्र ऽएतं यज्ञ मतन्वत ॥ ३ ॥

तद्वा ऽएतत् क्रियते। यद्देवा अकुर्व्वन्निदं नु तानि रक्षाꣳसि देवैरेवापहतानि यस्त्वेतत् करोति यद्देवा ऽअकुर्व्वंस्तत्करवाणीत्यथो ऽइन्द्रेण चैवैतद् बृहस्पतिना च दक्षिणतो ऽसुरान् रक्षाꣳसि नाष्ट्रा ऽअपहत्याभये ऽनाष्ट्र ऽएतं यज्ञं तनुते ॥ ४ ॥

स यः स इन्द्रः। एष सो ऽप्रतिरथो ऽथ यः स बृहस्पतिरेष स ब्रह्मा। तद्यद्ब्रह्मा प्रतिरथं जपतीन्द्रेण चैवैतद् बृहस्पतिना च दक्षिणतो ऽसुरान् रक्षाꣳसि नाष्ट्रा अपहत्याभये ऽनाष्ट्र ऽएतं यज्ञं तनुते॥ तस्माद् ब्रह्माप्रतिरथं जपति * ॥ ५ ॥

आशुः शिशानो वृषभो न भीम इति† । ऐन्द्रो ऽभिरूपा द्वादश भवन्ति द्वादश मासाः

* 'जपति'—इति क। † 'इति'—इति क, ख।

संवत्सरः संवत्सरो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैतद्धविषातो ऽसुरान् रक्षांꣳसि नाष्ट्रा अपहन्ति त्रिष्टुब्भिर्वज्रो * वै त्रिष्टुब्वज्रेणैवैतद्धविषातो ऽसुरान् रक्षांꣳसि नाष्ट्रा अपहन्ति ता द्वाविꣳशति-र्गायत्र्यः सम्पद्यन्ते तदाग्नेय्यो भवन्त्यग्निकर्म्म हि †

॥ ६ ॥

अथैनमुद्यच्छति ‡ । उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिरिति तस्योक्तो बन्धुः § ॥ ७ ॥

अथाभिप्रयन्ति । पञ्च दिशो दैवीर्य्यज्ञ मवन्तु देवीरिति देवाश्चासुराश्चोभये प्राजापत्या दिक्ष्व-स्पर्द्धन्त ते देवा असुराणां दिशो ऽवृञ्जत तथै-वैतद्यजमानो द्विषतो भ्रातृव्यस्य दिशो वृङ्क्ते दैवीरिति तद्दैना दैवीः कुरुते ‖ यज्ञ मवन्तु देवी-

* 'त्रिष्टुभिर्वज्रो'—इति क ख ।

† 'हि'—इति क, 'हि'—इति ग, घ ।

‡ 'मुद्यच्छति'—इति क ।

§ 'बन्धुः'—इति ङ ।

‖ 'कुरुते'—इति ग ।

रिति यज्ञमिम मवन्तु देवीरित्येतदप्रामतिं दुर्म्मतिं बाधमाना इत्यशनाया वा ऽअमतिरशनाया मपबाधमाना इत्येतद्रायस्पोषे यज्ञपति माभजन्तीरिति रय्यां च पोषे च यज्ञपति माभजन्तीरित्येतद्रायस्पोषे ऽअधि यज्ञो ऽअस्थादिति रय्यां च पोषे चाधि यज्ञो ऽस्थादित्येतत् * ॥ ८ ॥

समिद्धे ऽअग्नावधि मामहान इति । यजमानो वै मामहान उक्थपत्र इत्युक्थानि ह्येतस्य पत्राणीड्य इति यज्ञियं इत्येतद्गृभीत इति धारित इत्येतत्तप्तं घर्म्मं परिगृह्यायजन्तेति तप्तं ह्येतं घर्म्मं परिगृह्यायजन्तोर्जा यद्यज्ञ मयजन्त देवा इत्यूर्जा ह्येतं यज्ञ मयजन्त देवाः † ॥ ९ ॥

दैव्याय धर्त्रे जोष्ट्र ऽइति । दैवो ह्येष धर्त्ता जोषयितृतमो देवश्रीः श्रीमनाः शतपया इति देवश्रीर्ह्येष श्रीमनाः शतपयाः परिगृह्य देवा यज्ञ मायन्निति परिगृह्य ह्येतं देवा यज्ञ मायन् देवा

* 'ऽस्थादित्येतत्'—इति ग, घ ।

† 'देवाः'—इति ग, घ ।

देवेभ्यो ऽअध्वर्यन्तो अस्त्वित्यध्वरो वै यज्ञो देवा देवेभ्यो यज्ञियन्तो ऽस्त्वित्येतत् ॥ १० ॥

वीतꣳ हविः शमितꣳ शमिता यजध्या ऽइति । इष्टꣳ स्विष्ट मित्येतत्तुरीयो यज्ञो यत्र हव्यमेतीत्यध्वर्युः पुरस्ताद्यजूꣳषि जपति होता पश्चादृचो ऽन्वाह ब्रह्मा दक्षिणतो ऽप्रतिरथं जपत्येष ऽएव तुरीयो यज्ञस्ततो वाका आशिषो नो जुषन्ता मिति ततो नो वाकाश्चाशिषश्च जुषन्ता मित्येतत् * ॥ ११ ॥

सूर्य्यरश्मिर्हरिकेशः पुरस्तात् । सविता ज्योतिरुदयां† अजस्र मित्यसौ वा ऽआदित्य एषोऽग्निः स ऽएष सूर्य्यरश्मिर्हरिकेशः पुरस्तात् सवितैतज्ज्योतिरुदयच्छत्यजस्रं तस्य पूषा प्रसवे याति विद्वानिति पशवो वै पूषा त ऽएतस्य प्रसवे प्रेरते सम्पश्यन् विश्वा भुवनानि गोपा इत्येष वा ऽइदꣳ

---

* 'मित्येतत्'—इति ग, घ ।

† 'ज्योतिरुदयां॥'—इति क, 'ज्योतिरुदयां॥'— ति ख,

'ज्योतिरुदयां॥'—इति क ।

सर्व्वं͡ सम्पश्यत्येष ऽउ ऽएवास्य सर्व्वस्य भुवनस्य गोप्ता * ॥ १२ ॥

तद्या अमुष्मादादित्यादर्व्वाच्यः पञ्च दिशः । ता ऽएतद्देवा ऽअसुराणां महद्भूतायो ता ऽएवैतत् समारोहंस्ता ऽउ ऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्तेऽथो ता ऽएवैतत् समारोहत्यथो ऽएतद्वा ऽएताभिर्हिदेवा आप्तः सम्प्राप्नुवंस्तथैवाभिरयमेतदाप्तः सम्प्राप्नोति † ॥ १३ ॥

अथाश्मानं पृश्नि मुपदधाति । असौ वा ऽआदित्यो ऽश्मा पृश्निरमु मेवैतदादित्य मुपदधाति पृश्निर्भवति रश्मिभिर्हि मण्डलं पृश्नि त मन्तरेणाहवनीयं च गार्हपत्यं चोपदधात्ययं वै लोको गार्हपत्यो द्यौराहवनीय ऽएतं तदिमौ लोकावन्तरेण दधाति ‡ तस्मादेष ऽइमौ लोकावन्तरेण तपति ॥ १४ ॥

* 'गोप्ता'—इति ग, 'गोप्ता'—इति घ।

† 'सम्प्राप्नोति'—इति क।

‡ 'दधाति'- इति क।

माग्नीध्रवेलायाम्। अन्तरिक्षं वा ऽआग्नीध्र मेतं तदन्तरिक्षे दधाति तस्मादेषो ऽन्तरिक्षायतनो व्यक्ष्वे व्यक्ष्वे ह्येष हुतः * ॥ १५ ॥

स एष प्राणः। प्राण मेवैतदात्मन् धत्ते तदेतदायुरायुरेवैतदात्मन् धत्ते तदेतदन्न मायुर्ह्येतदन्न मु वा ऽआयुरस्मा भवति स्थिरो वा ऽअस्मा स्थिरं तदायुः कुरुते पृश्निर्भवति पृश्नीव ह्यन्नम् ॥ १६ ॥

स उपदधाति। व्विमान एष दिवो मध्य ऽआस्त ऽइति व्विमानो ह्येष दिवो मध्य ऽआस्त ऽआपप्रिवान्रोदसी अन्तरिक्ष मित्युद्यन् वा ऽएष ऽइमांल्लोकानापूरयति स व्विश्वाचीरभिचष्टे घृताची रिति स्रुचश्चैतद्वेदीश्चाहान्तरा पूर्व्व मपरं च केतु मित्यन्तरेमञ्च लोक ममुञ्चेत्येतदथो यच्चेद मेतर्हि चीयते यच्चादः पूर्व्वं मचीयतेति ॥ १७ ॥

उक्षा समुद्रो ऽअरुणः सुपर्ण ऽइति। उक्षा ह्येष समुद्रो ऽरुणः सुपर्णः पूर्व्वस्य योनिं पितुरा-विवेशेति पूर्व्वस्य ह्येष एतं योनिं पितुराविशति

* 'हुतः'—इति ग, घ।

मध्ये दिवो निहितः पृश्निरश्मेति मध्ये ह्येष दिवो निहितः पृश्निरश्मा व्विचक्रमे रजसस्पात्वन्ताविति व्विक्रममाणो वा ऽएष ऽएषां लोकाना मन्ता-न्याति ॥ १८ ॥

द्वाभ्या मुपदधाति । द्विपाद्यजमानो यजमानो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदुपदधाति त्रिष्टुब्भ्यां* त्रैष्टुभो ह्येष न सादयत्यसन्नो ह्येष न सूददोहसाधिवदति प्राणो वै सूददोहाः ऽप्राण ऽएष किं प्राणे प्राणं दध्यामिति तं निधाय यथा न नश्येत् ॥ १९ ॥

अथोपायन्ति† । इन्द्रं व्विश्वा ऽअवीवृधन्निति तस्योक्तो बन्धुर्देवहूर्यज्ञ ऽआ च व्वक्षत्सुम्नहूर्यज्ञ ऽआ च व्वक्षदिति देवहूश्चैव यज्ञः सुम्नहूश्च यक्षदग्निर्देवो देवां२॥ ऽआ च व्वक्षदिति यक्षच्चैवाग्निर्देवो देवाना च वहत्वित्येतत् ॥ २० ॥

* 'त्रिष्टुब्भ्यां'—इति क, ख, ङ ।

† 'अथोपातियन्ति'—इति क, ख, ङ ।

‡ 'वहत्वित्येतत्'—इति ग, घ ।

व्वाजस्य मा प्रसवः । उद्ग्राभेणोदग्रभीत् अथा सपत्नानिन्द्रो मे निग्राभेणाधराँ२॥ ऽअकरिति यथैव यजुस्तथा बन्धुः ॥ २१ ॥

उद्ग्राभं च निग्राभं च । ब्रह्म देवा अवीवृधन् अथा सपत्नानिन्द्राग्नी मे व्विषूचीनान् व्यस्यता मिति यथैव यजुस्तथा बन्धुः ॥ २२ ॥

तद्या अमुष्मादादित्यादूर्ध्वास्तस्रो दिशः । ता एतद्देवा असुराणा मवृञ्जताथो ता एवैतत् समारोहंस्ता उ ऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य व्वृङ्क्तेऽथो ता एवैतत् समारोहत्यथो ऽएतद्वा ऽएताभिर्द्देवा आतः सम्प्राप्नुवंस्तथैवाभिरय मेतदातः सम्प्राप्नोति * ॥ २३ ॥

अथाग्निं मारोहन्ति । क्रमध्व मग्निना नाक मिति स्वर्गो वै लोको नाकः क्रमध्व मनेनाग्निनेतꣳ स्वर्गं लोक मित्येतदुख्यꣳ हस्तेषु बिभ्रत

* 'संप्राप्नोति' इति ख

मृत्युस्यꣳ ह्येत ऽएतꣳ हस्तेषु बिभर्ति दिवस्पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराध्व मिति दिवस्पृष्ठꣳ स्वर्गं लोकं गत्वा मिश्रा देवेभिराध्व मित्येतत्* ॥ ॥ २४ ॥

प्राची मनु प्रदिशं प्रेहि विद्वानिति। प्राची वै दिगग्नेः सा मनु प्रदिशं प्रेहि विद्वानित्येतदग्ने रग्ने पुरो ऽअग्निर्भवेहेत्यस्य त्व मग्नेरग्ने पुरो ऽग्नि† र्भवेहेत्येतद्विश्वा आशा दीद्यानो विभाहीति सर्वा आशा दीप्यमानो विभाहीत्येतदूर्ज्जं नो धेहि द्विपदे चतुष्पद ऽइत्याशिष माशास्ते ॥ २५ ॥

पृथिव्या ऽअहम्‡। उदन्तरिक्ष मारुह मन्तरिक्षा-द्दिव मारुह मिति गार्हपत्याद्वाग्नीध्रीय मागच्छ-त्याग्नीध्रीयादाहवनीयं दिवो नाकस्य पृष्ठात्स्वर्ज्योति-

* 'मित्येतत्'—इति म, च।

† 'पुरो अग्नि'—इति क, 'पुरोग्नि'—इति ख, च।

‡ 'पृथिव्याहम्'—इति क, पृथिव्या ऽअहम्'—इति ख, 'पृथिव्या अहम्'—इति ग।

रगामह मिति दिवो नाकस्य पृष्ठात्स्वर्गं लोक-
मगामह मित्येतत् * ॥ २६ ॥

स्वर्यन्तो नापेक्षन्ते । आ द्याꣳ रोहन्ति रोदसी ऽइति न हैव ते ऽपेक्षन्ते ये स्वर्गं लोकं यन्ति यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिर ऽइत्येष एव यज्ञो विश्वतोधार एत ऽउ ऽएव सु-
विद्वाꣳसो य ऽएतं वितन्वते † ॥ २७ ॥

अग्ने प्रेहि प्रथमो देवयता मिति । इम मेतदग्नि माह त्व मेषां प्रेहि प्रथमो देवयता मिति चक्षुर्द्देवाना मुत मर्त्याना मित्युभयेषाꣳ ह्येतद्देव-
मनुष्याणां चक्षुरियक्षमाणा भृगुभिः सजोषा इति यजमाना भृगुभिः सजोषा इत्येतत्स्वर्य्यन्तु यजमानाः स्वस्तीति स्वर्गं लोकं यन्तु यजमानाः स्वस्तीत्येतत् ‡ ॥
॥ २८ ॥

तद्या अमुष्मिंल्लोके पञ्च दिशः । ता एतद्देवा

---

* 'मित्येतत्'—इति ग, 'मित्येतत्'—इति घ।

† 'वितन्वते'—इति ग, 'वितन्वते'—इति घ।

‡ 'स्वस्तीत्येतत्'—इति ग, घ।

ऽप्यसुराणा मवृङ्क्तायो ता एवैतत् समारोहंस्ता उ ऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्ते ऽथो ता एवैतत् समारोहत्यथो ऽएतद्वा ऽएताभिर्देवा प्रातः सम्प्राप्नुवंस्तथैवाभिरय मेतदातः सम्प्राप्नोति* ॥ २९ ॥

अथैन मभिजुहोति । एतद्वा ऽएनं देवा ईयिवांऽसमुपरिष्टादन्नेनाप्रीणन्नेतयाहुत्या तथैवैन मय मेतदीयिवांऽसमुपरिष्टादन्नेन प्रीणात्येतयाहुत्या कृष्णायै शुक्लवत्सायै पयसा रात्रिर्वै कृष्णा शुक्लवत्सा तस्या असावादित्यो वत्सः स्वेनैवैन मेतद्भागेन स्वेन रसेन प्रीणात्युपरि धार्य्यमाण उपरि धार्य्यमाण उपरि हि स य मेतत् प्रीणाति दोहनेन हि पयः प्रदीयते ॥ ३० ॥

यद्वेवैन मभिजुहोति । शिर एतद्यज्ञस्य यदग्निः प्राणः पयः शीर्षंस्तत् प्राणं दधाति यथा स्वयमातृण्णा मभिप्रश्वरेदेव मभिजुहुयात् प्राणः स्वयमातृण्णा रस एष शिरश्च तत् प्राणश्च रसेन सन्तनोति

* 'मरंप्राप्नोति'—इति

सन्दधाति नक्तोषासा समनसा विरूपे इति तस्योक्तो बन्धुः ॥ ३१ ॥

अग्ने सहस्राक्षेति । हिरण्मयशकलैर्वा एष सहस्राक्षः शतमूर्द्धन्निति यद्रुद्रः शतशीर्षा रुद्रो ऽसृज्यत शतं ते प्राणाः सहस्रं व्याना इति शतं ह्येव तस्य प्राणाः सहस्रं व्याना यः शतशीर्षा त्वं साहस्रस्य राय ईशिषऽ इति त्वं सर्व्वस्यै रय्या ऽईशिष ऽइत्येतत्तस्मै ते विधेम वाजाय स्वाहेत्येष वै वाजस्तमेतत् प्रीणाति ॥ ३२ ॥

द्वाभ्यामभिजुहोति । द्विपाद्यजमानो यजमानो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदभिजुहोति * ॥ ३३ ॥

अथैनं निदधाति । सुपर्णोऽसि गरुत्मानित्येतद्वा ऽएनं मदो विकृत्या सुपर्णं गरुत्मन्तं विकरोति तं सुपर्णं गरुत्मन्तं चिनोति तं सुपर्णं गरुत्मन्तं कृत्वान्ततो निदधाति पृष्ठे पृथिव्याः

* 'मेतदभिजुहोति'—इति ख ।

सीद भासान्तरिक्ष मापृण ज्योतिषा दिव मुत्तभान तेजसा दिश उद्दृꣳहेत्येवꣳ ह्येष एतत् सर्व्वं करोति*॥ ॥ ३४ ॥

प्राङुत्थानः सुप्रतीकः पुरस्तादिति । प्राङु-त्थानो नः सुप्रतीकः पुरस्तादित्येतदग्ने स्वं योनि मासीद साधुयेत्येष वा ऽअस्य स्वो योनिस्तꣳ साध्वासीदेत्येतदस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन्निति द्यौर्व्वा ऽउत्तरꣳ सधस्थं विश्वे देवा यजमानश्च सीदतेति तद्विश्वैर्द्देवैः सह यजमानꣳ सादयति द्वाभ्यां निदधाति तस्योक्तो बन्धुर्व्वषट्कारेण तस्यो-परि बन्धुः ॥ ३५ ॥

अथास्मिन्त्समिध आदधाति । एतद्वा ऽएनं देवा ऽईयिवाꣳस मुपरिष्टादन्नेनाप्रीणन्त्समिद्भिश्चाहु-तिभिश्च तथैवैन मय मेतदीयिवाꣳस समुपरिष्टादन्नेन प्रीणाति समिद्भिश्चाहुतिभिश्च †॥ ३६ ॥

* 'करोति'—इति क ।

† 'श्चाहुतिभिश्च'—इति क, च

स वै शमीमयीं प्रथमा मादधाति। एतद्वा ऽएष एतस्या माहुत्याᳲ हुतायां प्रादीप्यतोदज्वलत् तस्माद्देवा अबिभयुर्यद्वै नो ऽयं न हिᳲस्यादिति त ऽएताᳲ शमी मपश्यंस्तयैन मशमयंस्तद्यदेतᳲ शम्या-शमयंस्तस्माच्छमी तथैवैन मय मेतच्छम्या शमयति शान्त्या ऽएव न अग्ध्यै ॥ ३७ ॥

ताᳲ सवितुर्व्वरेण्यस्य। चित्रा माहं वृणे सुमतिं विश्वजन्याम् या मस्य कण्वो ऽअदुहत् प्रपीनाᳲ सहस्रधारां पयसा महीं गा मिति कण्वो हैनां ददर्श सा हास्मै सहस्रधारा सर्व्वान् कामान् दुदुहे तथैवैतद्यजमानाय सहस्रधारा सर्व्वान् का-मान् दुदुहे * ॥ ३८ ॥

अथ वैकङ्कती मादधाति। तस्या उक्तो बन्धु-र्व्विधेम ते परमे जन्मन्नग्न ऽइति द्यौर्व्वा ऽअस्य परमं जन्म व्विधेम स्तोमैरवरे सधस्थ इत्यन्तरिक्षं व्वा ऽअवरᳲ सधस्थं यस्माद्योनेरुदारिथा यजे त

* 'दुदूहे'--इति क ।

मित्येष वा ऽअस्य स्वो योनिस्तं यत्र ऽहुत्येतस्य*
स्वे हवीꣳषि जुहुरं समिद्ध ऽइति यदा वा ऽएष
समिध्यते ऽथैतस्मिन् हवीꣳषि प्रजुह्वति ॥ ३९ ॥

अथौदुम्बरी मादधाति। ऊर्ग्वै रस उदुम्बर ऊर्ज्जैवैन मेतद्रसेन प्रीणाति कर्म्मकवती भवति पशवो वै कर्म्मकाः पशुभिरेवैन मेतदन्नेन प्रीणाति यदि कर्म्मकवतीं न विन्देद्दधिद्रप्स मुपहत्यादध्या-सद्यद्दधिद्रप्स उपतिष्ठते तदेव पशुरूपं प्रेद्धो ऽअग्ने दीदिहि पुरो न इति स्विराजादधात्यन्नं स्विरा-डन्नेनैवैन मेतत् प्रीणाति तिस्रः समिध आदधाति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेत-दन्नेन प्रीणाति † ॥ ४० ॥

अथाहुतीर्जुहोति। यथा परिश्रित्यानुपाययेत् ता हन्तात् स्रुवेण पूर्व्वं स्रचोत्तरा मग्ने त मद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् ऋध्यामा त

* 'ऽहुत्येतस्य'—इति ग. घ
† प्रीणाति- इति क।

ऽग्नोहैरिति यस्ते हृदिस्पृक्स्तोमस्तं न ऽऋध्यास-मित्येतत् पङ्क्त्या जुहोति पञ्चपदा पङ्क्तिः पञ्च-चितिको ऽग्निः पञ्च ऽर्त्तवः संवत्सरः संवत्सरो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदन्नेन प्रीणाति * ॥ ४१ ॥

अथ वैश्वकर्म्मणीं जुहोति । विश्वकर्म्माय मग्निस्त मेवैतत् प्रीणाति चित्तिं जुहोमि मनसा घृतेनेति चित्त मेषां जुहोमि मनसा च घृतेन चेत्येतद्यथा देवा इहागमन्निति यथा देवा इहा-गच्छानित्येतद्वीतिहोत्रा ऋतावृध ऽइति सत्यवृध ऽइत्येतत्पत्ये विश्वस्य भूमनो जुहोमि विश्व-कर्म्मणे ऽइति योऽस्य सर्व्वस्य भूतस्य पतिस्तस्मै जुहोमि विश्वकर्म्मण ऽइत्येतद्विश्वाहादाभ्यं हवि-रिति सर्व्वदाचितं हविरित्येतत् † ॥ ४२ ॥

* 'प्रीणाति'- इति ख ।

† 'हविरित्येतत'—इति ग, 'हविरित्येतत्' इति ग

अथ पूर्णाहुतिं जुहोति। सर्व्वं मेतद्यत् पूर्ण ँ सर्व्वेणैवैन मेतत् प्रीणाति ॥ ४३ ॥

सप्त ते ऽअग्ने समिध इति। प्राणा वै समिधः प्राणा ह्येत ँ समिन्धते सप्त जिह्वा ऽइति यान-मून्त्सप्त पुरुषानेकं पुरुष मकुर्व्वंस्तेषा मेतदाह सप्त ऽऋषय इति सप्त हि त ऽऋषय आसन्त्सप्त धाम प्रियाणीति छन्दा ँ स्येतदाह छन्दा ँ सि वा ऽअस्य सप्त धाम प्रियाणि सप्त होत्राः सप्तधा त्वा यजन्तीति सप्त ह्येत ँ होत्राः सप्तधा यजन्ति सप्त योनीरिति चितीरेतदाहापृणस्वेत्या* प्रजायस्वे-त्येतद्घृतेनेति रेतो वै घृत ँ रेत ऽएवैतदेषु लोकेषु दधाति स्वाहेति यज्ञो वै स्वाहाकारो यज्ञिय मेवैतदिद ँ सकृत् सर्व्वं करोति ॥ ४४ ॥

सप्त सप्तेति। सप्तचितिकोऽग्निः सप्त ऽर्त्तवः संवत्सरः संवत्सरो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् प्रीणाति तिस्र आहुतीर्जुहोति

* 'चितीरेतदाहापृणस्वेत्या' — इति ख।

विद्वदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेत-
दन्नेन प्रीणाति तिस्रः समिध ऽआदधाति तत्
षट् तस्योक्तो बन्धुः ॥ ४५ ॥

तिष्ठन्त्समिध ऽआदधाति* । अस्थीनि वै समिध-
स्तिष्ठन्तीव वा ऽअस्थीन्यासीन आहुतीर्जुहोति माꣳ-
सानि वा ऽआहुतय ऽआसत ऽइव वै माꣳसान्य-
न्तराः समिधो भवन्ति बाह्या ऽआहुतयो ऽन्तराणि
ह्यस्थीनि बाह्यानि माꣳसानि † ॥ ४६ ॥

अथातः सम्पदेव‡ । षट् पुरस्ताज्जुहोति षडु-
परिष्टात् षड्भिराश्मनः पृश्नेर्य्यन्ति द्वाभ्या मश्मानं
पृश्नि मुपदधाति चतुर्भिराग्नीर्य्यन्ति. पञ्चभिरग्नि-
मारोहन्ति तदेका न्न त्रिꣳशदाहुतिरत्र त्रिꣳशत्तमी
द्वाभ्या मग्निं निदधाति तद् द्वात्रिꣳशद् द्वात्रिꣳशद-
क्षरानुष्टुप्सैषानुष्टुप् § ॥ ४७ ॥

* 'ऽआदधाति'—इति ख ।

† 'माꣳसानि'—इति ग, माꣳसानि' इति ख, ङ,

‡ 'सम्पदेव'—इति ग, घ

§ '०सैषानुष्टप' —इति ग, '०सैषानुष्टुप' —इति घ

तस्या ऽअमूम्तिस्रो ऽनुष्टुभः । गार्हपत्ये सम्पादयन्ति तामा मेता मचैका माहरन्ति तद्यदेता मत्राहरन्त्यचैष सर्व्वो ऽग्निः संस्कृतः स ऽएषो ऽत्र तस्मै नाल मासीद्यदन्न मात्स्यत * ॥ ४८ ॥

सो ऽग्नि मब्रवीत् । त्वयान्न मदानीति तथेति तस्माद्यद्देवैत मत्राहरन्त्यथैषो ऽल मन्नायाल माहुतिभ्यो भवति † ॥ ४९ ॥

अथो ऽआहुः । प्रजापतिर्वैवैतं प्रियं पुत्र मुरस्याधत्त ऽइति स यो हैतदेवं वेद हैवं प्रियं पुत्र मुरसि धत्ते ॥ ५० ॥

यद्देवैत मत्राहरन्ति । यान्वै तान्त्सप्त पुरुषानेकं पुरुष मकुर्व्वन्नय मेव स यो ऽय मग्निश्चीयते ऽथ या मेषां ता मूर्द्धाᳬ श्रियᳬ रसᳬ समुदौहन्नेष स य मेत मत्राग्नि माहरन्ति तद्यदेत मत्राहरन्ति यैवैतेषाᳬ सप्तानां पुरुषाणाᳬ श्रीर्यो रसस्त मेत-

---

* 'मात्स्यत'—इति ग, 'मात्स्यत'—इति घ।

† 'भवति'—इति क।

दृढ्ँहँ स मुदूहन्ति तदस्यैतच्छिर ऽआत्माय मग्नि-श्चित ऽआत्मान मेवास्यैतत् संस्कृत्य शिरः प्रति-दधाति ॥ ५१ ॥ २ ॥

॥ इति द्वितीयप्रपाठके प्रथमं ब्राह्मणम् [२. ३.] ॥

इत्य अग्निप्रणयनार्थं यथोक्तं होमं विधायाथ तत् प्रयोगौपायिकीः (?) * क्रियाः कर्तुं तदुचितं सम्प्रैष माह,— "अथातः सम्प्रेष्यतीति । प्रणेष्यमाणाग्नि मिध्मार्थं गार्हपत्ये प्रक्षिप्तं काष्ठमिध्मस्तदुपयच्छ † अग्निधारणार्थं मधस्तात् क्रियमाणाः सिकता उपयमन्यः ताश्चोपयच्छेति ‡ एतदुभयं प्रतिप्रस्थातारम् प्रत्युच्यते । हे होतः प्रणीयमानायाग्नये अनुब्रूहि अग्निप्रणयनीया ऋचोऽनुब्रूहि । हे अग्नीत् पराश्चास्फ्यरेखया § अनुगच्छ ‖ । हे ब्रह्मन् 'आयुः शिशान' इत्येतद-

---

* 'तस्मायाणौपयिकीः'—इति क, 'तन्मायणौपयिकीः'- इति ख, ग, 'तत्मायाणौपयिकीः'—इति घ ।

† 'काष्ठमिकानंदव्यच्छ'—इति क, 'वाष्टमिकानंदव्यच्छ'—इति ग, 'पश्चिदी वाष्टमिकां तद्व्यच्छ—इति घ ।

‡ 'ताश्चोपयच्छताः कुरुत'- इति ख-पुस्तके ।

§ 'यथ्यंरायया (एकस्फ्यया ?)—इति क, ग ।

‖ का० श्रौ० सू० १८.३.१६ ।

प्रतिरथाख्यं सूक्तं * जपेति एवं तत्र तत्र व्यापारे तं तं 'सम्प्रेष्यति' विनियुङ्क्तादित्यर्थः । अत्र सम्प्रैष "ब्रह्मन् प्रतिरथम् जपेति" यदुक्तं तस्योपयोग मभिधातुं सुराकल्प मवतारयति ॥ १ ॥

"एतद्वा इति । एतस्मिन् काले खलु एत मग्निं चय-माख्यं यज्ञं त(?)न्यमानान् करिष्यमानान् इडभावख्यादयः (?) अतएवाग्निविहारमर्मापि गच्छतो देवान् दक्षिणभागेन एका 'असुरा रक्षांसि'त्वेन लोडार्थव्यत्ययेन लट्-प्रत्ययः । 'न यजध्वं' न विस्तारयध्व मिति । इन्तु मैच्छन् देवानां यज्ञं विहन्तु मि च्छन्नित्यर्थः ॥ २ ॥

यथास्तेर्देवै रस्माकं मध्ये त्वमेव प्रशस्ततमो बलवत्तमश्च बलिष्ठश्च वीर्यवत्तम इति । अतस्त्वमिमानि रक्षांसि प्रति-पक्षं कुरुष्वेत्युक्ते इन्द्रेण मे ब्राह्मणो द्वितीयोऽस्त्वित्युक्ते ,तथैव कुर्म इति । बृहस्पतिर्ब्राह्मणस्तावत्तमिन्द्रस्य द्वितीय मकुर्वन् ; तथा कृत्वा ते देवा इन्द्रेण बृहस्पतिना च दक्षिणतो दक्षिण-भागे नागकामसुरारक्षांसि चापहत्य अनाष्ट्रे अतएवाभये प्रदेशे एतं प्रकृतं यज्ञ मकुर्वत ॥ ३ ॥

"तद्वा एतद्" इत्यादिकस्याय मर्थः ,— देवाः पूर्वं यत् कर्माकुर्वन् एतस्मिन् कालेऽपि तदेव क्रियते खलु इद मिति । अपहननक्रियाविशेषणं इदं रक्षसा मवहनन पूर्वं

---

* वा० सं० १७. ३३ —४४ ।

देवैरेव सम्पादितं तस्मात्स्वरितार्थस्त्वादेतत् कर्म यद्यपि न करणीयं तथापि यदेतत् कर्म करोतीति तद्देवा यद्-कुर्वन् करवाणीति धिया क्रियते न तु रक्षसा मपहननार्थं तस्य तु देवैरेव सम्पादितत्वात् किञ्च स्वय मपि चैतेन इन्द्रेण बृहस्पतिना च दक्षिणभागस्थितानामसुराणां रक्षांसि चापहत्या नाष्ट्रेऽभये देशे एतं यज्ञं तनवाम् भवतीति। ननु देवाः पूर्वं इन्द्रबृहस्पतिभ्यां रक्षांस्यपहनिन्ये तदस्तु प्रकृते क इन्द्रः को वा बृहस्पतिः कथं वा ताभ्यां रक्षसा मपहननं यत उक्त मुपपद्यत इत्याह॥ ४ ॥

"स यः स इति। पूर्वं दक्षिणभागे रक्षांस्यपहतानिन्द्रः परा-मृश्यते। स य इन्द्रोऽस्ति स एष यग्निरयस्त्व इत्यर्थः॥ ५ ॥

अग्नितिरय मेवेन्द्रात्मकत्वमुपपादयति -- "आशुः शिशान* इति। तस्याग्निप्रतिपाद्याया देवताया सम्बन्ध्या भेदात् आशुः शिशान इत्यादिका ऐन्द्रं कृतीभिरूपाः भद्गा भवन्तीति इन्द्रत्वेन स्वीकर्तु मुचिता भवन्तीति अर्थः। अप्रतिस्यमुक्-ख्याता मृचां द्वादश मन्त्राया तत्स्यान्नः सकाशादसुरा रक्षांसि चापहन्त्यन्त इति प्रशंसति। †) "द्वादश भवन्तीति। तासां छन्दः प्रशंसति — "त्रिष्टुभि रिति। त्रिष्टुभा वज्रत्वं वज्रि-णेन्द्रेण सहोत्पत्तेः सा चोत्पत्ति स्तैत्तिरीयके श्रूयते— "उरसो बाहुभ्यां पञ्चदशं निरमिमीत मिन्द्रो देवतान्व सृज्यतत्

* वा० सं० १७ ३३।

† अस्यनीचिह्नान्तः प्रदेशान्तः पाठो नास्ति ज-पुस्तकान्तरत्र।

त्रिष्टुप्छन्दः इति। अथवा वीर्यवत्त्वात्त्रिष्टुभो बाहुत्वं वीर्यवत उरःप्रदेशतो निर्माणात्। अतएव श्रुतं,— त्रिष्टुप्छन्दो बृहत्साम राजन्यो मनुष्याणां अविः पशूनां यस्मात्ते वीर्यवन्तो वीर्याद्ध्यसृज्यन्तेति। ननु प्रकृतस्याग्निकर्मत्वात् तथैतासामैन्द्रीणा मृचा ममर्थकतार्थं स्यादित्यत आह,— "ता द्वाविंशति रिति। चतुश्चत्वारिंशदक्षरा द्वादश त्रिष्टुभः अष्टाष्टाविंशतिपञ्चशतानाक्षराणि सम्पद्यन्ते चतुर्विंशत्यक्षराणां गायत्रीणां द्वाविंशतिस्तावदक्षरा भवन्ति। अतो द्वादश त्रिष्टुभो मिलित्वा द्वाविंशति गायत्र्याग्नेय्यो * भवन्ति अग्निना सहोत्पन्नत्वात्। अतएव श्रूयते,— "समुद्र तत्त्रिवृतमिरमिमीत त अग्निदेवता च सृज्यत् गायत्रीछन्दस इति, प्रकृतश्च कर्माग्निसम्बन्धि भवति। तत् प्रणयनात्मकत्वात्। अतस्ता ऋच ऐन्द्र्योऽपि छन्दः सम्पत्तिद्वारा प्रकृति कर्म समर्थितार्था एवेत्यर्थः॥ ६॥

इत्थं ब्राह्मणकृत अप्रतिरथ सूक्त † जपस्योपयोग मुक्त्वाग्नेरुद्यमन ‡ मन्त्रकं विधत्ते— "अथैन मिति। "उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिरित्यादिना § मन्त्रेणेत्यर्थः।

* 'गायत्र्यास्ताश्च य्यो (१ ०गाय अत्र्याग्नेय्यो)"--इति क, भ।

† 'अब्राह्मणस्याप्रतिरथसूक्त'--इति भ, 'अब्राह्मणस्याप्रतिरथसूक्त' इति अ।

‡ का० श्रौ० सू० १८. ३. १८।

§ वा० सं० १७. ५३।

तस्य मन्त्रस्य ब्राह्मणं प्रागुक्त मित्याह— "तस्मोतो बभ्रु रिति ॥ ७ ॥

उद्यमनानन्तरं * अध्वर्युप्रभृतीनां चित्यं प्रति † गमनं विधत्ते ‡— "अथेति। अत्र "पञ्चदिशो दैवि § रित्यादिभिः पञ्चभि र्ऋग्भिराग्नीध्रपर्यन्त गच्छन्ति। अतत्ता ऋचः क्रमेण व्याचष्टे— "देवाश्चासुराश्चेत्यादिना प्राजापत्यभूता देवाश्चासुराश्चेत्येते उभये दिग्विषयेस्पर्द्धां कृतवन्तः; पश्चाद्देवासुराणां दिशो हृत्वन्तः ततोगमस्य स्वाधिनो कृतवन्तः। अत्र पञ्चदिशो दैवीरित्यादिभिः पञ्चभि र्ऋग्भि राग्नीध्रपर्यन्तं गच्छन्ति। अतस्ता ऋचः क्रमेण व्याचष्टे,— "यज्ञ मवन्त्वित्यनेन तथैव यजमानोऽपि इदं कुर्वतो भ्रातृव्यस्य दिशं स्वाधीनाः करोति। "दैवीरित्यनेन एताद्दिशो देवसम्बन्धिनीः कुरुते। असुरेभ्य उपगमय्य देवैः स्वाधिनीकृतत्वाद्दैवीरित्यनेन तथैव सम्पादितवान् भवतीत्यर्थः। "यज्ञ मवन्तु दैवीत्यनेन प्रकृतस्यैव यज्ञस्यावनं निर्वाचित मिति दर्शयति,— "यज्ञ मिम मिति। अमतिशब्दस्यागतेच्छार्थ इति व्याचष्टे— "अपामतिर्मिति। अशनायोदन्येत्यादि ‖

---

* 'उपयमानानन्तरम्'- इति क।

† चित्यं प्रति [आग्नीध्रपर्यन्त]—इति क।

‡ का० श्रौ० सू० १८. ३. १६।

§ वा० सं० १७. ५४।

‖ "अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु"—इति पा० सू० ७. ४. ३४।

सुवर्णागतायाः शब्दः क्यजन्तो निपातितः। रायस्पोष इति धने तद्विषये पोषिवेति वक्तु मभिप्रेत मित्याह,— "रायस्पोष इति रायस्पोषे अधीत्यत्रापि तथैव विवक्षित मित्याह,— "राय-स्पोषं अधीति यजमानस्यैव पूजकत्वात् ॥ ८ ॥

"मामहान" शब्दो यजमानपर इत्याह,— "यजमानो वा इति। अर्न्तरक्थ:नि स्तोत्रशस्त्राणि पवषट्कारानि भवन्ती-त्यस्मिन्रक्थपत्र इत्याह,— "उक्थपत्र इति। यतो देवाः 'तप्त' घर्मं घर्मलक्षणं अग्निं 'परिगृह्याय यजन्त' ; अत उच्यते मन्त्रे,— 'तप्तं घर्मं इत्याह— "तप्तं घर्म मिति। उत्तरवाक्य मप्येव मेव व्याचष्टे,— "ऊर्जेति। 'ऊर्ज्जा' आज्यदधिपयःप्रभृति ता रसेनेत्यर्थः ॥ ९ ॥

अग्निर्देवमस्वब्भित्वाद्वारयद्दत्वाज्जोपयित्व मत्वाग्निरेव 'टध्यायेत्यादिनोच्यत इति। देवायेति उत्तरवाक्यद्वयं प्रमि-त्यर्थ मित्याह,— "देवश्रीरिति परिगृह्येति 'देवा देवेभ्य इत्यध्वर्यस्त' इयेतत् पदं व्याचष्टे,— "अध्वरो वा इति। अध्वर्यन्त इति "कव्यध्वरपृतनस्यर्चिलोप इति" * अकार लोपः ॥ १० ॥

"वीतं शमित" मित्यस्य पदद्वयस्यार्थ माह,— "इष्टं स्विष्ट मिति। अवगृहीतब्रह्मणा यच स्थानं यथायथं मन्त्रं जप एव 'तुरीयो यज्ञ' इति व्याचष्टे,— "अध्वर्युः पुरस्तादिति 'वाका-शिष' इत्यनयोः शब्दयोः समानाधिकरणाशङ्का निवारयति।

* पा० सू० ७. ४. ३९।

"ततो नो वाकाशामिषवेति । एतस्य प्रणीयमानस्याग्नेरादित्यात्मकत्वात् ॥ ११ ॥

स एष प्रणीयमानाग्निलक्षणः सूर्यस्येव रश्मिभि र्युक्तो हरितवर्ण 'केशः' तेजोरूपः सविता सनवच्छिन्नं पुरस्तादेतदुद्यच्छति । अतो मन्त्र इम मेवार्थं माचष्टत्याह,— "सूर्यरश्मिरिति । कृष्णः पशुजनकत्वेन 'पूषा' इति पशव्यः उच्यते वाग्नयेरनुज्ञायां प्रवर्त्तन्त इत्ययमर्थः मन्त्रभागेन विवक्षितः इत्याह,— "पशवो वा इति । 'प्रेरत' इति ईरगतौ * वित्यस्यादादिकस्य लिटि बहुवचने रूपम् । अग्नेः प्रजापत्यात्मकत्वेन सर्वस्यापि दृष्टत्वाद्रक्षितत्वाच्च तदायं 'सम्पश्यन्वि त्यादि मन्त्रभागः समवेतार्थ मित्याह — "सम्पश्यन्निति । देवा दीव्यन्त देवसम्बन्धिन्यः पञ्चदिशः अमति सगतेच्छा दुर्मति सगास्तोमां मनोज्ञापबाधमानाः धर्न तद्विषये पोष च यज्ञपतिं सम्बन्धिन्य एनं प्रणीयमानाग्निः लक्षणं यज्ञ मवन्तु अस्यादिति "छन्दसि लुङ् लङ् लिट" इति लोडर्थे लुङ् प्रत्ययः † किञ्चाय मपि यज्ञः धने तत् पोषे चाधि तिष्ठत्विति प्रथममन्त्रस्याय मर्थः । सम्यग्होम अग्नौ प्रणीयमाने सामहानेत्यर्थं पूजको यजमानोऽधिकारभावेनानुगच्छति । उक्थ्यान्येवाङ्गानि यस्य स उक्थपत्र ईड्य स्तुत्या यज्ञियो वामवाग्निरञ्जर्युणाधारितः किञ्च देवास्तम' धर्मात्मकं त सग्नि

---

* "ईर गतौ कम्पने च" अ० आ० १०१८ धा० ।

† पा० सू० ३ ४ ६

परिग्रहाय यजन्त समत्वादेव च यद्रूपं तं चाज्यादि-हविर्लम्बनेन।नेनागमयन्तेति द्वितीयस्यार्थः। होमसम्बन्धिने धारयितेऽग्नौषयितमायाग्नये हविर्दानार्थं तत् प्रणयनं क्रियत इति वाक्य शेषः। किञ्च यो देवश्रीः श्रियन्त इति श्रियः देवाःश्रियो यस्य स तथोक्तः ; भक्तेभ्यः श्रियं दातुं मनो यस्येति श्रीमनः, शतानि पयांसि यस्यासौ शतपयः, त मग्निं परिगृह्य देवाय जनःप्रदेशं गतवन्तः। गत्वा च देवा ऋत्विग्भि र्या देवेभ्यो यज्ञ मिच्छन्तः स्थितवन्त इति तृतीयस्यार्थः। "शमिनेति तृतीयैकवचनस्य सु इत्यादेशः। स मिता चान्यश्च यागाय हविः वीतं इष्टं यत्र यस्मिन् प्रणयनप्रदेशे हव्यं हव-नार्ह मग्नि मध्वर्य्वादीनां 'मस्य' चपावाक् तुरीयो यज्ञो गच्छति तथाविधानात् तस्मादिम्मे ऋग्यजुस्साम लक्षणानि वाक्यानि चाशि-षश्च नोऽस्मात्र जुषन्ता मिति चतुर्थस्यार्थः। सूर्यस्य रश्मिभि-र्युक्तो हरितवर्णकेशः ज्योतिरूपः प्रणीयमानोऽग्निलक्षणः सविता चानवच्छिन्न मुद्यच्छति। तस्याग्ने रनुज्ञायां चास्य महिमानं विद्वान् पूषा याति (तदुत्पाद्याः पशवः प्रवर्त्तन्त इत्यर्थः। किञ्च सोऽग्नि विश्वानि भुवनानि सम्पश्यन्तेषां रक्षको भवतीति पञ्चमस्यार्थः) * ॥ १२ ॥

तथैवैतद्यजमानो भ्रातृव्यस्य हन्ता इति सामान्येनोक्तं सम्प्रति ता एव पञ्चदिशो विशिष्य दर्शयन् तासा मुक्त मर्थं स्वाधीन-

* बन्धनीचिह्नान्तः प्रदर्शितः पाठो नास्ति ज-पुस्तकादन्यत्र।

तया प्राप्तिमाह— "तथा इति, तदिति। 'देवा' यस्मिन् काले 'असुराणां' दिशो वृञ्जत तस्य कालस्य परामर्शः एतच्छब्देनानन्तरोक्ता मन्त्राः परामृश्यन्ते। अहङ्कारिभ्यो य मभितवन्तः समारोहयन् स्वाधिनो भवन्तः। "अथो इति। किञ्च देवा वं तस्मिन् काले 'एताभि' ऋग्भिः 'आतः' सूर्यावस्थानप्रदेशलक्षणान्तरिक्षपर्यन्तं समाप्नुवन् तद्वदेवाय मपि यजमानो भ्रातृव्यतोपगमप्यस्वाधिनो भूतास्ता पञ्चदिशः आतः अन्तरिक्षात्मकान्नीध्रमण्डपपर्यन्तं समाप्नोति ॥ १२ ॥

उक्ते मंत्रे आग्नीध्रपर्यन्तं गत्वा तत्रैकस्य पृश्निवर्णस्याश्मन उपधानं विधत्ते *— "अथेति। 'पृश्नि शब्देन श्वैत्य †' मुच्यते पृश्नेरश्मन ‡ उपधानेनादित्यस्यैवोपधानं भवतीत्याह। "असौ वा इति। आदित्यमण्डलमाहृश्यप्रदर्शनेनोक्त मश्मनः पृश्नित्व मुपपादयति। पृश्नि र्भवतीति तस्य चाश्मन उपधानं गार्हपत्याहवनीययो र्मध्ये कर्त्तव्य मित्याह— "त मन्तरेणेति। गार्हपत्याहवनीययोरधस्तनोपरितनलोकद्वयात्मकत्वाल्लोकद्वयस्य च मध्ये सूर्यस्य तपनात् सूर्यात्मकस्याश्मनस्तत्रोपधान मुपपन्न मित्याह। ("अयं वै लोक इति। गार्हपत्याहवनीययो र्मध्यभागस्योपधान

* "आग्नीध्रदेशाद्दक्षिणं पृश्न्यामश्मिनं पृश्न्यश्मान मुपदधाति"— इति का० श्रौ० सू० १८. ३. १६।

† "!श्वैत्य०" or "श्वैता० ?" इति क।

‡ "पृश्न्या०नं ततं वृत्तं पाषाणं विचित्रवर्णं वा" इति का० श्रौ० सू० १८. ३. २०।

स्थानतया विज्ञानादाग्नीध्रादन्यत्रापि तदुपधानं स्यादित्यत आह ॥ १४ ॥

"आग्नीध्रेलाया मिति । 'ऐला' शब्दः अवकाश माचष्टे । गार्हपत्याहवनीययोरध्यस्तनो) * परितन लोकात्मकयो र्मध्यवर्त्ति-त्वयाग्नीध्रस्यान्तरिक्षात्मकत्वं अध्व इत्यर्थमार्ग उच्यते, तत्रैतस्या-श्मन उपधानं क्रियते तस्मादितः प्रदेशादूर्द्ध † मार्गे एष सूर्य स्तपतीत्यर्थः ॥ १५ ॥

अथ तस्याश्मन आदित्यात्मकत्वादादित्यस्य च प्राणाद्या-त्मकत्वात्तदुपधानेनात्मनि प्राणादिधारणं सम्पाद्यत इत्याह,— "स एष इति । 'स' आदित्यात्मकादित्यरूपत्वात् आदित्यस्य च प्राणत्वं तदुपाय प्राणिन श्चेष्टन्ते। तदस्तमये तु न चेष्टन्त इति । अतएव श्रूयते— "यो सौ तपन्नुदेति । स सर्वेषां भूतानां प्राणा-नादायोदेति ।०—०। असौ योऽस्तमेति । स सर्वेषां भूतानां प्राणा-नादायास्तमेति इति ‡ । प्राणत्वादेष वायुरूपत्वं प्राणिना मेव जीवनकालसम्बन्धात् । "आयुर्ह्येतदिति । एषो श्मा यतः कारणा-दायु एतदिति नपुंसकलिङ्ग मायुरित्येतद्रूपत्वं तस्यायु रश्मं तद्वता मेव भोक्तृत्वात् । अत एतदश्मं तस्मात् तदुपधानेन स्वकीय मात्मनि प्राणादीन् धारितवान् सम्भवति ॥ १६ ॥

अथ तस्योपधाने मन्त्रद्वयं प्रदर्शयद् व्याचष्टे ,— "स उप-

* बन्धनीचिह्नान्तः प्रदर्शितः पाठो नास्ति ज-पुस्तकादन्यत्र ।

† 'प्रदेशाद् ऊर्ध्वं'- इति क, 'प्रदेशादूर्द्ध' इति ज ।

‡ तै० आ० १. १४. १

दधाति विमान एष *" इति। 'हि' यस्मात्कारणात् 'एष' सूर्यो-ऽभूत ग्रामस्य निर्माता द्युलोकस्य मध्ये आस्ते, अत उक्तं,—'विमान' इति उदयमानः सूर्यः पृथिव्यादीन् स्वप्रकाशेनापूरयतीति। त मर्थं माहेति व्याचष्टे,— "आप प्रिवामिति। 'प्रा पूरणे' †— इत्यस्माद्वर्त्तमानार्थस्य लिटः अनुरादेशः। 'विश्वाचोघृताची' पदाभ्यां विश्वेषां भूतानां ‡ च व्यापनात् वेदयः सुचञ्च विवक्षन्त इत्याह,— "स विश्वाचीरिति, "पूर्व मपर मिति। पृथिवी द्युलोकमधोयन्ते, किञ्च 'पूर्व' मित्यनेन पूर्वं चतो गार्हपत्या उच्यते,— अपर मिति अनेनेदानीं चीयमान आहवनीय इति व्याचष्टे,— "अन्तर पूर्वं मिति॥ १७॥

द्वितीय मन्त्रे,— "उक्षा समुद्रः §। (पूर्वत्वाद्योनिं" मध्ये दिवस इति पादत्रयार्थः प्रसिद्धा इत्याह। "उक्षा समुद्रो अरुण इति चतुर्थपादे 'रजः' शब्देनेते लोका)॥ विवक्षन्त इत्याह,— "विचक्रम इति। भूत ग्रामस्य निर्माता द्यावा पृथिव्या अन्तरिक्षं वा समन्तात् पूरयन् एष सूर्यो द्युलोकस्य मध्ये तिष्ठति; किञ्च स सूर्यो पूर्वापरञ्च केतुं लोक मन्त-

* वा० मं० १७. ५६।

† अ० धा० १०६१ धा०।

‡ 'विश्वेषां हविषां घृता'— इति भ,

§ वा० मं० १७. ६०।

|| वन्धनीचिह्नान्तः प्रदेशोऽयं पाठो नास्ति ज पुस्तकादन्यत्र।

द्यावापृथिव्यो र्मध्ये गार्हपत्याहवनीययो र्वा मध्ये विद्यमानोऽग्नुवं यन्निविष्टं पश्यतीति प्रथमस्यार्थः। तथा चैवं "आदित्याज्जायते वृष्टिः" * इति तस्य वृष्टिहेतुत्वात्। अतएव समुद्रात्मकः वर्तमानाकृणः पर्णशब्देन पतन मुच्यते। शोभनतपन एवंविधः सूर्यस्य लोकस्य पितृरूपस्य योनिं स्थान माविवेश भूलोकादादित्याज्जायमान इव दृश्यत इति तस्य पितृलोकोपचारः। किञ्च देवो मध्ये आग्नीध्रमण्डपलक्षणे निहितः वर्णन 'पृश्निरश्मा' अश्मरूपः सूर्यः त्रिविधं लोकाक्रमणे 'छन्दसि लुङ्लङ्लिटः' इति वर्त्तमाने 'लिट्' "विक्रममाणो वा एष एषां लोकाना मन्तान्याति" इति श्रुतेः। रजस इत्येकवचनं मतान्तरीति। (द्विवचनं वा विवक्षितं लोकाना मन्तान् गीतान् पाति स्वकीयेन प्रकाशेन तमो निवर्त्तयन् पदार्थांश्च दर्शयन् रक्षतीति) † द्वितीयस्यार्थः॥ १८॥

उपधान मश्मनोर्हितं प्रशंसति,— "द्वाभ्या मिति। अथ तयोरेव छन्दः प्रशंसति,— "त्रिष्टुभ्या मिति। 'एष' सूर्यं स्त्रैष्टुभ (त्रैष्टुभे अन्तरिक्षे वर्त्तमानत्वादन्तरिक्षस्य त्रैष्टुभ) ‡ त्वं तैत्तिरीयके सूर्ये श्रूयते – "गायत्री पृथिवी त्रैष्टुभ मन्तरिक्ष मिति § प्रकृतस्याश्मन इष्टकान्तरवदुपधानस्य विधानात्तद्देव-

* मनु सं० ३. ७६।

† बन्धनीचिह्नान्तः पाठो नास्ति ज-पुस्तकादन्यत्र।

‡ बन्धनीचिह्नान्तः पाठो नास्ति ज-भ-पुस्तकयोरन्यत्र।

§ "गायत्री वै पृथिवी त्रैष्टुभ मन्तरिक्षं"—इति तै०सं० १. ७. ५. ४

साधनप्रसक्तो निषेधति न सादयतीति तत्रोपपत्ति माह— "असक्तो ह्येष इति। स एष सूर्यः असक्तः क्वचिदेवावस्थितो न भवति सर्वत्र परिभ्रमणादित्यर्थः। माभूदसक्तत्वात्तस्य सादनं सूददोहसाधिवदन मपि न कर्त्तव्य मित्यत आह— "न सूददो हसाधिवदतीति। सूददोहसाधिवदन मपि न कर्त्तव्यं कुत इत्यत आह,— "प्राणो वा इति। प्राणात्मके सूर्ये प्राणात्मकस्य सूददोहस्या पिष्टपेषणवन्निष्फलत्वादित्यर्थः। तस्योपहितस्यात्मनो रक्षां विधायाहवनीयदेशंप्रति गच्छेदिति विधत्ते,— "तमभि- धायेति। यथाऽश्मान न नश्येत्तं निधायाश्मोप्रसमोपदेश मति- क्रामेयुः*रित्यर्थः॥ १९॥

"तस्योक्तो बन्धुरिति "इन्द्रं विश्वा अवीवृधन्† इतीन्द्रं हि सर्वाणि भूतानि वर्द्धयन्तीत्यादिनास्य ब्राह्मणं प्रथमकाण्डेऽभि- हितम्। "देवह्वरित्यादिकस्याय मर्थः,— यतो यज्ञो देवानाह्वय- तीति देवहूः 'सुम्न' मिति सुखनामधेयं सुम्नयाह्वयतीति सुम्नहूः तत् साधनत्वात्। अतो देवहूर्यज्ञो देवानावक्षत् आवहतु सुम्नहूर्यज्ञो देवानावहत्वित्युच्यते। प्रत्यवेवाग्निरिति अग्निर्देवो देवान् यजतु आवहत्वेतदुक्तं भवतीति यक्षत्। वक्षत् यक्षत् वहतेर्यजेश्च सिब्बहुलं लेटीति‡ सिप्प्रत्ययो लेटोऽडाटाविय- डागमः इतश्चलोप इति तिप इकारलोपः॥ २०॥

---

* निधायैनमनिक्रामतीन्द्रं विश्वा इति"—का० श्रौ० सू० १८. ३. २१।

† वा० सं० १७. ६१।

‡ पा० सू० ३. १. ३४।

"वाजस्येति" "उद्ग्राभश्चेति" मन्त्रद्वयं * निगदव्याख्यात मित्याह,— "वाजस्य मा प्रसव इति। पञ्चदिश्यो दैवीरित्यादिभि र्मन्त्रै र्गार्हपत्यादाग्नीध्रपर्यन्तं गमने भ्रातृव्यसम्बन्धिनीः सूर्यादर्वाचीः। पञ्चदिशस्ततो गमय्य स्वयं प्राप्तवान् भवतीति उक्तम् ,—

अथ "इमं विप्रा अवीवृधन्" इत्यादिभि र्मन्त्रैराग्नीध्रादाहवनीयं पर्यन्तं गमने सूर्यादूर्ध्वा भ्रातृव्यसम्बन्धिनीस्तस्तो दिश स्तथैव प्राप्नोतीत्याह ,— "तथा अमुष्यादित्यादिना — "भात इति द्युलोकपर्य्यन्त मित्यर्थः ॥ २१, २२, २३ ॥

चित्याग्नि समीपगमनानन्तरं † क्रमध्व मित्यादिभिः पञ्चभि र्मन्त्रै ‡ स्तस्यारोहणं विधत्ते §— "अयाग्नि मिति। चित्याग्निरूपरिधार्यमाणे उख्याग्नौ होमविधानेन तत्र तदा वचनार्थं कस्याचिदपेक्षणादग्निनिधाने यजमानस्यापि निधानात् तदपेक्षा मारोहन्तीति बहुवचनम्। "स्वर्गो वै लोको नाकः" इत्यादिनारोहणमन्त्रान् व्याचष्टे— "क्रमध्व मिति ‖ तेषा मेव परेषामभिधानम्, 'अनेनाग्निना' चित्याग्निना 'एतम्' इत्यभिनयेन निर्देशः 'एतं स्वर्गं' क्रमध्वं अप्रतिविघ्नं न गच्छतीत्येतदुक्तं भवतीत्यर्थः। एते क्रममाणा अध्वर्युप्रभृतयः एन मुख्याग्निं हस्तेषु बिभ्रतः धारयन्तः अतः इमा एतार्थो मन्त्रेण प्रतिपाद्यते।

---

* वा० सं० १७. ६३, ६४। † 'गमनामंतरं'—इति क, भ।

‡ वा० सं० १७. ६५—६९।

§ 'क्रमध्व मग्निनेति चित्यमारोहन्ति।'—इति का० श्रौ० सू० १८ ४. १।

‖ वा० सं० १७. ६५।

"दिवस्पृष्टं स्वर्गंलोक मित्यनेन मन्त्रे 'स्वर्गत्वा' इत्यत्र स्वरित-स्यार्थ उक्तः। अत्र 'दिव'-शब्देन द्युलोक उच्यते, द्युलोकस्य पृष्टं उपरितनं स्वर्गं सुखातिशयहेतुं तस्यैवस्थानविशेषां गत्वा देवेभिर्देवैर्मिश्राः संयुताः सन्तस्तिष्ठतेत्यर्थः। 'दिवस्पृष्ट' मिति षष्ठ्याः पतिपुत्रेत्यादिना विसर्जनीयस्य सकारः॥ २४॥

प्राची * वे दिमन्वे रिति। प्राचीदिमन्वे: समन्त्रिणी खलु अतएव तैत्तिरीयकं— "प्राचीदिक् अग्निर्देवता"-इति †। "अग्ने स मिति। अग्नेष्टका स्वरूपस्याग्ने त्वं पुरोवर्त्तमानोऽग्नि र्भवेदं यत्र इत्युक्तं भवति। "दीप्यमान इति। दीप्यते इत्यस्यार्थ-कथनम्॥ २५॥

"पृथिव्या अह ‡ मिति। गार्हपत्यस्याग्नीधाहवनीयानां पृथिव्यादिलोकत्रयात्मकत्वात् क्रमेण तत्रागमनात् पृथिव्यादि-लोकत्रयं क्रमेण रुढावानस्मीत्यर्थः। 'आरुह' मिति "कृमृदृरुहिभ्य श्छन्दसि-इति च्लेरङादेशः" § "दिवो नाकस्येति। नाकस्य सुखहेतुभूतस्य द्युलोस्य 'पृष्ठात् ज्योतिर्विशिष्टं' प्रकाशमानमर्हं लोक 'मगामह' मित्येतदुक्तं भवति। अत्रापि पूर्ववत् सुखाति-शयहेतुभूतो द्युलोक देव्यविशेषः स्वर्गशब्देनोच्यते॥ २६॥

"न हैवेति। ये स्वर्गलोके यन्ति ते फलान्तरन्नापेक्षन्ते खलु, अत उक्तं स्वर्यन्त ‖ इति। एष इवेति सर्वत्र प्रका-

* वा० सं० १७. ६६। † तै० ब्रा० ३. ११. ५ १

‡ वा० सं० १७. ६७। § पा० सू० ३. १. ५९।

‖ वा० सं० १७. ६८।

रेव जगद्धारयतीति। 'एष एव यज्ञो विश्वतोधारः' येन एवं यज्ञं वितन्वते एत एव सुविद्वांसः खलु विदुषा मेव यज्ञ निष्पादकत्वादित्यर्थः ॥ २७ ॥

"अग्ने प्रेहीति*। "इम मेतदिति। 'त्व मेषां' देवान् प्रष्टुमिच्छतां 'प्रथमः' प्रेहीति इम मुख्याग्नि माह-अग्नेस्तुष्टत्वस्तुवैदुपकारत्वात्। 'इयक्षमाणा' इति व्याख्यातं यजमानं भृगुभिरितिस्पष्ट मन्यत्। उक्त मन्त्रस्यार्थेन चित्याग्नेरारोहणेन स्वर्गे लोके विद्यमाना भ्रातृव्यसम्बन्धिनीः पञ्चदिशः पूर्वतः प्राप्तवान् भवतीत्याह ॥ २८ ॥

"तथा अमुष्मिंल्लोक इति। अत्रापि 'मातः' इति द्युलोकादुपरितन स्वर्गावधित्वेनोच्यते ॥ २९ ॥

चित्याग्निसमारोहणानन्तर मक्षिवत्युष्मी होमं विधत्ते। "अथैति। अभि जुहोति अभिहोमेनेप्सित मत्वादेन मिति कर्मणि द्वितीया विहिता। आहुतिश्चित्यं प्राप्तस्याग्ने रूपरिष्टादन्नं सम्पाद्यत इत्याह— "एतद्वा इति। विहिते होमे द्रव्यं विधत्ते— "कृष्णायै शुक्लवत्सायै पयसा" † इति, उक्तलक्षणाया गोः पयस उपादाने कारण माह— "रात्रि र्वा इति। रात्रि खलु कृष्णाशुक्लवत्सास्या रात्रेरसावादित्ये वत्सः यथा गोः समीपे वर्त्तते तद्वदस्य रात्रिसमीपे वर्त्तमानत्वात्। अथ मेवार्थ स्तैत्तिरीयके श्रूयते— "अग्निश्चादित्यश्चरात्रेर्वत्सश्चेति आदित्य"-इति। एवञ्चास्याग्नेरादित्यात्मकत्वात् तथाविधाया गोः पयसा होमे स्वलोकभागेन तदेव विक्रियते,— "स्वेन

* गा० सं० १७. ६६। † का० श्रौ० सू० १८. ४. २।

रसनेति। तत्र प्रीषितवान् भवति, प्रोषयितस्यादित्याभक्त-स्यास्मेरूपा एव वर्त्तमानत्वेनोपधार्यमाण स एवोत्थानो जुहुया-दित्याह,—"उपरीति। प्रकृतहोमे साधारणं जुहुः प्राप्नो-तीति तदपवादत्वेनदोहनं विधत्ते— "दोहनेनेति। दोहनेन हि पयः प्रदीयत इति दोहनान्तरं पक्षान्तरे दोहनेने खलु पयः प्रदीयत इत्यर्थः॥ २०॥

प्रकृत मेवातिहोमं प्रकारान्तरेण प्रशंसति— "यद्वेवेति। अग्नेः शिरोवत् प्राधान्यात् सच्छिरसं पयसः प्राणत्वं तत् पुष्टिहेतुत्वात्। "यथा स्वयमातृण्णा मिति। होमावसरे स्वयमातृण्णाया उपरि किञ्चिद्यथा 'प्रक्षरेत्' तथा होमं कुर्यात्; एवञ्च स्वयमातृण्णायाः प्राणत्वात्। अग्नेस्तु शिरस्त्वात् प्राणश्च शिरश्चेत्युभे अपि ययो लक्षणेन रसेन सन्तनोति तदेव विवृणोति 'सन्दधाति' परस्परसम्बन्धं करोतीत्यर्थः। प्रकृतहोमो मन्त्रो दर्शयन् तत्र प्रथममन्त्रस्वब्राह्मण षष्ठकाण्डे प्रागेवाभिहित मित्याह— "नक्तोषासेति * ॥ २१ ॥

* वा० सं० १७. ७०।

"स्वयमातृण्णा मध्यग्निं धारयन् शुक्लवत्सा पयमाभिजुहोति कृष्णाया दोहनेन स्वयमातृण्णा मवभिचन्नक्तोषासेति। स्वयमातृण्णाया उपरि धारयन्नग्निम् कृष्णायाः गोः शुक्लवत्सायाः पयसा दोहनेनाभि-जुहोति स्वयमातृण्णा मवमिचन्। स्वयमातृण्णाया उपरि प्रतिप्रस्थाता त मिध्मग्निं धारयन् स्रक्मयेन पात्रेण जुहुस्थानीयेन जुहोति।"

—इति का० श्रौ० सू० १८. ४. २. २।

द्वितीयं मन्त्रं व्याचष्टे— "अग्ने: सहस्राक्षेति * हिरण्यप्रकाशैर्वा इति। प्रकृष्टोऽग्नि: प्रोक्षणी विनियुक्तै: † सहस्रसङ्ख्याकै: ‡ हिरण्यशकलै: सहस्राक्ष: खलु, अतश्च मन्त्रे तथा सम्बोध्यत इत्यर्थ:। प्रकाशकत्वसाधारण्येन हिरण्यशकलाना मक्षितोपचार:। "यदद: शतशीर्षेति। प्रजापतिशब्देनोक्तेष्वसुषु अन्तर्वर्त्तमानेन अग्नौ प्रतिष्ठितेषु तेषु स एव शतशीर्षो रुद्र: समभूदिति काण्डस्यादावुक्तम्। अतोऽत्राह: अ-शब्देन तत्काल: परामृश्यते अतोस्मिन् काले "शतशीर्षाऽरुद्रो सृज्यतेति। यत्र अत उक्तं मन्त्रे शतमूर्द्धन्नितीत्यर्थ:, य: शतशीर्षा भवति तस्य शतसङ्ख्याका: प्राणा: सहस्रसङ्ख्याका: व्यानाश्च भवन्ति। शतं सहस्र मित्यपरिमित नामधेयम्। तस्मादुच्यते,—" शतं त इति। त्वं सर्वस्मै इति। 'सहस्र' मित्यपरिमित सङ्ख्यावचनात् सहस्रस्येत्यनेनापरिमित सङ्ख्यावत इत्यस्यार्थस्याभिधानात् सर्वस्य इत्येतदुक्तं भवति। सहस्रेति लिङ्गव्यत्यय: "अधीगर्थदयेशाङ्कर्मणि"§-इति षष्ठी प्राप्ता षष्ठ्यर्थे चतुर्थी वक्तव्येति। 'सर्वस्मै वाय इति चतुर्थी। "एष वै वाज इति। 'वाज'-शब्दोऽन्नवाची तद्धेतुत्वादेवो ऽग्निर्वाज: खलु अतस्तस्मै ते विधेम वाजाय स्वाहेत्यनेन त मग्निं प्रीणाति। हे सहस्राक्ष: शतमूर्द्धं अग्ने! ते शतसङ्ख्याका:

* 'वा० सं० १७. ७१।

† इहैव पुरस्तात् का० ८. ७४. ७।

‡ 'हयंस्याकै:'—इति ह. भ, ञ।

§ पा०. सू० २. ३. ५२।

प्राणाः सहस्रसङ्ख्याकाः व्यानाश्च भवन्ति ; त्वं सर्वस्य धनस्य 'ईशिषे' ईश्वरो भवति ; तस्मै धनहेतुत्वे तदाप्तकाय ते वयं परिचरेम । इदं हवि ते स्वाहुत मस्तु इति मन्त्रार्थः ॥ १२ ॥

मन्त्रगतेन हिरण्येन सकलस्याग्नेरभि होमः सम्पन्न इति प्रशंसति ,— "द्वाभ्या मिति ॥ १३ ॥

अग्नि होमानन्तर मुख्याग्नेश्चितीनां मुपरि निधानं विधत्ते— "अथैन मिति । निधानमन्त्रे "सुपर्णोऽसि * गरुत्मान् † इत्यस्योपयोग माह । 'एतद्वा' इत्यादिना लोके हि योनौ सिक्तं प्रजननं समर्थं रेतो विक्रियते अवयवविभागवत् क्रियते । अतोऽत्रापि योनिरूपाया मुखाया संस्कृतस्याग्ने रेतस्स्थानस्यापि विकृत्या भवितव्य मिति । पूर्वं विकृत्या विकृतिसाधनभूतेन मन्त्रेण "सुपर्णोऽसि गरुत्मान्" इत्यादिकेन सुपर्णं गरुत्मन्तं कृत्वा विकृतवान् ‡ । तथा चयनकालेऽपि 'सुपर्णं गरुत्मन्तं' एव कृत्वा विकृतवान् ; सम्प्रति 'सुपर्णोऽसि गरुत्मान्' इत्यादिकेन 'सुपर्णं गरुत्मन्तं' कृत्वा निहितवान् भवति । चीयमानस्याग्नेः पक्ष्याकारेण चयनात् 'सुपर्णोऽसि गरुत्मान्' इत्युक्तम् । 'गरुत्मान्' प्रशस्तपक्षत्वात् , अतएव 'सुपर्णः' पर्ण-शब्देन

* "तस्या मग्निं निदधाति सुपर्णोऽसीति वषट्कारेण स्वयमातृण्णायां सुपर्णोऽसीति आश्रयेण वषट्कारेण चाग्निं स्थापयतीत्यर्थः ।" —इति का० श्रौ० सू० १८. ४. ५. ६ ।

† वा० सं० १७. ७२ ।

‡ "विततवान्"—इति क ।

पतन सुच्यते शोभनपतनविशिष्ट इत्यर्थः। "एवं ह्येष इति। (एष अग्निरेव सुक्तप्रकार मेतत् सर्वं करोति यतः अत उक्तं मन्त्रे पृथिव्याः सीदेत्यादीत्यर्थः ॥ ३४ ॥

द्वितीयं मन्त्रं व्याचष्टे— "प्राङ्मुखान इति।) * 'सुप्रतीकः' शोभनावयवः तत्त्व मितरान् प्रति न अपि तु अस्मान् मन्त्रो वेति व्याचष्टे— "न सु प्रतीक इति। अस्योत्थाग्ने रेव चित्याग्निः स्वसम्बन्धिस्थानम्। अतोऽग्नेः 'स्वो योनि' मित्यादिना चित्याग्निं साध्वाधितिष्ठते तदुक्तं भवतीति व्याचष्टे— "अग्ने स्वामिति अग्नामिति पृथग्व्यन्तरिचाभ्या सुपरिवर्त्तमानत्वेन द्युलोकात्मकत्वात् 'अस्मिन्' चित्याग्निलक्षणे द्युलोके 'अध्यासीद इत्यर्थः। विश्वेदेवा इत्यनेन 'विश्वैर्देवैः सह' स्वं यजमानं मन्त्रं सादितवान् भवति हे अग्ने! त्वम् गरुत्मान् अतएवं शोभनपतनोऽसि, तादृश स्त्वं पृथिव्यां पृष्ठे उपविशस्त्व-दीयाभासो अन्तरिक्ष मापूरय ज्योतिषा दिवं दृढां कुरु तेजसा दिशोऽपि दृढो कुर्विति प्रथमस्यार्थः। भाः ज्योति स्तेज इति प्रकाशविशेषाः। हे अग्ने! त्वं पूर्वस्यां दिशि प्राञ्चय-मानोऽस्माकं शोभनावयवो भूयाः, अत स्वां योनिं चित्याग्निं साध्वक्रियया अधितिष्ठ साधुयेति तृतीयैकवचनस्य सुपां-सुलुगित्यादिना यादेशः। अस्मिन् चित्याग्निरूपे उत्तरे सध-स्थेषु लोको अध्यासीद, हे विश्वेदेवाः! यूयं यजमानश्च

* बन्धनीचिह्नान्तः पाठो नास्ति क-ग-पुस्तकयोरन्यत्र

सीदत। यूयं सम्प्रदातृत्वेन सीदति। यजमानोऽधिकारित्वेन सीदत्विति द्वितीयस्यार्थं स्पष्टार्थम् ॥ १५ ॥

उत्तरवाक्यद्वये विधानान्तरं पश्चिमाग्नौ समिधामाधानं विधाय ताः समिधश्चित्याग्निं ग्रामस्याग्नेरुपरिष्टाद्रूपेण * स्तौति— "यथाग्निरिति ॥ १६ ॥

तत्र शमीमयीं समिधं प्रथम मादध्यादित्याह— "स वा इति। शमीमयाः प्रथममाधाने हेतु माह— "एतद्वा इति। 'एतस्या माहुत्या' मित्यनेन मभिजुहोतीति विहिताहुतिः परामृश्यते। एतस्या माहुत्यां हुतायां मग्निः प्रदीप्तः सन् 'उदज्वलत्'। पश्चादग्निं दृष्ट्वा येनोपायेनायम्नो न हिंस्यादिति। देवा स्तस्माद्भीताः पश्चादहिंसोपायत्वेन तं शमीमयीं समिध मपश्यं दृष्ट्वा च तया एत मशमयन् यत एव मनया शम-यन् तस्मादसौ शमीनामधेया ऽभूत्। अतः प्रथमं शमी-मयाः समिध आधानेन तथैवाय मपि यजमानः अग्निं एनं शमयति न जग्धे। जग्धि र्भक्षणं भक्षणाभावाय अहिंसायै इत्यर्थः ॥ १७ ॥

अथ तस्यां शमीसमिध आधाने मन्त्रं दर्शयति †,— "तां

* "ग्रामस्याग्नं उपरितनाग्निरूपेण' इति ज, "ग्रामस्याग्नं उपरितनाग्निरूपेण'—इति छ, झ, ञ।

† "समिदाधानं शमीमयीत्येकमौदुम्बरद्वयं ऽथवा इति सूत्र(१७. ७४—७६) लक्षणम्"—इति का० श्रौ० सू० १८. ४. ६।

सवितु रिति *। "कण्वो हैना मित्यय मर्थः,— कण्वो महर्षिः 'एनां' अभिरूपां गां 'ददर्श' खलु अतश्च 'सा' 'सहस्रधारा भूत्वा ऽस्मै कण्वाय 'सर्वान् कामान् दुदुहे' तस्मादाहिता अमी तथैव यजमानाय सर्वान् कामान् दुग्धे अस्याग्ने रुत्पादकत्वेन सम्बन्धिनी। अतएव श्रुतिः,— "शमीगर्भादग्निं मन्थन्ते" —इति †। 'प्रपीनां' प्रकर्षेणापीवरीं 'सहस्रधारां पयसा महीं' महतीं अभीष्टप्रदायां गां कण्वमहर्षिरदुहेरन्। उरणीयस्य सवितुरभिमतां 'चित्रां' चायनीयां 'सुमतिं' शोभन मतिं 'विश्वजन्यां' जनहितं यस्याः सा तथोक्ता सर्वस्योत्पादयत्रीं ता मह माहुण इत्यर्थः॥ ३८॥

शमिसमिदाधानानन्तरं वैकङ्कतसमिदाधानं विधाय तस्या वैकङ्कतसमिद्धोमब्राह्मणं प्रागेव षष्ठकाण्डेऽभिहित मित्याह— "द्यौर्वा इति। द्वितीयपादे अवसरे 'सधस्थ' इत्येनान्तरिक्ष मुच्यत इत्याह,— "अन्तरिक्षं वा इति। 'यस्माद्योने' रित्यत्र योनि शब्देनैष भूलोको विवक्ष्यत इत्याह,— "एष वा इति। 'प्र त्वे हवींषि' इति तुरीयः पादः प्रसिद्धार्थ इत्याह। "यदा वा एष इति। हे अग्ने! ते त्वां 'परमे जन्मन्' उत्पत्तिस्थाने द्युलोके 'विधेम' ‡ परिचरेम न केवलं द्युलोक एव कि

* वा० सं० १७. ७४।

† तै० ब्रा० १. १. ९.।

‡ वा० सं० १७. ७५।

स्तोमैः स्तुतिभिरुपलक्षितावयं अवरे द्युलोकादधस्थाने सधस्थे मद्दस्थाने अन्तरिक्षेऽपि विधेम किञ्च कस्मान्न पृथिव्यात्मकयोनेस्त्व मुदारिथ उद्गतवानसि ऋ गतौ लिट् संहितायां अन्येषामपि दृश्यत इति दीर्घः त मेनं लोकं अनया समिधा यज्ञेषु द्युलोकादीना मग्निकारणत्वेनाग्नेः कारणात्मकोरे (?) होमे उक्तः। अथ 'प्र त्वे हवींषि' इत्यनेनकार्याकारेऽग्नौ होमो विधीयते। ततः 'समिद्धे' सम्यक् प्रज्वलिते त्वे त्वय्येपि छान्दसत्वात् हवींषि प्रजुहुरे प्रजुहुविरे विपश्चित इति शेषः, इरयो रे इति इरे प्रत्ययस्य रे आदेशः। अतो वय मपि समिद्धे त्वय्येतां समिध मादधाति इत्यर्थः ॥ ३८ ॥

वैकङ्कतसमिद्धोमानन्तर मौदुम्बरसमिद्धोमं विधत्ते—"अथ उदुम्बरी * मिति। आधातव्याया उदुम्बरसमिधः कञ्चित् गुण माह—"कर्णकवती भवतीति। कर्णक शब्देनात्र पत्रशाखादिकं विवक्ष्यते। पत्रादीनां पशुपुष्टि † साधनत्वेन पशुत्वात्तथाविधायाः समिधो होमेन पशुरूपेणैवैनं ‡ प्रीणाति। तथाविधायाः समिद्धोमसम्भवे किं कुर्यादिति; तत्राह,—'यदि कर्णकवतीं न विन्देद्' इति 'दधिद्रप्सं' दधिबिन्दु 'मुपहृत्याद्' समिधि संश्लेष्या-

* "वैकङ्कतीं प्रेद्धो अग्न इत्यौदुम्बरी मित्यर्थः।"
—इति वा॰ सं॰ १७. ७४. भाष्यम्।

† "पशुपुष्टि॰"—इति क।

‡ "पशुरूपेणैवानेनैनं"—इति ज।

दध्यात्। तत्र समिधि 'दधिद्रप्स उपतिष्ठते' इत्येतत् तदेव पशुरूपं भवति। अतस्तथाविधायाः समिधो माधानेन त्वेन मग्निं पशुरूपेणान्नेन प्रीणाति,— प्रेद्धो अग्ने दीदिहि * इत्यादि ॥ ४ ॥

समिद्धोमानन्तर माज्याहुतीर्विधत्ते,— "अथाहुती इति। यथेति लोके भुञ्जानस्य पुरुषस्य यथा शाकसूपौदनादिकं परिविष्य पश्चात् जलादिकं पेयं पाययेत् तादृक् तदाज्याहुतिकरणं भवति। प्रथम समिद्धोमस्यपरिवेषणवत् कृतत्वादित्यर्थः। तत्रासाधारणेन स्रुचैव सर्वासां होम प्रसक्तावाह,— "स्रुवेणेति। अग्ने त मद्याश्व मित्यस्य प्रथमाहुतिमन्त्रस्य तात्पर्यार्थं माह,— "यस्ते हृदिस्पृगिति। हृदिस्पृश मिति ऋचुभ्यां टे रुपसङ्ख्यान मिति समस्यालुक्। हे अग्ने 'ते' तव हृदिस्पृक् † हृदयङ्गम 'स्तोम' स्तोत्र मस्ति, ते तं स्तोमं 'ऋध्या' समृद्धक्रिया 'समित्ये' तदुक्तं भवति, अनेन मन्त्रेणेत्यर्थः। अथोऽस्य मन्त्रस्य छन्दो प्रशंसति,— "पङ्क्त्या जुहोति। पञ्चपादा यस्याः सा पञ्चपादा "संख्यासु पूर्वस्य ‡"-इति पादशब्दान्त्यभावे "पादोऽन्यतरस्याम् §"-इति। विकल्पेन

* वा० सं० १७. ७५।

† वा० सं० १७. ७६।

‡ पा० सू० ५. ४. १४०।

§ पा० सू० ४. १. ८।

डीति प्रामे "टाड्डचि *"-इति षट् प्रत्ययः। 'पञ्चचितिकोऽग्नि' रित्यनेनाग्नेः पञ्चत्व सङ्ख्यायोगो दर्शितः "पञ्चऽर्त्तवः संवत्सरः" संवत्सर इत्यनेनापि प्रकारान्तरेण स एव प्रदर्श्यते। हेमन्त शिशिरयो रुभयोरपि विहित वैशिष्ट्याविशेषणैकत्व मभिप्रेत्योक्तं "पञ्चऽर्त्तव इति। एवञ्चाग्नेः पञ्चात्मकस्यास्य पञ्चपदपङ्क्ति साध्यो होमे तत् समितनैवानेनैवं प्रीणातीत्यर्थः ॥ ४१ ॥

देवताविशेषं सम्बन्धेन द्वितीया माहुतिं दर्शयति,—"अथेति। विश्वकर्मा देवतास्या इति 'वैश्वकर्मणी' माहुतीं जुहोति कुर्यादित्यर्थः। ननु अस्य होमस्याग्न्यर्थत्वादत्र विश्वकर्म-देवत्यत्वे प्रकृतसमन्वितार्थ तानस्यादित्यत उक्तं;—"विश्वकर्माय मग्निः रिति। अग्ने तद्धोमसाधनं मन्त्रं व्याचष्टे— "चित्तिं जुहोमीत्यादिना †। अत्र चिति-शब्दार्थं दर्शयन् तस्य चात्र सम्बन्धिविशेषोपादानाभावेन साधारण्यात् सम्बन्ध्यन्तरप्रसक्ति निवारणेनोत्तर वाक्योपात्तदेव सम्बन्धित्वे दर्शयति— "चित्त मेषा मिति। तथा देवा इहागमन्नित्यत्रागमन्नित्येतस्येदं व्याचष्टे— "यथा देवा इहागच्छानिति। आगच्छानिति आगच्छेयु रित्यर्थः। गमेर्लुङि च्लेरङ्। 'ऋतावृधः', ऋत-शब्दस्य सत्य मर्थं इत्याह। "सत्यवृध इति विश्वस्येत्यादि पदद्वयं व्याचष्टे— "योऽस्येति सर्वं देवाचित मित्यनेन विश्वा-

* पा० सू० ४. १. ६।

† वा० सं० १७. ७८।

होदाश्च मित्येतद्व्याख्यातम् । कीदृशा देवाः वीतिहोत्राः होत्रा इति यज्ञनाम* वीतिरभिलाषो होत्रा येषां ते वीतिहोत्राः कामित यज्ञाः । होत्रा शब्दो यजमाननामसु पठितः । ऋता-वृधः सत्येन वर्द्धमानाः छान्दसोदीर्घः देवा यथा इहाग्नि समीपे आगच्छतेषु तदर्थं मेषां देवानां चित्तिं अस्य यजमानस्य यज्ञं गच्छाम इत्येव रूपं जुहोमि सम्पादयामि केन साध-नेन समाहितेन मनसा हूयमानेनानेन घृतेन च एषां चित्तं सम्पादयामि । यत एवं तस्मादिश्वस्याख्य सर्वस्य भुवनस्य पत्येति विश्वकर्मणे† सर्वदा विषय प्रकाशन मचितं इदमाज्यरूप हवि जुहोमीत्यर्थः ॥ ४२ ॥

उक्त होमानन्तरं पूर्णाहुतिं‡ विधत्ते— "अथेति पूर्णा चासावाहुतिश्चेति § पूर्णाहुतिः आज्यपूर्णया स्रुचा सम्पाद्यमाना आहुति रित्यर्थः । सर्वं वा इति यत् पूर्वां तत् सर्वं अपरि-मितत्वात्, अतएवं सर्वेणैवानेन प्रीणाति ॥ ४३ ॥

"सप्त ते अग्न इत्यादिना ‖ तन् मन्त्रं व्याचष्टे—तत्र 'समिध'

* निघ० ३. १७. ८ ।

† 'विश्वकर्मणाय'—इति भ, ज ।

‡ "पूर्णाहुतिश्च सप्त त इति। स्रुचा पूर्णाहुतिश्च जुहोति' पूर्णया स्रुचा आहुतिः पूर्णाहुति रिति ॥
—इति का० श्रौ० सू० १८. ४. ६, १० ।

§ पूर्णाचासावामिश्चेति'—इति ज ।

‖ वा० सं० १७. ७६ ।

मित्यनेनास्य समिन्धने कृत्वा प्राणा विवक्षत इत्याह— "प्राणा वै समिध इति। प्रजापते र्विस्रंसनेन ततो निर्गता ऋषयः पृथगेव सप्तदेहानसृजत्। ततश्च तान् व्यवहारासमर्थान् दृष्ट्वा पश्चात् तानैकमेव पुरुष मकुर्वन्। एतत् सर्वं स प्रपञ्चं षष्ठकाण्डस्यादावभिहितम्। स एव प्रजापतिरियं चीयमानोऽग्निः अतोऽत्र जिह्वा-शब्देन * सप्त पुरुषा विवक्ष्यन्त इत्याह— "या न सुनिति तेषा मेतदाह्वेति तेषा मेतदभिधानं करोति तानाह्वेत्यर्थः। अत्र प्राण-शब्देन शरीरस्थानीन्द्रियाणि उच्यन्ते अतस्तेषां शब्दानामन्तरं इन्द्रियवाचकत्वेपि न साङ्कर्यम्। "सप्तधाम प्रियाणीत्यनेन छन्दांस्यभिधीयन्त इत्याह छन्दांसीति यत एत मग्निं होतृमैत्रावरुणादयः सप्तहोत्रा अग्निष्टोमादिभेदेन सप्तधा यजन्ति। अत उच्यते सोऽर्थो मन्त्रेणेत्याह,— "सप्तहोत्रा इति स्थानवाचकत्वात् योनि-शब्दे चित्तयोऽभिधीयन्त इत्याह,— "चितीरेतदिति। घृतस्य रेतः सम हि हेतुत्वे चितीनाञ्च लोकात्मकत्वात् घृतेनेति वचनेन लोकेष्वेव रेतो निहितवान् भवतीत्याह,— "घृतेनेतीति। स्वाहाकारस्य यज्ञात्मकत्वात् स्वाहेत्युक्त्वा इद मुक्तं प्राणादिकं

* "सप्तजिह्वाः सन्ति ज्वालारूपाः सप्तजिह्वाः हिरण्याङ्गाद्या आगमोक्ताः यद्वा आथर्वणिकोक्ताः काली कराली च मनोजवा च बिलोहिता च सधूम्रवर्णा स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्तजिह्वा।"

—इति मु० उ० १ २।

सर्वं युगपदेव यज्ञाहं करोतीत्याह,— "स्वाहेति। हे अग्ने! सप्तविधः पुरुषाः सप्त ऋषयः मरीच्यादयश्च तत्र द्रष्टारः सन्ति। तथा सप्त प्रियाणि धाम धामानि गायत्र्युष्णिगनुष्टुप्बृहतीति पङ्क्तिः त्रिष्टुप् जगति एकाख्यानि छन्दांसि वसन्ति किञ्चत्वा होतृब्रह्ममित्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीध्रो ऽच्छावाकाख्यां सप्तहोत्राश्च अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडश्यतिरात्र आप्तो-र्यामो वाजपेयश्चेति सप्तधा यजन्ति तादृश त्वं अस्माभिरिज्य-मानेन सप्तयोनो घृतेरापूरयेति मन्त्रार्थः ॥ ४४ ॥

मन्त्रे पौनःपुन्येन सप्तसंशब्द प्रयोगः कृत्स्नस्याग्नेस्तृप्तिहेतु र्भवतीत्याह,— "सप्तसप्तेति। प्रकृताहुतीनां त्रित्व मपि तत्रैव प्रशंसति— "तिस्र आहुतीरिति। समिधा माहुतीनाञ्च मिलिता षट्सङ्ख्या भवति। तस्य तु ब्राह्मणं प्रागुक्त मित्याह— "तिस्रः समिध इति ॥ ४५ ॥

अथ समिदाहुतीनामस्थिमांसात्मकत्वात् तत् सन्निवेशानु-सारेण नास्तिष्ठन्नासीनो जुहुयादित्याह,— "तिष्ठन्नित्यादिना। कठिनावयवसन्निवेशसाधारण्यात् समिधा मस्थित्वं तानि उच्छ्रितत्वात् तिष्ठन्तीव भवन्ति। अस्थि मांसानुसारेण समिधां अन्तरां आज्याहुतयस्तु बाह्याः कर्त्तव्या इत्याह,— "अन्तरा इति ॥ ४६ ॥

अथास्याग्निप्रणयनात्मकस्य कर्मणः सम्पत्ति मभिधातुं प्रतिजानीते,— अथातः सम्पदेवेति। ता मेव दर्शयति,— "षट् पुरस्तादिना। प्रणयनात् पूर्वं तिस्र आज्याहुती स्तिस्रः

समिदाहुतीव जुहोति। अतस्तत्र षण्मन्त्रा भवन्ति यद्यपि द्वितीय तृतीय राज्याहुत्योः * षोडश मन्त्राः प्रयुज्यन्ते तथापि आहुत्यनुसारेण ते सर्वेऽपि द्वावेव मन्त्रा विति परिगण्येते। उपरिष्टादग्निनिधानात् पश्चात्तिस्रः समिदाहुतीस्तिस्र आज्याहुतीव जुहोतीति तेऽपि षण्मन्त्राः। आग्नीध्रमण्डपेऽपि कश्चित् पृश्निरश्मोपधीयते तात्पर्यं षड्भि र्मन्त्रै र्मज्जन्ति। अत्र यद्यपि पत्रद्विशो दैवोरित्यादयः पञ्चैव मन्त्रा-गमने विनियुक्ताः, तथापि उदुत्वेत्यादिना मन्त्रेण सहैते षड् भवन्ति, इति षण्णामपि मन्त्राणां गमनसाधनत्वा-भिधानं गमनमन्त्रबाहुल्याभिप्रायम्। "विमान एष दिव" † इत्यादिभ्यां "पृश्नि मश्मान मुपदधाति ‡। "इन्द्रं विश्वा §" इत्यादिभिश्चतुर्भि र्मन्त्रैः "अग्नि" ‖ पर्यन्तं गच्छति। "क्रमध्व मग्निना ¶ इत्यादिभिः पञ्चभि र्मन्त्रैः नित्याग्नि मारोहन्ति। तदेव मेकोनत्रिंशत् मन्त्रा भवन्ति। एतदुक्त मन्त्रसाम्य "आहुतिरेव विंशतमी" त्रिंशत् सङ्ख्या पूरणी यद्यपि आहुतीत्यक्षयो बहवः सन्ति तथापि सामान्यानुसारेण ताः सर्वा अपि एकैवाहुति

---

* "द्वितीयराज्याहुत्योः (!)" इति क, भ, त।

† इहैव पुरस्तात् पृ० १३५ पं०१ ; वा० सं० १७. ५८।

‡ वा० सं० १७. ६०।

§ वा० सं० १७ ६१।

‖ वा० सं० १७. ६५।

¶ वा० सं० १७. ६२।

भवति। "सुपर्णोऽसि गरुत्मान्" * इत्याभ्यां द्वाभ्या मग्निं निदधाति । "तद् द्वाविंशत्" सङ्ख्यां सम्पद्यते, अनुष्टुप्द्वाविंश- दक्षरो भवति। अनस्त्वेतदाग्नि प्रणयनात्मकं मन्त्राहुति सङ्ख्या- द्वारा अनुष्टुप् छन्दो भवन्ति ; "सैषेति" ॥ ४७ ॥

स्तिस्त्रश्च अनुष्टुबित्येतद्द्वितीय विशेषापेक्षां सप्तमकाण्डे गार्हपत्याचयनाभिधानानन्तरम् †। तत्र तिस्रोऽनुष्टुभः सम्पाद्य तासां मध्ये एका माहवनीयं प्रत्यग् भवन्तीत्युक्तम् ‡। अत्रोक्त- प्रकारेणानुष्टुभः सम्पादने तासा मेका § अनुष्टुभ मत्रा- हुतवन्तो भवन्तीत्याह,— "तया अमू रिति। गार्हपत्यात् खल्वग्निराहवनीय स्थानं प्रति प्रणीतो ऽतस्त्वाग्निप्रणयने विद्य- मान मन्त्राहुति सङ्ख्याद्वारा त्यानुष्टुभः सम्पादनात् गार्हपत्ये सम्पादितानां मनुष्टुभा मेका मत्राहुतवन्तो भवन्तीत्युच्यते। गार्हपत्यादेकस्या अनुष्टुभोऽत्राहरणे प्रयोजन माह— "तद्य- देता मिति। अत्राग्निचयसरे 'एष सर्वोऽग्निः संस्कृतः' कार्त्स्न्येन संस्कृतः 'स' एषोऽग्नि अत्र मत्स्यदभक्षयिष्यदिति यत् तस्मै- नाल मासीत् अत्रादनाय समर्थो नाभूदित्यर्थः ॥ ४८ ॥

पश्चात् स चित्याग्निः प्रणेष्यमाण मग्निं त्वया अगते- नात्र मद्यामीत्यब्रवीत्। तत स्तथेति, तेनाप्युक्तोऽङ्गीकृतं। तस्मा-

* वा० सं० १७. ७२ ।

† का० ७. १. २. १९ ।

‡ "प्रत्यञ्चं नवंत्युक्तम्"—इति क, भ, ज ।

§ "तासा मेकाम्"—इति ज ।

दस्मिन्नेवावसरे * एत मग्निं गार्हपत्यादव चित्याग्नाव ह-रन्ति अनेन गार्हपत्यादनुष्टुभ आहरण मुक्तं। अथ पश्चादेषो-ऽन्नाय समर्थो भवति। "अलमाहुतिभ्यो" इति। तदेवार्थं दर्शितं आहुतिरूपायान्नाय समर्थो भवति अग्नि प्रणयनानन्तर मेवचित्याग्नेः आहुति सम्बन्धादिति भावः ॥ ४८ ॥

"अथो आहुरित्यादिकस्याय मर्थः,— किञ्चगार्हपत्यादनुष्टुभ आहरणेन चित्याग्नि रूपः प्रजापति रेव प्रीणाति ततोऽग्नि रूप मेतं 'श्रियं पुत्र मुरसि धत्ते" धारितवान् भवतीति ब्रह्मव दिन आहुः। अतोऽपि तस्मादनुष्टुभ माहरन्तीत्यर्थः। उक्तार्थं वेदनं प्रशंसति— "अथो हैतदिति। लोके यः कश्चिज्जनः एतदर्थरूपं एव मुक्तप्रकारेण जानाति स जनश्चैव मेव उरसि प्रियं पुत्रं आधत्ते खलु हेति निपातः प्रसिध्यर्थद्योतकः। व्यवहिता-श्चेत्यनुशासनात् पदान्तर व्यवहितोप्याङित्युपसर्गोधत्त इत्यनेन सम्बध्यते ॥ ५० ॥

अथ प्रकारान्तरेणापि गार्हपत्यादग्नेः आहरणं प्रशंसति — "यद्वेवैत मिति। अय मेवेति। योऽय मग्निः अधुनाऽस्माभि-श्चीयते अय मेव चित्याग्निः सप्तानां पुरुषाणां समष्टिरूपः एक पुरुषः अथैषां पुरुषाणां यां 'श्रियं' परमं रूपं उर्वां 'समुदौहन्' समुदाक्षिपन् एषा सरूपा श्रीः सोऽग्निः पुरुष इति पुंलिङ्गं विधे आग्रापेक्षं य मेत मग्निं इदानीं चित्याग्ना

* "तस्मात्यस्मिन्नवसरे"—इति क।

वाहरति इदानीं वाक्रियमाणो ऽग्निं सप्तपुरुषाणां समुच्छ्रित श्रीरूप इत्यर्थः । तस्मात् कारणात् एत मग्नि मत्राहरन्तीति यत तेन एतेषां समानां पुरुषाणां श्रीरूपयोरसोऽस्तित मूर्द्ध मुच्छ्रिपन्ति किञ्च तस्याः श्रियः शिरोरूपत्वं तत्रैव षष्ठकाण्डेऽभिहितम् । तस्मात् तदेतच्छ्रीरूपोऽग्निरस्य प्रजापतिः शिरश्चितोऽय मग्निः पुनरात्मन शरीरं (!) अत एते गार्हपत्यादग्नेः आहरणेन संस्कारेण प्रजापतिशरीरे स्वकीयं शिर एव सन्दधतीत्यर्थः ॥ ५१ ॥ १ [२, ३] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ २ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम् ,
सप्ताब्धीन् पञ्चसीरीं स्त्रिदशतरुलताधेनुसौवर्णभूमीः ।
रत्नोस्रां रुक्मवाजिद्विपसहितरथौ सायणिः सिङ्गणार्यो ,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः ,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः ।

भाष्योत्थं प्राज्यजन्मा लवणज मनृषः सार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरि मकृत मुदा पापसाक्षिप्तसार्यः * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

* अभ्यत्राष्टोऽध्यः पञ्चमकाण्डीयद्वितीयाध्यायान्ते द्रष्टव्याः ।

अथ तृतीयाध्याये प्रथमं ब्राह्मणम्।

अथातो वैश्वानरं जुहोति। अत्रैष सर्वो ऽग्निः संस्कृतः स एषो ऽत्र वैश्वानरो देवता तस्मा एतद्धविर्जुहोति तदेनꣳ हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानरः * ॥ १ ॥

यद्वेवैतं वैश्वानरं जुहोति। वैश्वानरं वा ऽएत मग्निं जनयिष्यन् भवति त मदः पुरस्ताद्दीक्षणीयायाꣳ रेतो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्यते तादृग् जायते तद्यत्तत्र वैश्वानरꣳ रेतो भूतꣳ सिञ्चति तस्मादय मिह वैश्वानरो जायत ऽउपाꣳशु तत्र भवति रेतो वै तत्र यत्र ऽउपाꣳशु वै रेतः सिच्यते निरुक्त ऽइह निरुक्तꣳ हि रेतो जातं भवति ॥ २ ॥

---

* 'वैश्वानरः'—इति ग, घ।

स यः स व्वैश्वानरः। इमे स लोका इय मेव पृथिवी व्विश्व मग्निर्न्नरो ऽन्तरिक्ष मेव व्विश्वं व्वायुर्न्नरो द्यौरेव व्विश्व मादित्यो नरः ॥ ३ ॥

ते ये त ऽइमे लोकाः। इदं तच्छिर ऽइद मेव पृथिव्योषधयः श्मश्रूणि तदेतद्विश्वं व्वागेवाग्निः स नरः सोपरिष्टादस्य भवत्युपरिष्टाद्ध्यग्नि ऽग्निः* ॥ ॥ ४ ॥

इद मेवान्तरिक्षम्। तस्मादेतदलोमकमलोमक मिव ह्यन्तरिक्ष मदेतद्विश्व म्प्राण एव व्वायुः स नरः स मध्येनास्य भवति मध्येन ह्यन्तरिक्षस्य व्वायुः † ॥ ५ ॥

शिर ऽएव द्यौः ‡। नक्षत्राणि केशास्तदेतद्विश्वं चक्षुरेवादित्यः स नरस्तदवस्ताच्छीर्ष्णो भवत्यवस्ताद्धि दिव ऽआदित्यस्तदस्यैतच्छिरो व्वैश्वानर ऽआत्माय

* 'अग्निः'—इति घ, ङ।

† 'वायु'—इति ग, घ।

‡ 'द्यौ' - इति ग, घ।

मग्निश्चित ऽआत्मान मेवास्यैतत् संस्कृत्य शिर: प्रति-
दधाति * ॥ ६ ॥

अथ मारुतान् जुहोति। प्राणा वै मारुता:
प्राणानेवास्मिन्नेतद्दधाति वैश्वानरꣳ हुत्वा शिरो
वै वैश्वानर: शीर्षंस्तत् प्राणान् दधाति † ॥ ७ ॥

एक ऽएष भवति ‡। एक मिव हि शिर: सप्त-
तरे सप्तकपाला यद् वा ऽअपि बहु कृत्व: सप्त-
सप्त सप्तैव तच्छीर्षण्येव तत् सप्त प्राणान् दधाति ॥
॥ ८ ॥

निरुक्त ऽएष भवति। निरुक्त मिव हि शिरो
ऽनिरुक्ता इतरे ऽनिरुक्ता ऽइव हि प्राणास्तिष्ठन्नेतं
जुहोति तिष्ठतीव हि शिर ऽआसीन ऽइतरानासत-
इव हि प्राणा: § ॥ ९ ॥

* 'ऽतिदधाति'—इति ख।

† 'दधाति'—इति ख।

‡ 'एक ऽएव भवति'—इति ख।

§ 'प्राणा:'—इति ग, घ।

तद्यौ प्रथमौ मारुतौ जुहोति । इमौ तौ प्राणौ तौ मध्ये वैश्वानरस्य जुहोति मध्ये हीमौ शीर्ष्णः प्राणौ * ॥ १० ॥

अथ यौ द्वितीयौ । इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतर मिव हीमौ प्राणौ † ॥ ॥ ११ ॥

अथ यौ तृतीयौ । इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतर मिव हीमौ प्राणौ वागे- वारण्येऽनूच्यः सो ऽरण्ये ऽनूच्यो भवति बहु हि वाचा घोरं निगच्छति ‡ ॥ १२ ॥

यद्वेव वैश्वानर मारुतान् जुहोति । क्षत्रं वै वैश्वानरो विशोमारुताः क्षत्रं च तद्विशञ्च करो- ति वैश्वानरं पूर्व्वं जुहोति क्षत्रं तत् कृत्वा विशं करोति § ॥ १३ ॥

एक ऽएव भवति । एकस्थं तत् क्षत्र मेक-

*, † 'प्राणौ'—इति ग, घ । ‡ "नियच्छति" Sáyaṇa—इति घ ।

§ 'करोमि'—इति ख ।

स्याᳮ श्रियं करोति बहुव इतरे विशि तद्-
भूमानं दधाति ॥ १४ ॥

निरुक्त ऽएष भवति। निरुक्त मिव हि क्षत्र मनिरुक्ता इतरे ऽनिरुक्तेव हि विट् तिष्ठन्नेतं जुहोति तिष्ठतीव हि क्षत्र मासीन ऽइतरानास्त ऽइव हि विट् * ॥ १५ ॥

तं वा ऽएतम्। पुरोऽनुवाक्यवन्तं याज्यवन्तं व्वषट्कृते स्रुचा जुहोति हस्तेनैवेतरानासीनः स्वाहा-कारेण क्षत्रायैव तद्विशं कृतानुकरा † मनुवर्त्मानं करोति ॥ १६ ॥

तदाहुः। कथ मस्यैते पुरो ऽनुवाक्यवन्तो याज्यवन्तो व्वषट्कृते स्रुचा हुता भवन्तीत्येतेषां वै सप्तपदानां मारुतानां यानि त्रीणि प्रथमानि पदानि सा त्रिपदा गायत्री पुरो ऽनुवाक्याथ यानि चत्वार्युत्तमानि सा चतुष्पदा त्रिष्टुब्याज्येद मेव ‡

* 'विट्'—इति ग। † 'कृतानुवाका'—इति क।

‡ "इयमेव कपुष्णा०"—Sáyaṇa—इति च।

कपुच्छलमयं * दण्डः स्वाहाकारो व्वषट्कार एव मु हास्यैते पुरोऽनुवाक्यवन्तो याज्यवन्तो व्वषट्कृते स्रुचा हुता भवन्ति ॥ १७ ॥

तद्यं प्रथमं दक्षिणतो मारुतं जुहोति । याः सप्त प्राच्यः स्रवन्ति ताः स स सप्तकपालो भवति सप्त हि ता याः प्राच्यः स्रवन्ति ॥ १८ ॥

अथ यं प्रथम मुत्तरतो जुहोति । ऋतवः स स सप्तकपालो भवति सप्त ह्यृतवः † ॥ १९ ॥

अथ यं द्वितीयं दक्षिणतो जुहोति । पशवः स स सप्तकपालो भवति सप्त हि ग्राम्याः पशवस्त मनन्तर्हितं पूर्व्वस्माज्जुहोत्यप्सु तत् पशून् प्रतिष्ठापयति ‡ ॥ २० ॥

अथ यं द्वितीय मुत्तरतो जुहोति । सप्त ऽऋषयः स स सप्तकपालो भवति सप्त हि सप्त ऽर्षय-

* "कपुत्मलमयं"—इति क, च ।

† 'ऋतवः'—इति क, 'ऋतवः'—इति ख, ग ; ऋतवः'—इति ङ

‡ 'प्रतिष्ठापयति'—इति ख ।

स्त मनन्तर्हितं पूर्व्वस्माज्जुहोत्यृतुषु तदृषीन् प्रति-
ष्ठापयति * ॥ २१ ॥

अथ यं तृतीयं दक्षिणतो जुहोति। प्राणाः
स स सप्तकपालो भवति सप्त हि शीर्षन् प्राणास्त
मनन्तर्हितं पूर्व्वस्माज्जुहोत्यनन्तर्हितांस्तच्छीर्ष्णः प्राणान्
दधाति ॥ २२ ॥

अथ यं तृतीय मुत्तरतो जुहोति। छन्दांऽसि
स स सप्तकपालो भवति सप्त हि चतुरुत्तराणि
छन्दांऽसि त मनन्तर्हितं पूर्व्वस्माज्जुहोत्यनन्तर्हितानि
तदृषिभ्यश्छन्दांऽसि दधाति ॥ २३ ॥

अथ याः सप्त प्रतीच्यः स्रवन्ति। सो ऽरण्ये
ऽनच्यः स सप्तकपालो भवति सप्त हि ता याः
प्रतीच्यः स्रवन्ति सोऽस्यैषोऽवाङ् प्राण ऽएतस्य प्रजा-
पतेः सो ऽरण्ये ऽनच्यो भवति तिर इव तद्यदरण्यं
तिर इव तद्यदवाङ् प्राणस्तस्माद्य ऽएतासा नदीनां

* 'प्रतिष्ठापयति'- इति ख।

पिबन्ति रिप्रतरा: ग्रपनतरा* ऽग्राहनस्यवादितरा भवन्ति तद्यद्देतदाहेदं मारुता इति तदस्मा ऽअन्नं कृत्वापिदधाति तेनैनं प्रीणाति ॥ २४ ॥

स यः स वैश्वानरः†। असौ स ऽग्रादित्योऽथ ये ते मारुता रश्मयस्ते ते सप्त सप्तकपाला भवन्ति सप्त-सप्त हि मारुता गणा: ‡ ॥ २५ ॥

स जुहोति । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्चेति नामान्येषा मेतानि मण्डल मेवैतत् संस्कृत्याथास्मिन्नेतान् रश्मीन्ना मग्राहं प्रतिदधाति ॥ २६ ॥ ३ ॥

॥ इति द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् [३. १.] ॥

* "ग्रपनतरा" Sáyaṇa (?)—इति घ ।

† 'वैश्वानरो । ऽसौ'—इति ग, 'वैश्वानर:'—इति घ ।

‡ 'गणाः'—इति क, 'गणा:'—इति ग ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे , त महं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

पूर्वस्मिन्नध्याये स्वयमातृण्णाया व्याघारणसमुच्चयणादि कर्माभिहितम् । अथास्मिन्नध्याये वैश्वानर मारुतवसोर्धारादिहोमलक्षणं कर्माभिधास्यते । (तत्रादौ वैश्वानरहोमं विधत्ते— "अथात इति । 'अथ'-शब्देनाग्नि प्रणयनानन्तर्यं द्योतते, अत इति । अत्रैष सर्वोऽग्निरित्याद्युत्तरकाल प्रतिपाद्य मर्थं हेतुतया परामृशति । 'वैश्वानर'-शब्दस्तद्देवत्यं हविराचष्टे यतोऽस्मिन्नवसरे अग्निर्वैश्वानरो देवता भवति । अतस्तत् प्रीणनार्थं तद्देवत्यं हविर्जुहुयादित्यर्थः । न केवल मनेनास्मैभागसम्पादनं क्रियते , अपि तु देवतात्वं सम्पादन मपीत्याह ,— "तदेन मिति । तदेव मुपपादयति ,— " यस्मै वा इति । वैश्वानरं जुहोति सामान्येनाभिधानादिक मपि तच्छब्देनोपायेत्त्यदीत (!) माह)*— "द्वादश कपाल इति । द्वादशसु कपालेषु संस्कृतः पुरोडाशो † द्वादशकपालः द्वादशमासाः सम्भूय संवत्सरो भवति । वैश्वानरोऽग्निश्च संवत्सरात्मकं तत स्तदर्थं हविर्द्वादशकपालसंस्कृतः पुरोडाशो भवतीत्यर्थः ॥ १ ॥

* बन्धनीचिह्नान्तः पाठो नास्ति ज-पुस्तकादन्यत्र ।

† "पुरोऽनुवाक्याः ॥"— इति भ, ज ।

अथ पुनस्त मेव वैश्वानरहोमं प्रशंसति— "यद्वेवैत मिति। अदःशब्दो दीक्षणीयेष्टिकालं परामृशति। 'पुरस्ताद्' इति पूर्वकाल मात्र माचष्टे" पूर्व ममुष्मिन् काले दीक्षणीयेष्ट्यामस्तं वैश्वानरं रेतोभूतं सिञ्चतीति यत् अतएव मग्निः वैश्वानररूपं जनयिष्यन् भवति दीक्षणीयायां कृतो वैश्वानरार्थो होमः एतस्याग्ने वैश्वानररूपेणोत्पादनार्थं रेतः सेचनवान् भवतीत्यर्थः। लोके हि योनौ यत् प्रकार विशिष्टं रेतः सिच्यते उत्पत्तिकाले तत् प्रकार वैशिष्ट्ये नैव तज्जायते। न पुनः प्रकारान्तरवैशिष्ट्येन दीक्षणीयायां वैश्वानरं रेतोरूपेण सिक्तवानिति यत् तस्मादय मग्निरिहापि तदनुरोधेन वैश्वानर एव जायते अतश्च वैश्वानररूपेणोत्पादनाय वैश्वानरदेवत्यं हविर्जुहुयादिति * भावः। "उपांशु तत्र भवतीत्यादिकस्याय मर्थः,— यज्ञशब्देन यष्टव्यत्वात् वैश्वानर उच्यते। तत्र दीक्षणीयायां यज्ञो रेतो रूपो भवति। खलु रेतश्च उपांशुरहस्यैव सिच्यते न प्रकाशं, अतस्तत्र प्रधान उपांशु भवति। इह तु प्रधानं निरुक्तं उच्चैरेवेष्टं भवति। जननावस्थायां रेतसः प्रकाश मेव जायमानत्वादत्रत्यस्य वैश्वानरस्य तथा विधत्वादिति ॥ २ ॥

अथास्य वैश्वनरात्मकता माह—"स य इत्यादिना। अपूर्वोक्तो यो वैश्वानराग्निसहैवे मे पृथिव्यादयो लोकाः कुतः, इय मेव

* "हविर्जुहुयादिति"—इति ज

'पृथिवी विश्वं' तदधिष्ठाता 'अग्नि' रेव 'नर'। तथा अन्तरिक्ष मेव विश्वं तदधिष्ठाता 'वायुर्नरः' ; एवं 'द्यौरेव विश्वं' तदधिष्ठाता 'आदित्यो नरः'। पृथिव्यादीनां लोकाना मेकपदार्थाधारत्वेन विश्वं अग्न्यादीनां तु तदधिष्ठातृपुरुषत्वम्। एवञ्च वैश्वानर इत्यत्र तदितरस्य स्वार्थिकत्वात् साधिष्ठातृका इमे लोका एव स वैश्वानर इत्यर्थः ॥ ३ ॥

अथ शिरसो वैश्वानरस्य लोकात्मकता माह,— "तं य इति। इद मिति मुखं श्मश्रुविशिष्टं हस्तेन प्रदर्शने *। इद मेव स्थानं पृथिवी शिरसि अभागत्वात् अत्रत्यानि श्मश्रूण्येवौषधयः तदेतद्विश्व मिति शिरसि दर्शितायाः पृथिव्या वैश्वानरात्मकत्व मुक्तं, 'वाक्' इति तत् स्थान मुच्यते। अतश्च। वाक् चिबुकयोरौत्तराधर्येणोक्तं वैश्वानरत्व मुपपादयति सोपरिष्टादिति ॥ ४ ॥

इद मि ति मुखादुपरितनं हनुनयनासिकाललाटस्थानं निर्दिश्यते अलोमकमिव ह्यन्तरिक्ष मिति। तत्र पृथिवीवत् महीधरो महीरुहादीनामभावादित्यर्थः। "स मध्येनास्येति। 'वायुरन्तरिक्षस्य' 'मध्येन' मध्यप्रदेशेन वर्त्तत इति। स प्राणोऽस्य निर्दिष्टप्रदेशस्य मध्येन वर्त्तते ॥ ५ ॥

"शिर एवेति। अत्र 'शिरः' शब्देन ललाटादुपरितनं केशोद्गमस्थान मुच्यते, इदं तच्छिर इत्यत्र गलादुपरितनं सर्वं

* 'प्रदर्शते'—इति ज, झ; 'प्रदर्श्यते'—इति छ, ञ

अपि शिरसा प्रसिद्धेन * निरूपितम्। अन्यथा पूर्वोक्तस्यानुपपत्तेः। "तस्यैतदिति। यत एवं तस्माद्वैश्वानरोऽस्य प्रजापते रेतदुक्तप्रकारं शिरः स्थितोऽग्निस्तु शरीरं, अत एतेन होमेनास्यात्मनि संस्कृता तत्र शिरः सम्भृतमित्यर्थः॥ ६॥

वैश्वानरयागानन्तरं मारुतानां होमं विधाय तान् प्राणात्मना प्रशंसति,— "अथेति। तद्धोमस्य वैश्वानरः सम्भृतीत्यर्थः॥ ७॥

वैश्वानरयागानन्तरं मारुतानां होमं विधाय तान् प्राणात्मकत्वात्) † तेषां तदनुविधायिनीं सङ्ख्या माह— "एक एव इति। 'इतरे' मारुताः पुरोडाशः सप्तसु कपालेषु संस्कृताः सप्त भवेयुः बहुत्वोऽपि सप्तसप्तेति यदस्ति एतत् सप्तैव। यद्यपि सप्तानां कपालसप्तकानां मिलिता सङ्ख्या एकोनपञ्चाशद् भवति मारुतां तावत् सङ्ख्याकत्वात् तथापि सप्तधा भागेन ते सप्तैव भवन्ति। अतएते शिरस्येव सप्तप्राणाश्चिदध्याति॥ ८॥

अथ तदेव ‡ प्राणत्व मुपजीव्य तेषा मुपांशुयागादिक माह— "निरुक्त एव भवति। 'एष' वैश्वानरः 'निरुक्तः' व्यक्तः उच्चै र्यागो भवति शिरसो व्यक्तत्वात् 'इतरे' मारुता 'अनिरुक्ता' अव्यक्ता उपांशुयागा भवेयुः। प्राणानामतीन्द्रियत्वेना-

* "हृषीहन"—इति ह, भ, च।

† चन्द्रनीचिह्नान्तः प्रदर्शितः पाठो नास्ति भ-क-पुस्तकयोरन्यत्र।

‡ 'यदेव'—इति च।

व्यक्तत्वादित्यर्थः । "निष्टमीव होति । शिरः उच्छ्रितत्वान्निष्टमीव भवति । इन्द्रियाणि तु आनयन्त्यनामसीनामतेव (?)* भवन्ति ॥ ८ ॥

अत इन्द्रयो मारुतानां होमे मनुष्य तेषां तत्र इन्द्रीभूत प्राणात्मकता प्रदर्शनेन होमे स्थानप्रकार माह— "तयौ प्रथमावित्यादिना । अथ प्रथम सन्निधानेन द्वितीये उपचारात् प्रथमयोग एव मुत्तरत्र द्वितीयं तृतीयादिष्वपि "इमौ ता विति । तौ प्रथमौ इमौ प्राणौ इमौ प्राणयो इस्तेन निर्देशः । तौ वैश्वानरस्य पुरोडाशस्य मध्ये जुहोति । अनयोः श्रोत्रयोः शिरोमध्येऽवस्थानात् । अतएव कात्यायनेन सूचितम् ,— "वैश्वानरे वा वैश्वानरं पृक्तं" कल्पति ; अस्मि या वैश्वानरेऽति † विकल्पः । तत्र मन्त्रो होमः शाखान्तरानुसारेण विकल्पितः । वैश्वानरे यदा होमः तदा वैश्वानरस्य पृथक् करणम् ॥ १० ॥

'अथ यौ द्वितीया विमौ ता विति । इम विति चक्षुषो निर्देशः तौ सम्मन्तिकतरं सन्निहिततरं जुहुयात् , चक्षुषोः परस्परसन्निधानेनावस्थानात् , होमस्तु वैश्वानरस्य पश्चाद् भागे कर्तव्यः । पञ्चषष्ठयोः होमः तृतीयचतुर्थयोः पश्चात् सप्तमस्य तु होमः सर्वेषां पश्चात् क्रियते ; अतएव कात्यायनः ,— "वैश्वानर

* "आनयन्वैनामीनामौनानी" - इति ञ. "आमनाष्टननाम्नामानीन्नीवा"—इति ञ . "आमनापूननाम्नानामीन्नीवा"—इति ञ ।

† वैश्वानरे वा वैश्वानरं पृथुंकृत्वा 'शुक्रज्योति' रिति (वा० सं १७ ८०—८५) प्रतिमन्त्रम् मारुतान् जुहोति • विकल्पश्चायम् वैश्वानरे होमोऽस्मीवीति" - इति का० श्रौ० सू० १८. ४. २१, २४ ।

मधिश्रित्य दक्षिणोत्तरौ मारुतौ ० पश्चाच्च सप्तकपालौ ० एव मपरौ ० पश्चादरण्येऽनूच्यम् । इ मासादनयोश्च" इति* वैश्वानर-मारुताना मेकतन्त्रत्वात् "वैश्वानर मधिश्रित्य दक्षिणोत्तरौ मारुतौ" इत्युक्तम् । तत् प्रयोगप्रकारस्तु सूत्रतोऽवगन्तव्यः ॥ ११ ॥

"अथ यो तृतीया विमौ नावित्यत्रेमावित्ति मासादितयो निर्देशः । इत्थं षष्ठां मारुतानां न तत् प्रमाणात्मकता मभि-धारण्येऽनूच्यं वागात्मना प्रशंसति ,— "वागेवेति । 'अरण्ये-ऽनूच्यः' कश्चिदनुवाकः तेन श्रूयमाणोऽपि पुरोडाशो 'ऽरण्ये-नूच्यो' भवतीत्यादि वाक्यस्य वागात्मकता मेवोपपादयति †। यतः कारणाद् 'वाचा बहु घोरं निगच्छति' यतो प्रकाश्यत्वेन सोऽनुवाकोरण्येनुवक्तव्ये भवति । तस्मादरण्येऽनूच्यवचनात् तस्य वागात्मकत्व मुपपन्न मिति भावः ॥ १२ ॥

पूर्वं वैश्वानरं शिरोरूपेण मारुतान् स्तुत तत् प्राणस्तनवान् , इदानीन्तु त मेव वैश्वानर मारुतान् चतं प्रजात्मना स्तौति — "यद्वेवेति । वैश्वानरस्य प्रजात्मकत्वेन सर्वतः प्राधान्यात् चत्र-त्वम् । मरुतां प्रजात्वम् तैत्तिरीयके श्रूयते— "मरुतो देवानां विश"-इति ‡ ॥ १३ ॥

अथ तेषा मुक्त मेव चतं प्रजात्मकत्व मुपजीव्य तत् सङ्ख्यादिकं प्रशंसति — "एक एव भवतीति । वैश्वानरस्यैकत्वेन

---

* का० श्री० सू० १८. ४. १७–२१ ।

† अरण्येऽनूच्यो भवतीत्यादिना तस्य वागात्मना प्रशंसति —इति भ० म ।

‡ तै० सं० २. २. ५. ७

तत्र जातिबन्धनं प्राधान्य 'मेवास्य' मेव करोति। अतएव 'श्रिय मेव करोति' ; अतएव 'श्रिय' मपि एतस्यां करोति, बहु अवप्राधान्ये परस्पर मेक मस्मात् राष्ट्रविषय प्रसङ्गात् सावतानां बहुत्वेन प्रजाया मेव 'भूमानं' बहुत्वेन प्रजाया मेव 'भूमानं' बहुत्वं निदधाति। प्रजावती जातकान् भवति। "भूमान मिति। "बहोर्लोपो भू च बहोः"-इति बहु शब्दा-दिष्ठितस्ये मनि च इकारस्य लोपः। प्रकृतेश्च भू इत्यय मादेशः॥ १४॥

'निवस्म मिव हि अन्नम्'-इति आहावया सर्वां प्रजा-न्नाम्योर्बेष्वन्नाव्यमानत्वेन अन्नस्य निवस्मत्वम्। प्रजायास्तु तदा-न्नाधीन यावोर्वृद्धतेर्निवस्मत्वम्। अतएव 'सर्वं तिष्ठत्येव भवति॥ प्रजात्वासीनेव भवति॥ १५॥

वैश्वानरं जुहोति मारुतां जुहोतीति * होम मात्र विधा-नन्तरं विशेषं विधाय प्रशंसति— "तं वा ऽएत मिति। "पुरोऽनुवाक्यवन्तं याज्यवन्तम् †"-इति आम्नातो ग्रन्थः। त मेतं वैश्वानरं कीदृशं पुरोऽनुवाक्यवन्तं याज्यावन्तं होत्रावषट्-कृतं जुह्वा जुहुयात्। इतरान्मारुतान् आसीनो हस्तेन स्वाहा-कारायैव जुहुयात्। एवञ्च वैश्वानरस्य पुरोऽनुवाक्यासम्ब-न्धिनि कथनेन यागत्वेन प्राधान्यादितरेभ्यस्तु तद् वैलक्षण्येनो-

---

* "वैश्वानरो यजतिः मारुता जुहोतयः। तत् कथं वैश्वानरं हि प्रशस्याह०"-इति का० श्रौ० सू० १८. ४. १७ क।

† का० श्रौ० सू० १८. ४. १७ ख।

सर्व्वंगत्वात् प्रजां वशाय कृतानुकारिणी मनुगतवर्त्मानञ्च करोति ॥ १६ ॥

अथ मारुतानां सप्तप्रकारेण होमेन वैश्वानरयागसम्पत्ति र्घटत इति । सा सम्पत्ति कथं भवतीति तत्र पूर्वकोत्तरोदर्शयति,— "सप्ताहु रिति । एतेषां वै सप्तपदाना मित्यत्र मारुत-शब्देन तद्धोमसाधनभूताः "शुक्रज्योतिश्चेत्यादयो मन्त्रा * विवक्ष्यन्ते ते च सप्तपदा भवन्ति । अतश्च तेषां मन्त्राणां यानि प्रथमानि त्रीणि पदानि सन्ति सा त्रिपदा गायत्री मेव पुरोऽनुवाक्या भवति । अथ यानि चत्वार्युपरितनानि पदानि सन्ति तानि चतुष्पदा त्रैष्टुप् मेव याज्या भवति । "इद मेवेति † प्रकृतिरभ्यधिकेन प्रदर्श्यते,— 'कपुच्छलम्' ‡ इति वशुपुच्छ § मुच्यते । अथ मिति वाङ्गु 'दक्षः' प्रदर्श्यते एवं चाहुरेव स्रुगित्युक्तं भवति । 'स्वाहाकार' एव 'वषट्कारो' भवति । इत्थ मुक्तेन प्रकारेणास्याग्नेर्यजमानस्य वा सर्व्वात्मन एव मारुता 'पुरोऽनुवाक्या याज्यावन्तो वषट् कृते स्रुचा हुता भवन्ति ॥ १७ ॥

अथ होमक्रमेण तान् मारुतान् प्रत्येकं नद्यादिरूपेण प्रशंसति— "तस्य प्रथम मिति । 'प्राच्यः' प्राङ्मुखाः पूर्वसमुद्रगामिन्यो गङ्गायमुनादयः सप्तनद्यः 'स्रवन्ति ताः सप्त

* वा॰ सं॰ १७. ८०—८५ ।

† 'इय मेवेति'—इति ख, ग, घ, 'इय मेव चिति !'—इति ङ ।

‡ "कपुच्छला मेव '"—इति ङ ।

§ "वषुच्छ"—इति ङ, च, ग, घ ।

प्रथमं दक्षिणतो दक्षिणभागे हुतो मारुतः पुरोडाशः सप्तसु कपालेषु संस्कृतो भवति। 'याः' यस्य: 'प्राचः' 'स्रवन्ति' तासां सप्तगान् ॥ १८ ॥

अनेन तस्य मारुतयोगस्य सप्तात्मकत्वं समर्थ्यते। उत्तरत्र सर्वत्राप्येव मेव अधिम साधेक्षया सप्त हि मरुत' इत्युक्तम्' ॥ १९ ॥

"न मनन्तर्हित मिति तं द्वितीयं पुरोडाशं पूर्वस्मात् मारुतादनं तर्हि न मव्यवहितं तत् सम्बन्धे जुहुयात्। एवं पूर्वस्मात्मकत्वादस्येव पशून्' प्रतिष्ठापयति ॥ २०, २१ ॥

"अनन्तर्हितांस्तस्मीर्षः प्राणान् दधातीति। पूर्वं मारुत-पुरोडाशस्य प्रथम मारुतेन सम्बन्धात्तस्य च वैश्वानरेण सम्बन्धात् प्राणान् शिरसोऽनन्तर्हिता नव्यवहितान् करोतीत्यर्थः ॥ २२ ॥

"सप्त हि चतुरुत्तराणीति। चतुरक्षराधिकानि 'छन्दांसि' भवन्ति, यद्यवान्तराः छन्दो बहवः सन्ति; तथापि चतुरक्षराधिकानि छन्दांसि सप्तैवेत्यर्थः। गायत्री चतुर्विंशत्यक्षरा, उष्णिक् पुनरष्टाविंशत्यक्षरा, अनुष्टुप् द्वात्रिंशत्यक्षरा, एवं बृहती-पङ्क्ति-त्रिष्टुप्-जगत्यश्चतुरक्षराधिका भवन्ति ॥ २३ ॥

"सोऽस्यैव इत्यादिकण्डाय मर्थः,—'स' एषो 'ऽस्यैनुषो' गणः 'अस्य अवाङ्' अधस्तनः 'प्राण' इन्द्रियं अस्येति पदस्यैवार्थं विवृणोति। 'ऽएतस्य प्रजापतेः'-इति तद्गुणादि भूयिष्ठत्वेन प्रकाशकत्वात् परस्य' 'तिर रोहितं भवति। 'अवाङ्प्राणो' व्याहितो

भवन्ति। अनेन नद्योनां 'अवाङ्प्राणत्वं' समर्थितम्। 'तस्मात्' नदात्मिकाना मेतासां 'नदीनां' कर्मणी षष्ठी नदी ये पिबन्ति। अथवा पय इत्यध्याहार्यं तासां पयो ये 'पिबन्ति' 'ते' 'रिप्रतरा:' प्र मिति पाप मुच्यते। पापिष्ठा: 'गपन' मिति। व्यत्ययेन पकारस्य फकार: * भुव:। अस्यार्थं मुपान्वेषणीया:। 'आहन' मिति नीचोक्ति मुच्यते †। तस्या अयर्थं 'वादितारो भवन्ति' इति मूल रूपत्वात्तासां नदीनां पय: पिबन्तो 'इतरा' ‡ नीचा भवन्तीत्यर्थ:। अथ 'मारुता' इति अभिधानेन तृचदैवतामन्त्रप्रतीते: 'अत्रं' मन्याख्य 'अस्मै' प्रजापतये प्रतिपादयेति। तेन' च 'एनं' 'प्रीणाति' इत्याह,— ' तद्यदेतदिति'॥ २४॥

अथ वैश्वानरं आदित्यरूपेण मारुतान्मिरूपेण प्रशंसति,— "स य: स वैश्वानर इति। 'तं' च मारुता मरुद्गण सङ्ख्यानुसारेण तत् पुरोडाशा: 'सप्त सप्तकपाला भवेयु' रित्याह। 'ते सप्त सप्तकपाला' इति सप्त सप्त हि' इति 'मारुता गणा' सप्त सप्तकानि भवन्ति। एकोनपञ्चाशत्सङ्ख्या मरुत: सप्तविधा विभागेन सप्त समुदाया भवन्ति। अतस्तत्सङ्ख्यानुसारेण तत् पुरोडाशा: 'सप्त सप्तकपाला' भवेयु:) §। ननु च पूर्व मेव सन्तेते सप्तकपाला इति अत्र ते साय मेवार्थोऽभिहित:, कि मिति स

* "पकारस्य पकाभुव: (!)"- इति ह, ज, भ, म।

† "आनीतिमुच्यते (!)"- इति ह।

‡ 'नितरा (!)'—इति ह ज भ, म।

§ बन्धनचिह्नान्त: प्रदर्शित: पाठो नास्ति भ ज पुस्तकयोरत्र

एवायोच्यत इति नैतदस्ति पूर्वं यद्वा अपि बहु हस्त इत्या-
दिना समधा विभागेन तं सर्वं सम्येव भवन्तीति। शिरसि सम
प्राणाविदधातीत्युक्तम्। ननु समकपालानां समत्वे कारण
मुक्तम्। अथ पुनस्तत्र कारणं मुक्तम्। अत्र पुन स्तत्र कारण
मुच्यते इति ॥ २५ ॥

अथ मारुतानां होमे मन्त्रान् दर्शयति,—“स जुहोति।
“शुक्रज्योति * रिति सत्यज्योतिश्च ज्योतिश्चावेत्यादिकै मंन्त्रै
रित्यर्थः। “नामान्येषा मिति। एतानि ‘शुक्रज्योति’ रित्या-
दीनि येषां रश्मीनां नामानि वैश्वानरस्यादित्यात्मकत्वं मारु-
तानां रश्म्यात्मकत्वं प्रागुक्तम्। अतश्चैव ते नामाभिर्होमे
आदित्य मेव संस्कृत्वाग्नौ जिन् मण्डले’ एतानुक्तनाम्नो रश्मीना-
वस्थापयति ॥ २६ ॥ १ [१, १]

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे तृतीयाध्याये प्रथमं ब्राह्मणम् ॥

---

* वा० सं० १७ ८०—८५।

॥ अथ तृतीयं ब्राह्मणम् ॥

अथातो वसोर्द्धारां जुहोति। अत्रैष सर्व्वोऽग्निः संस्कृतः स एषोऽत्र वसुस्तस्मै देवा एतां धारां प्रागृह्णंस्तयैनमप्रीणंस्तद्यदेतस्मै वसव ऽएतां धारां प्रागृह्णंस्तस्मादेनां वसोर्द्धारेत्याचक्षते तथै-वास्मा ऽअयमेतां धारां प्रगृह्णाति तयैनं प्रीणाति ॥ ॥ १ ॥

यद्वेवैतां वसोर्द्धारां जुहोति। अभिषेक एवा-स्यैष ऽएतं ह्वा ऽएनं देवाः सर्व्वं कृत्स्नꣳ संस्कृत्या-थैनमेतैः कामैरभ्यषिञ्चन्नेतया वसोर्द्धारया तथै-वैनमयमेतत् सर्व्वं कृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभिषिञ्चत्येतया वसोर्द्धारयाज्येन पञ्चगृहीते-नौदुम्बर्य्या स्रुचा तस्योक्तो बन्धुः ॥ २ ॥

वैश्वानरꣳ हुत्वा। शिरो वै वैश्वानरः शीर्ष्णो वा ऽअन्नमद्यतेऽथो शीर्षतो वा ऽअभि-षिच्यमानोऽभिषिच्यते मारुतान् हुत्वा प्राणा वै

मारुताः प्राणेषु वा ऽअन्नं मद्यते ऽथो प्राणेषु वा ऽअभिषिच्यमानो ऽभिषिच्यते * ॥ ३ ॥

तद्वा ऽअरण्ये ऽनूच्यं । स्वाहा वा ऽअरण्ये ऽनूच्यो स्वाहो वा ऽअन्नं मद्यते ऽथो स्वाहा वा ऽअभिषिच्यमानो ऽभिषिच्यते तदेतत् सर्वं स्वसु सर्वे ह्येते कामाः सैषा वसुमयी धारा यथा क्षीरस्य वा सर्पिषो वैव मारभ्यायैवेय माज्याहुतिर्हूयते तद्यदेषा वसुमयी धारा तस्मादेनां वसोर्धारेत्याचक्षते ॥ ४ ॥

स ऽआह । इष्टं च म ऽइष्टं च म ऽइत्यनेन चान्ना प्रीणात्यनेन चानेन च त्वाभिषिञ्चाम्यनेन चेत्यतद्यथा ऽइदं च मे देहीदं च म ऽइति सा यद्वैषा धाराग्निं प्राप्नोत्यथैतद्यजुः प्रतिपद्येत+ ॥ ॥ ५ ॥

एतद्वा ऽएनं देवाः । एतेनान्नेन प्रीत्वैतैः

---

* 'अभिषिच्यते'- इति क ।

† 'प्रतिपद्यत' -इति क ।

कामैरभिषिञ्चैतया वसोर्धारयाथैन मेतान् कामानयाचन्त तेभ्य इष्टः प्रीतोऽभिषिक्त एतान् कामान् प्रायच्छत्तथैवैन मय मेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिञ्चैतया वसोर्धारयाथैन मेतान् कामान्याचते तस्मा इष्टः प्रीतोऽभिषिक्त एतान् कामान् प्रयच्छति द्वौ द्वौ कामौ संयुनक्त्यव्यवच्छेदाय यथा व्योकसौ संयुञ्ज्यादेवं यज्ञेन कल्पन्ता मिति* ॥ ६ ॥

एतद्ध देवा अब्रुवन् । केनेमान् कामान् प्रतिग्रहीष्याम इत्यात्मनैवेत्यब्रुवन्नात्मा वै देवाना मात्मा यज्ञ उ एव यजमानस्य स यदाह यज्ञेन कल्पन्ता मित्यात्मना मे कल्पन्ता मित्येवैतदाह ॥ ७ ॥

द्वादशसु कल्पयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदन्नेन प्रीणात्यथो तावतैवैन मेतदन्नेनाभिषिञ्चति चतुर्दशसु कल्पयत्यष्टासु कल्पयति दशसु कल्पयति त्रयोदशसु कल्पयति + ॥ ८ ॥

---

* 'मिति'—इति ख   + "कल्पयति"—इति ख ।

अथार्षेन्द्राणि जुहोति। सर्व्वं मेतद्यदार्षेन्द्राणि सर्व्वेणैवेन मेतत् प्रीणात्यथो सर्व्वेणैवेन मेतदभिषिञ्चति * ॥ ९ ॥

अथ यज्ञान् जुहोति। यज्ञो वै यज्ञा यज्ञेनैवेन मेतद्यज्ञेन प्रीणात्यथो यज्ञेनैवेन मेतद्यज्ञेनाभिषिञ्चति † ॥ १० ॥ ४ ॥

॥ इति द्वितीयप्रपाठके तृतीयं ब्राह्मणम् [३. २.] ॥

प्रकृतत्वादेदच्छब्देन परामृशति,— "धारां ग्रहन्। यथो-तया च तया एव मप्रीणन्। तत 'एतस्मै वसवे एतां धारां प्राग्रहन्' इति यत् 'तस्मादेनां वसोर्धारेत्याचक्षते' इत्या-म्नातम् इति शेषः। अतो यजमानोऽपि अनेन होमेन तथैव करोति ॥ १ ॥

अथ पुनस्ता मेव 'वसोर्धारां' संस्कृतस्याग्ने अभिषेकात्मना प्रशंसति— "यद्वेवैता मिति। 'सर्वं' मित्येतस्यैव विवरणं

* 'मेतदभिषिञ्चति'- इति ख।

† 'मेतदन्नेनाभिषिञ्चति'—इति ख।

'काम' मिति 'एतैः कामै' रिति "वाजश्च मे प्रसवश्च मे"* इत्यादि मन्त्रोक्ता वाजादयः काम्यमानत्वात् 'काम'-शब्देनोच्यन्ते। 'तै'श्च एतया 'वसोर्धारया' च 'अभ्यषिञ्चत्'। अतएवोपरिष्टात् मन्त्रान् व्याचक्ष † माणोऽमुमेवार्थं अनेन चाभिषिञ्चाम्यनेन चेत्येतदिति। अत इदानीन्तनोऽपि यजमान 'स्तथैव' कृतवान् भवति। विहिता 'वसोर्धारा आज्येन पञ्चगृहीतेन औदुम्बर्या स्रुचा' कर्त्तव्या। तस्याज्यादिकस्य सर्वस्यापि ब्राह्मणं प्रागुक्त मित्याह,— "आज्येनेति ॥ २ ॥

अथैतस्या वैश्वानरहोमानन्तर्यं प्रशंसति— "वैश्वानरं हुत्वेति। 'शीर्ष्ण' इति तृतीयार्थे पञ्चमी इत्युक्तम्। (अग्नादुपरितनस्य सम सर्वस्यापि शिरस्त्वात् मुखेनादत्तेऽपि शिरसैव 'अन्न मश्यते' किन्तु लोके 'अभिषिच्य मानः' पुरुषः शिरस आरभ्यैवाभिषिच्यते। अतोऽस्य वैश्वानरस्य शिरस्त्वादस्याभिषेकात्मिकाया वसोर्धाराया होमस्तदनन्तर मेव युज्यत इत्यर्थः।

मारुतहोमानन्तर्यमप्युक्त प्रकारेणैव प्रशंसति— "मारुतान् हुत्वेति। 'प्राणैर्वा अन्न मश्यत' इति। 'अन्न' मिति शब्दादीन्द्रियार्थात्मकं भोग्यवस्तूच्यते ॥ ३ ॥

वसोर्धारां जुहोतीति स्थाने विशेषानुपादानेन विधानादस्मी

* वा॰ सं॰ १८. १।

† 'व्याचष्टे मानो'—इति ज।

यत्र कुत्रापि होमस्यप्रसक्ताविति ,— "तदा इति । तत्र वसोर्धारा विषये होमो 'ऽपरस्ये ऽनूच्ये' पुरोडाशे कर्त्तव्य इत्यर्थः ।

अत्र कात्यायनः ,— "वसोर्धारां जुहोत्यौदुम्बर्या पञ्चगृहीतं सन्ततं यजमानोऽपरस्येऽनूच्येऽग्निनाम" * इति । अथ तदेव 'वसोर्धारा'-पदं प्रकारान्तरेण निर्वक्ति, — "तदेतत् सर्व मिति) † । यत एते 'सर्वे' वाजादय काम्यमानत्वात् 'कामाः' अतः काम्यमानस्यैव वसुत्वात् 'तदेतत् सर्वं' वाजादिकं 'वसु'-शब्देनोच्यते । तस्मात् तत् प्रतिपादकमन्त्रसाध्येषा 'धारा:' 'वसु' भवति , किञ्च 'ये' 'आज्याहुति हूयते' 'एषा' लोके 'यथा क्षीरस्य वा सर्पिषो वा' धारा क्रियते एव 'मारभ्या एव' मुपक्रम्य सम्पाद्यते । इदानीं क्रियमाणे य 'आज्याहुतिः' क्षीराज्यधारावत् सम्पाद्यते इति धाराकारता प्रदर्श्यते । तथा चोक्तप्रकारेण 'एषा वसुमयी धारा' भवति । यत एवं 'तस्मादेनां वसोर्धारेत्याचक्षते ॥ ४ ॥

(अथ प्रकृतहोमसाधनानां मन्त्राणां तात्पर्यार्थं दर्श-यति ,— "स आहेति । 'इदं च म ऽइदं च म ऽइति' "वाजश्च मे प्रसवश्च मे ‡" ऽइत्यादि) § मन्त्राणां निर्देशः । 'अनेन' अनेन चानेन

---

* का० श्रौ० सू० १८. ५. १ ।

† वन्धनीचिह्नान्तः प्रदर्शितः पाठो नास्ति ज-पुस्तकादन्यत्र ।

‡ 'वा० सं० १८. २ ।

§ वन्धनीचिह्नान्तः प्रदर्शितः पाठो नास्ति ज-पुस्तके ।

चैत्यत्र वाजादयो निर्दिश्यन्ते। हे अग्ने त्वां 'अनेन धानेन' चाभिषिञ्चामि किञ्च 'इदं च मे देहि' अथ सर्वो मन्त्रे विवक्षित इत्युक्तं भवति ॥ ५ ॥

अथ कथं मेषोऽर्थो मन्त्रे विवक्षित इत्यत आह— "एतद्वा इति। "एतद्वा वसोर्धारयेति। 'वसोर्धारा' नाम "वाजश्च मे" इत्यादि मन्त्रैः क्रियमाणा आज्यधारा। अतश्च वसोर्धारयन्त्येतदेव विविच्य दर्शितं,— "एतेनाचेन प्रीणैतैः कामैरभिषिञ्चति। अथ प्रीणनाभिषेकानन्तरं एत मग्नि मेतान् वाजादीन् कामानवाप्नुवन्नतः कृतयागोऽग्निः 'प्रीतो' भूत्वात् तेभ्य 'एतान् प्रायच्छत्'। अत स्तथैव यजमानोऽपि कुरुते। अत एतदनुसारेण मन्त्राणा मुक्त विध एवार्थो विवक्षित इति भावः। मन्त्रेषु प्रत्येकं पठ्यमाने र्थविच्छेदः स्यादिति। तदभावाय द्वौ द्वौ मन्त्रौ संयुञ्ज्यादित्याह— "द्वौ द्वाविति। अर्थेति 'श्चौकर्मौ' विभिन्नदेशस्थावाचार्यौ 'यथा संयुञ्ज्यात् एव' मेतदिति संयोजनं भवति। मन्त्रेषु तत्र तत्रावसानेषु 'यज्ञेन कल्पन्ता मिति' आम्नायते। तस्येदानी मुपयोग माह— "यज्ञेन कल्पन्ता मिति ॥ ६ ॥

"एतद्वा इति। पूर्वं देवाः 'केनेमान् कामान् प्रतिग्रहीष्याम' इति परस्पर मुक्त्वा पश्चाद् 'आत्मनैव प्रतिग्रहीष्याम' इति निश्चाय 'अब्रुवन्' देवाना मात्मा शरीर 'यज्ञः' खलु शरीरवत् सर्वं भोगसाधनत्वादतश्च यज्ञरूपेण देवाः 'कामान्' प्रत्य-

ष्टव्यमित्यर्थः। तद्वत् 'एवं यजमानस्य अपि यज्ञ एव शरीरम्। एवञ्च यज्ञेन कल्पन्ता मिति' वचने 'मे' 'आत्मनेवेति' कामः 'कल्पन्ता मित्यवै' तदुक्तं भवति ॥ ७ ॥

तद्वाक्यं द्वादश मन्त्रावमाने प्रयुञ्ज्यादित्याह,— "द्वादशस्तु कल्पयतीति। तत्र कल्पनं कस्मात्मोपीति भवतीत्याह— "द्वादश मासा इति। ननु सर्वत्र द्वादशस्वेव कल्पयेदिति। नेत्याह,— "चतुर्दशस्तु कल्पयतीति। 'वाजश्च मे प्रसवश्च' (ऽइत्यारभ्याष्टाभिरनुवाकैरेषा वसोर्धारा हूयते। तत्रैकस्मिन्ननुवाके "अग्निश्च म ऽइन्द्रश्च मे सोमश्च म ऽइन्द्रश्च मे सविता च म * ऽइत्यादि) † मन्त्राः समाम्नाताः। तत्र 'द्वौ द्वौ संयुनक्ति' इति वचनेन द्वयोर्द्वयो रवमानविधानात् मन्त्रद्वयस्य 'इन्द्रश्च म' ऽइत्येतदं भवति। अतस्ते मन्त्रा अर्धैन्द्रशब्देनोच्यन्ते ॥ ८ ॥

अतश्च "अर्धार्हैन्द्राणीत्यनेन तत् मन्त्रसाध्यं होमं स्तोतु मनुवदति,— 'अर्धैन्द्राणीति'-शब्दो मन्त्रवाक्यपरः। तद्विशिष्टेन द्रव्यस्य होमाद्युपचारेण 'अर्धैन्द्राणि' जुहोति' इत्युक्तम्। एव मुत्तरत्रापि। अर्धैन्द्र मन्त्रकरणकान् होमान् कुर्यादित्यर्थः। सर्वाधिपतित्वेन सर्वस्यैन्द्रसम्बन्धात् 'अर्धैन्द्राणि अपि सर्वस्त्वात् तत् करण होमे कृते 'सर्वेणे न्द्रेतम मनं' प्रोक्ताह्यभिषिच्यति नेत्याह,— "सर्वं मेत दिति ॥ ९ ॥

* वा० सं० १८. १६।

† चन्द्रचिह्नान्तः प्रदर्शितः पाठो नास्ति ज-पुस्तके

"यं पुरुषमे रश्मिय म* ऽइत्यादयो मन्त्रा यज्ञप्रतिपादकत्वात् 'यज्ञाः' ; तत् साध्य मपि होम मनुत्र प्रशंसति — "यज्ञो वै यज्ञा इति । यज्ञसाधनत्वात् यज्ञानां यज्ञत्वम् ॥ १० ॥ ४ [३, २] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
नवमकाण्डे तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥

॥ इति नवमकाण्डे द्वितीयः प्रपाठकः समाप्तः ॥

* वा० सं० १. १६ . *

अथ

तृतीयप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

तृतीयाध्याये तृतीयं ब्राह्मणम्।

॥ हरिः ॐ ॥

अथैतान् यज्ञक्रतून् जुहोति। अग्निश्च मे घर्मश्च मऽइत्यैतैरेवैन मेतद्यज्ञक्रतुभिः प्रीणात्यथो ऽएतैरेवैन मेतद्यज्ञक्रतुभिरभिषिञ्चति * ॥ १ ॥

अथायुज स्तोमान् जुहोति। एतद्वै देवाः सर्व्वान् कामानाप्त्वायुग्भि स्तोमैः स्वर्गंल्लोकमायं स्तथैवैतद्यजमानः सर्व्वान् कामानाप्त्वायुग्भि स्तोमैः स्वर्गंल्लोक मेति † ॥ २ ॥

* 'ऽरभिषिञ्चति' इति ख

† मेति —इति ख।

तद्वै त्रयस्त्रिꣳशादिति* । यन्तो वै त्रयस्त्रिꣳशो ऽयुजाꣳ स्तोमाना मन्यत ऽएव तद्देवाः स्वर्गं लोक मायंस्तथैवैतद्यजमानो ऽन्तत ऽएव स्वर्गंल्लोक मेति† ॥ ३ ॥

अथ युग्मतां जुहोति । एतद्वै छन्दाꣳस्यनुव-न्यातयामा वा ऽअयुज स्तोमा युग्मभिर्व्वयꣳ स्तोमैः स्वर्गंल्लोकमया मेति तानि युग्मभि स्तोमैः स्वर्गं लोक मायंस्तथैवैतद्यजमानो युग्मभि स्तोमैः स्वर्गं लोक मेति ॥ ४ ॥

तद्वा ऽअष्टाचत्वारिꣳशादिति‡ । अन्तो वा ऽअष्टाचत्वारिꣳशो§ युग्मताꣳ स्तोमाना मन्तत ऽएव तच्छन्दाꣳसि स्वर्गंल्लोक मायंस्तथैवैतद्यजमानो ऽन्तत एव स्वर्गंल्लोक मेति ॥ ५ ॥

* 'त्रयस्त्रिꣳशादिति'—इति ख, 'त्रयस्त्रिꣳशादिति'—इति ग, घ ।

† 'मेति'—इति ख ।

‡ 'ऽअष्टाचत्वारिꣳशादिति'—इति क, ख ।

§ 'ऽअष्टाचत्वारिꣳशो'—इति ग, घ ।

स ऽआह। एका च मे तिस्रश्च मे चतस्रश्च मे ऽष्टौ च म ऽस्त्विति यथा व्वृक्षꣳ रोहन्नुत्तरा मुत्तराꣳ शाखाꣳ समालम्भꣳ रोहेत्तादृक्तद्यदेव स्तोमान् जुहोत्यन्नं वै स्तोमा ऽअन्नेनैवैन मेतदभिषिञ्चति* ॥ ६ ॥

अथ व्वयाꣳसि जुहोति। पशवो वै व्वयाꣳसि पशुभिरेवैन मेतदन्नेन प्रीणात्यथो पशुभिरेवैन मेतदन्नेनाभिषिञ्चति † ॥ ७ ॥

अथ नामग्राहं जुहोति। एतद्वै देवाः सर्व्वान् कामानाप्त्वाथैत मेव प्रत्यक्ष मप्रीणंस्तथैवैतद्यजमानः सर्व्वान् कामानाप्त्वाथैत मेव प्रत्यक्षं प्रीणाति व्वाजाय स्वाहा प्रसवाय स्वाहेति नामान्यस्यैतानि नामग्राह मेवैन मेतत् प्रीणाति ‡ ॥ ८ ॥

त्रयोदशैतानि नामानि भवन्ति। त्रयोदश मासाः संव्वत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् प्रीणाति

* 'मेतदभिषिञ्चति'—इति ख। † 'मेतदन्नेनाभिषिञ्चति'—इति ख।
‡ 'प्रीणाति'—इति क, ख।

यद्देव सामयाहं जुहोति * सामयाह मेवैन मेतदभि-
षिञ्चति † ॥ ९ ॥

अथाह । इयं ते राडित्ययाय यन्तासि य मन
ऽऊर्ज्जं त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायेत्यन्नं
वा ऽऊर्गन्नं वृष्टिरन्नेनैवैन मेतत् प्रीणाति ॥
॥ १० ॥

यद्देवाह । इयं ते राडित्ययाय यन्तासि य
मन ऽऊर्ज्जं त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्याये-
तीदं ते राज्य मभिषिक्तो ऽसीत्येतत् मित्रस्य त्वं
यन्तासि य मन ऽऊर्ज्जं च नोऽसि वृष्ट्यै च नोऽसि
प्रजानां च न आधिपत्यामीत्युपब्रूत ऽएवैन मेत-
देतस्मै नः सर्व्वस्मा ऽअभ्येतस्मै त्वा सर्व्वस्मा ऽअभ्य-
षिचा मही ति तस्माद् इदं मानुषं राजान मभि-
षिक्त मुपब्रुवते ‡ ॥ ११ ॥

* 'जुहोति' इति ख ।

† 'मेतदभिषिञ्चति' इति ख सामयाह मेवैन मेतदभिषिञ्चति'—
(without any accentuation) इति ग घ ।

‡ 'मुपब्रुवते' —इति क, ख ।

अथ कल्पान् जुहोति। प्राणा वै कल्पाः प्राणानेवास्मिन्नेतद्दधात्यायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पता मित्येतानेवास्मिन्नेतत् क्लृप्तान् प्राणान् दधाति ॥ १२ ॥

द्वादश कल्पान् जुहोति। द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतत् क्लृप्तान् प्राणान् दधाति यद्वेव कल्पान् जुहोति प्राणा वै कल्पा ऽअमृत मु वै प्राणा ऽअमृतेनैवैन मेतदभिषिञ्चति * ॥ १३ ॥

अथाह। स्तोमश्च यजुश्च ऽऋक् च साम च बृहच्च रथन्तरं चेति त्रयी ह्येषा विद्यान्नं वै त्रयी विद्यान्नेनैवैन मेतत् प्रीणात्यथो ऽअन्नेनैवैन मेतदभिषिञ्चति स्वर्देवा ऽअगन्मा मृता ऽअभूमेति स्वर्हि † गच्छत्यमृतो हि भवति प्रजापतेः प्रजा ऽअभूमेति प्रजापतेर्हि प्रजा भवति वेट् स्वाहेति

* 'मेतदभिषिञ्चति'—इति क, ख।

† 'अभूमेतिस्वर्हि'—इति ग, घ।

वषट्कारो ह्येष परोऽक्षं यद्वषट्कारो वषट्कारेण वा वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते तदेनमेताभ्यामुभाभ्यां प्रीणाति वषट्कारेण च स्वाहाकारेण चाथो एताभ्यामेवैनमेतदुभाभ्यामभिषिञ्चत्यथ ताꣳ स्रुचमनुप्रास्यति यदत्राज्यलिप्तं तन्नेद्बहिर्धाग्निरसदिति ॥ १४ ॥

तस्यै वा एतस्यै वसोर्धारायै । द्यौरेवात्माभ्रमूधो विद्युत्स्तनो धारैव धारा दिवोऽधि गामागच्छति ॥ १५ ॥

तस्यै गौरेवात्मा* । ऊध एवोध स्तन स्तनो धारैव धारा गोरधि यजमानम् ॥ १६ ॥

तस्यै यजमान एवात्मा । बाहुरूधः स्रुक्स्तनो धारैव धारा यजमानादधि देवान् देवेभ्योऽधि गां गोरधि यजमानं तदेतदनन्तमक्षय्यं देवानामन्नं परिप्लवते स यो हैतदेवं वेदैवꣳ

* 'गौरेवात्मा' इति ख। 'गौरेवात्मा'—इति ग, घ।

हैवास्यैतदन्नमक्षय्यं भवत्यथातः सम्पदेव* ॥ ॥ १७ ॥

तदाहुः । कथमस्यैषा वसोर्धारा संवत्सरमग्निमाप्नोति† कथꣳ संवत्सरेणाग्निना सम्पद्यत ऽइति षष्टिश्च ह वै त्रीणि च शतान्येषा वसोर्धाराथ षडथ पञ्चविꣳशमतो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत् संवत्सरस्याहान्याप्नोत्यथ यानि षट् षड् वा ऽऋतवस्तदृतूनाꣳ रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चविꣳशꣳस त्रयोदशो मासः स ऽआत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव पञ्चविꣳशमेतावान्वै संवत्सर एवमु हास्यैषा वसोर्धारा संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यत ऽएतावत्य उ वै शाण्डिले ऽग्नौ मध्यतो यजुष्मत्य ऽइष्टका उपधीयन्ते ऽन्तयो हैति

* 'सम्पदेव'- इति ग, घ।

† 'माप्नोमि'-- इति ग, घ।